CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

सागरिका

एकविंशवर्षे

द्वितीयोऽङ्कः

विक्रम--संवत्सरे २०:९

सम्पादकाः

डा० रामजी उपाध्यायः (प्रधानः)

डा० राधावल्लभः त्रिपाठी

डा० रेवाप्रसाद द्विवेदी

डा० रामगोपाल मिश्रः

प्रकाशिका

सागरिका-समितिः

महामनापुरी,

वाराणसी--५ (B. H. U.)

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

सागरिका

एकविंशवर्षे

द्वितीयोऽङ्कः

विक्रम--संवत्सरे २०३९

सम्पादकाः

डा० रामजी उपाध्यायः (प्रधानः)

डा० रेवाप्रसाद द्विवेदी

डा० राधावल्लभः त्रिपाठी

डा० रामगोपाल मिश्रः

प्रकाशिका

सागरिका-समितिः

महामनापुरी,

वाराणसी--५ (B. H. U.)

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderab

प्रचारिका व्यवस्थापिका च
सागरिका-समितिः
गौरनगर, सागर

मुद्रकः
देववाणी प्रेस
बड़ी मलदहिया, सी. ३०/३६
वाराणसी

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

विषय-सूची

विषय	लेखक	पृष्ठ-संख्या
१. नाट्यप्रयोगे कृतपविन्यासाः	डॉ० रेवाप्रसाद द्विवेदी	१–८
२. कठोपनिषदस्तात्पर्यम्	डॉ० हिमांशु चक्रवर्ती	९–१४
३. यास्कस्य चिन्तने मौलिकता	डॉ० रामकृष्ण सराफः	१५–१६
४. विष्णुपदार्थः	सुनीता वर्मा	१७-२६
५. अलंकारशास्त्रे वामनस्य योगदानम्	डॉ० विमारानी दुबे	२७–३२
६. महाभारते गोप्रतिष्ठा	डॉ० रामजी उपाध्यायः	३३–४०
७. रसगंगाधरवास्तवस्तवः	आचार्य–श्रीमधुसूदनशास्त्री	४ –५२
८. ध्वनिपूर्ववर्त्याचार्याणां रसपरामर्शः	डॉ० विमारानी दुबे	५३–५८
९. चरित्र-परिरक्षणम्	रामलखन पाण्डेयः	५९–६२
१०. विष्णुधर्मोत्तरे महाकाव्यलक्षणम्	परमानन्दमिश्रः	६३–६६
११. आग्नेयकाव्यलक्षणस्य वैशिष्ट्यं परवर्तिकाव्यशास्त्रेषु तस्य प्रभावश्च	डॉ० (श्रीमती) उषा द्विवेदीः	६७–७४
१२. प्राच्यभारतीयं मधुपर्कार्हणम्	डॉ० किशोरमिश्रः, वेदाचार्यः	७५–८८
१३. तिङर्थविमर्शः	डॉ० बालशास्त्री	८९–९६
१४. नाट्यसन्धिलक्षणम्	डॉ० रेवाप्रसाद द्विवेदी	९७–१००
१५. वामनपुराणे विष्णोश्चरितम्	डॉ० जानकी प्रसाद द्विवेदः	१०१–११२

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

नाटचप्रयोगे कुतपविन्यासा:[1]

डा० रेवाप्रसाद द्विवेदी

शास्त्रान्तरेषु 'कुशः, मुहूर्त्तभेदः, अपराह्णः, मध्याह्नः, एकोद्दिष्टश्राद्धकालः, खड्गपात्रम्, नेपालकम्बलः, छागरोमकम्बलः, रौप्यम्, तिलः, वृषभः, दौहित्रः, भागिनेयः सूर्यः, द्विजातिः, ब्राह्मणः, अग्निः, अतिथिः, धान्यविशेषश्चे[2]—त्येतेष्वर्थेषु प्रसिद्धोऽपि कुतपशब्दो नाटचशास्त्रे वाद्यवृन्दपरः।[3] व्युत्पादयन्त्यमुं विज्ञाः कुं भूमिं तपती'-ति खचो योगेन, नुमोऽभावे आगमविधेरनित्यत्वं प्रमाणीकृत्य। कुत्सितं तपतीत्यस्यापरा व्युत्पत्तिः,[4] कुतं शब्दं पातीति चान्या। नाटचप्रयोगसन्दर्भे पुनः कोः रङ्गापरपर्यायाया नाटचभुव औज्ज्वल्यरूपात् तापनात्, कुतस्य भारतीवृत्तिसतत्त्वस्य शब्दस्य पानाद् वा कुतपत्वमित्यभिनवगुप्तनाथः।[5] भरतः पुनरत्र बद्धमौनः।

---

१. संदर्भार्थमधिकृता अत्र नाटचशास्त्रस्य बडौदाप्रकाशिताश्चत्वारो भागाः।

२. अमरे भानुजिः, मेदिनी, अनेकार्थसंग्रहः, हलायुधः, शब्दकल्पद्रुमः, आप्टे, कुतुपः कुतप इत्यभिन्नार्थकौ शब्दाविति मॉनियरः।

३. 'चतुर्विधातोद्यभाण्डानि कुतपः' ना० शा० ३. १२ अभिनवभारती आतोद्यसंबन्धिनो गायनवादकसमूहस्य कुतपत्वम्। तथा चाभिनवगुप्तः—'कुतपः संफेटक (:) गायनवादकसमूहः' इति ना० शा० २.८२–अ० भा०। वाद्यवृन्दमेव कुतप इति तु तृतीयाध्याये संगीतरत्नाकरः।

४. 'पापं कुत्सितमित्याहुस्तस्य संतापकारिणः कुतपा'—मिताक्षरा 'दिवसस्याष्टमे भागे मन्दीभवति भास्करः। स कालः कुतपो ज्ञेयः।' शातातपः, अमरे च भानुजिः।

५. कुतं शब्दं पाति, कुं रङ्गं तपत्युज्ज्वलयतीति कुतपः [ना० शा० २८.२ अ० भा०], कुर्नाटचभूमिः, तां तपत्युज्ज्वलयतीति कुतपः, कुतं शब्दं पातीत्यन्ये [ना० शा० २८.२ अ० भा०]

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

द्विविधानि हि वाद्ययन्त्राणि वादकेन समवेतानि, संयुक्तानीति च। तत्राद्यानि गातुः शरीरादपृथग्भूतानि, यथा कण्ठो ग्रामरागादौ करतलाङ्गुल्यादिकं च चञ्चत्पुटादौ। अपराणि पुनः प्रतीतान्येव ततावनद्धघन-सुषिरत्व-लक्षण-महाजातिपरिगतत्वेन, विपञ्चीत्वादि-तद्व्याप्य-जातिपरिगतत्वेन च। अत्रापि कण्ठादीनां 'विपच्य घटो भवती' त्यादौ विपाकादि पौर्वकाल्य-निरूपकाणां घटनादीनामिवाव्यक्तत्वम्, अपरेषां पुनर्व्यक्तरूपत्वमेव 'स्नात्वा पीत्वा गच्छती'—त्यादौ स्नानादि पूर्वकालत्वनिरूपकाणां गमनादीनामिव। एवं च गायनस्यापि वादकत्वमेव। कुतपे वादका अपि न संगृह्यन्ते तथापि वादनक्रियाया एवात्र तात्पर्यविषयत्वाद् वाद्यानामेव प्राथमिकत्वम्, गुणीभूतत्वं च वादकानामित्येव घण्टापथः। अत एव व्याहारः 'कुतपविन्यास' इति। विन्यासो नाम स्थानविशेषसंनिवेशः, स च वस्तूनामेव भवति, न पुरुषाणाम्। द्विविधो हि कुतपः आतोद्याश्रितः, नाटयप्रयोगाश्रितश्चेति। आतोद्यमपि द्विविधं मधुरत्वेनाविद्धत्वेन च। तत्राद्यं ततमित्युच्यते। तन्त्रीवाद्यानां तत्र संग्रहः। अपरं चावनद्धमिति। स च च संग्रहः पणवादीनाम्। घनसुषिरयोश्च क्रमेणावनद्ध-ततयोरेव संग्रहः, अवहननतननक्रिययोरविशेषात्।[१] अवहननमेव हि कांस्यतालादिरूपस्य घनस्यापि विपाकः पणवादीनामिव। एवमेव तननमेव वंशादीनामपि वीणादीनामिव। एवं चातोद्याश्रितः कुतपोऽपि द्विविधः (१) ततकुतपः (२) अवनद्धकुतपश्चेति। नाट्यप्रयोगाश्रितः पुनरेक एव 'नाट्यकुतप' इति।

तत्र तते कुतपे 'गायनः, तस्य पत्नी, विपञ्चीवादकः, वीणावादकः, वेणुवादक'श्चेति पञ्चाङ्गानि। यदुक्तं मुनिना—

ततः कुतपविन्यासो गायनः सपरिग्रहः।[२]
वैपञ्चिको वैणिकश्च वंशवादस्तथैव चे॥ ति।

—[ना० शा० २८.४]

अवनद्धकुतपस्याङ्गानि—'मार्दङ्गिकः, पाणविकः, दार्दरिक'श्चेति त्रीणि। यदुक्तं मुनिनैव—

---

१. ना० शा० २८०३ अभिनवभारती—

२. परिग्रहो गायनस्य पत्नी—ना० शा० २८.४ अ० भा०

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

मार्दङ्गिकः पाणविकस्तथा दार्दरिकोऽपरः ।
अवनद्धविधावेष कुतपः समुदाहृतः ॥ इति ।

—[ना० शा० २८.५]

सातोद्याभिरुत्तमाधममध्याभिस्तिसृभिः प्रकृतिभिरन्वितस्तु नाट्य-कुतपः । तथा च मुनिः —

'उत्तमाधममध्याभिस्तथा प्रकृतिभिर्युतः ।
कुतपो नाट्यप्रयोगे तु' ॥ इति ।

—[ना० शा० २८.६]

त्रिविधोऽप्येष कुतपो भूयोऽपि द्विविधः समग्राङ्गत्वेन, असमग्राङ्ग-त्वेन, नियतदेशस्थत्वेनानियतदेशस्थत्वेन च । तत्रानियतदेशो नाट्य-कुतपः, तत्र नाट्यप्रयोगपात्रैः साकमातोद्यसहितानामुत्तमप्रकृतिकादि-त्रिविध-वादकानामपि रङ्गपीठे पार्श्वकक्ष्यासु वा चारीविधानात् । अत एव नानादेशसमुद्भवत्वमाम्नायतेऽस्य भरतेन—'कुतपो नाट्ययोगे तु नानादेशसमुद्भव' [ना० शा० २८.६] इति वाक्यशेषेण ।[१]

नियतदेशगतः पुनर्नेपथ्यगृहद्वारयोर्मध्ये स्थितः । उक्तं हि भरतेन—

(क) **ये नेपथ्यगृहद्वारे मया पूर्वं[२] प्रकीर्त्तिते ।**
तयोर्भाण्डस्य विन्यासो मध्ये कार्यः प्रयोक्तृभिः ॥ इति

—[ना० शा० १३.२]

(ख) उपविष्टे प्राङ्मुखे रङ्गे कुतप एव विन्यासः कर्त्तव्यः । तत्र[३] पूर्वोक्तयोर्नेपथ्यगृहद्वारयोर्मध्ये कुतपविन्यासः कार्यः । तत्र पूर्वाभिमुखो मौरजिकः, तस्य पाणविकदार्दरिकौ वामतः । एष प्रथममवनद्धकेन । तस्य (ततस्) ततः कुतपविन्यास उक्तः । तत्रोत्तराभिमुखो गायकः (नः) तस्य वामपार्श्वे

---

१. देश शब्दोऽत्र रङ्गपीठस्थानपर इति अभिनवगुप्तः कर्णाटादि-जनपद-विशेष-पर इति तु तृतीयाध्याये संगीतरत्नाकरकारः ।

२-३. द्वितीयेऽध्याये 'कार्यं द्वारद्वयं तत्र नेपथ्यगृहकस्य चे'—ति ६९ कारि-कया । 'एकं दक्षिणतः' अपरमुत्तरत' इति च तत्राभिनवः ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderab

वैणिकः, वैणिकस्य दक्षिणेन वंशवादकौ, गातुरभिमुखं गायिकाः। इति कुतपविन्यास ॥ इति

—[ना० शा० ३४.२१४—वृत्तिः]

समग्राङ्गत्वं नाम सर्वेषां भरतोक्तानामङ्गानां परिग्रहः, एकस्य द्वयोर्वाङ्गयोः परिग्रहश्चासमग्राङ्गत्वम्।

नाट्यप्रयोगविधिरपि द्विविधः चित्रत्वशुद्धत्वाभ्याम्। तत्रोद्रिक्तगीत-वाद्यनृत्यमिश्रत्वं चित्रत्वं[1], तद्भिन्नत्वं च शुद्धत्वम्। प्रयोगोऽपि द्विविधः पूर्वरङ्गरूपो रङ्गरूपश्चेति। एवं च द्वौ द्वौ विधौ प्रयोगद्वयस्येति चातुर्विध्यमुपपन्नं नाट्यप्रयोगस्य। स्पष्टमिदं मुनिवचनैरेव मयापीदं स्मृतं नृत्यं सन्ध्याकालेषु नृत्यता। नाना करणसंयुक्तै रङ्गहारैर्विभूषितम्। पूर्वंरङ्गविधावस्मिन् त्वया सम्यक् प्रयोज्यताम् ॥ ४.१३.१४ ॥

यश्चायं पूर्वरङ्गस्तु त्वया शुद्धः प्रयोजितः।
एभिर्विमिश्रितश्चायं चित्रो नाम भविष्यति ॥ ४,१५.१६ ।
एवं गानं च वाद्यं च नाट्यं च विविधाश्रयम्।
अलातचक्रं प्रतिमं कर्त्तव्यं नाट्ययोक्तृभिः ॥[2]
पूर्वं गानं ततो वाद्यं ततो नृत्यं प्रयोजयेत्।
गीतवाद्याङ्गसंयोगः प्रयोग इति संज्ञितः ॥[3]
एवमेष प्रयोक्तव्यः पूर्वरङ्गो द्विजोत्तमाः।
त्र्यस्रश्च चतुरस्रश्च शुद्धो भारत्युपाश्रितः ॥[4]
एवं तावदयं शुद्धः पूर्वरङ्गो मयोदितः।
चित्रत्वमस्य वक्ष्यामि यथा कार्यं प्रयोक्तृभिः ॥[5]

इति। मिश्रत्वमनयोरेव चित्रशुद्धयोः परिसमाप्तकृत्यमिति न तत् पृथगुपपाद्यते।[6] अत्र अलातचक्रं नाम एकस्मिँश्चक्रे प्रदीप्तानमनेकासां

---

१. ना० शा० ५.१४९-१५७ प्रभृतिषु।

२. ना० शा० २८.७।

३. ना० शा० ३२.३७८।

४. ना० शा० ५.१४८।

५. ना० शा० ५.१४९।

६. नाट्यशास्त्र-पञ्चमाध्याय परिशेषे।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

दीपशिखायां भ्रमिजनितमेकत्वेनावभासनम् । तत्र वस्तुगत्या भिन्नानामपि यथा प्रतीतावभिन्नत्वं तथैव वाद्यादीनामपि । तत्र हि संवाद एव जीवातुः । गीतवाद्याङ्गपदेऽङ्गेपदमङ्गहारस्यैकदेशः । ततश्च प्रयोगो नाम चित्रप्रयोगः । भारती वाग्व्याहारः । एवं च वाङ्मात्रप्रयोजितः शुद्धः, गीतवाद्याङ्गहारमिश्रितश्च चित्रः प्रयोग इत्यायातम् । उद्रिक्तत्वनिवेशे पुनरयमभिप्रायः—सर्व एव ध्वनिः स्वरत्वापरपर्यायनादत्वव्याप्यजात्यवच्छिन्नः, सर्वश्च काकु-रूपारोहावरोह-संभिन्नः । आरोहावरोहौ पुनस्ताललयाद्यनुगतौ । एवं च सर्वोऽपि नादः स्वरात्मा, स्वरश्च संगीतात्मेति नान्तरीयकमेव संगीतत्वं नादमात्रस्य तदभिन्नाभिन्नस्य तदभिन्नत्वनियमात् । एष शब्दः एतत् संगीतमिति व्यवहारः पुनस्तालयाद्युद्रेकमात्रकृत इति ।[१]

तत्र चित्रे पूर्वरङ्गप्रयोगे समग्राङ्गस्य त्रिविधस्यापि कुतपस्य विन्यासः, नाट्यकुतपस्यापि चित्रनान्द्यां संगृहीतत्वात् । एवं च नेपथ्यगृहद्वारयोर्मध्ये गायन-सहितयोर्घनसुषिरसहयुज्वनोश्च ततावनद्धयोः, पीठे च सातोद्याङ्गहाराणाम् 'एवमार्ये'त्यनुव्याहारिणां पारिपार्श्वक-सूत्रधारान्यतर-कृते नान्दी—पाठे समायोजनाच्च नाट्यकुतपस्य संग्रहः ।[२] शुद्धे पुनः पूर्वरङ्गप्रयोगे द्वावेव कुतपौ ततोऽवनद्धश्चेति, नाट्यकुतपस्याऽत्रानुपयोगात् । शुद्धत्वेऽपि पूर्वरङ्गे कुतपस्य समग्राङ्गतायामपि नास्तिक्षतिः । असमग्राङ्गता पुनर्गुण एव । प्रस्तावनान्ते पूर्वरङ्गे दृश्य एवैष सम्पूर्णोऽपि कुतपः कात्स्न्येन, रङ्गपीठ–रङ्गशीर्षविभाजिकाया यवनिकाया विघटनात् ।[३]

मुख्ये तु रङ्गे चित्र-शुद्धत्वे प्रयोज्यवस्तु-प्रकारनिर्धार्ये । तत्र यानि

---

१. अस्माकमलङ्कारकारिका ।

गद्यबन्धेऽपि संगीतकलास्पर्शो न हीयते ।
शब्दो नादात् पृथङ्नास्ति नादश्चापि स्वरात्मतः ॥

—६३ कारिकापरिकरः

२. ना० शा० ५.१०४–१०९ ।

३. ना० शा० ५.१२ ।

ततः सर्वैस्तु कुतपैः संयुक्तानीह कारयेत् ।
विघट्य वै यवनिकां नृत्तपाठ्यकृतानि तु ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

रसप्रधानानि दशरूपकाणि तेषु प्रारम्भात् परिसमाप्तिं यावन्न भवति सर्वेषामपि चित्रविधि-पात्रत्वम्, शाकुन्तलादिषु तदसंभवात्। शाकुन्तलस्य चतुर्थेऽङ्के न खलु शक्यप्रयोगोऽङ्गहारललितो नृत्यहेवाकः, न वा संभवी तननावहननयोरेव समभ्यधिको व्यायोगः। अतएव मुनेरनुशासनम्—

कार्यो नातिप्रसङ्गोऽत्र नृत्यगीतविधिं प्रति।
गीते वाद्ये च नृत्ये च प्रवृत्तेऽतिप्रसङ्गतः॥
खेदो भवेत् प्रयोक्तृणां प्रेक्षकाणां तथैव च।
ततः शेषप्रयोगस्तु न रागजनको भवेत्॥ इति

—[ना० शा० ५.१५७–१६०]

पूर्वरङ्ग एव यदा एतावदनुशासनं, का वार्त्ता तदा मुख्यस्य रङ्गस्य। मालविकायाश्छलिके[1] प्रयोगस्य चित्रत्वमेव पुनरधिकं हारि, पुरूरवसश्च विप्रयोगे।[2] अत्रापि नाट्यकुतपस्य नोपयुज्येत प्रसरः। 'भाणः, वीथी, प्रहसनं, नाटिका, ईहामृग' इत्येतेषु ततकुतपस्य, डिमव्यायोग-समवकारेषु चारभटीप्रधानेषु अवनद्धकुतपस्य प्राधान्यमुत्प्रेक्ष्येत, तदङ्गत्वं चान्यस्यां प्रकरणेषु पुनर्नाटकवदेव स्थितिः।

रूपकेष्वेषु समेषामेव कुतपानामानिर्वहणं समग्रेऽपि प्रयोगे प्रयोग इति न शक्यते निर्बन्धुम्, जीवातुभूताया रसधाराया विच्छेदस्य प्रसङ्गात्।

एवमेव शुद्धत्वमेव कुतपानां युक्तं मुख्ये रङ्गे, चित्रत्वमिव पूर्वरङ्गे। चित्रत्वमिव समग्राङ्गत्वमपि कुतपानां नातिप्रयोजनकं मुख्ये रङ्गे, ध्रुवा-प्रयोगार्थं ततावनद्धयोरन्यतरस्याप्यन्यतमेनाप्यङ्गेन दीपनक्रियाया निष्पत्तेः।

नास्ति चैतेषां चित्रे शुद्धे वापि प्रयोगविधौ नेपथ्यगृहद्वार-द्वय-मध्य-स्थितिकत्वमेव कुतपानां, मत्तवारण्योरपि तेषां व्यवस्थाया जागरू-कत्वात्। अतएव 'रङ्गपीठस्य तिसृषु दिक्षु कुतपसन्निवेश'[3] इति, तत्र-भवानभिनवगुप्तः। रङ्गशीर्षमात्रगतत्वे वाचोयुक्तेरस्या अनुत्थानपराहत्व-मेव। न चात्रान्यथाकारेण स्थितोऽभिनवभारतीपाठः, कक्ष्याविभागप्रक-रणारम्भकारिकाया वृत्तावपि 'वामदक्षिणभागयोः कुतपस्य बिन्यासः,

१. मालविकाग्निमित्रस्य द्वितीयेऽङ्के।
२. विक्रमोर्वशीयस्य चतुर्थेऽङ्के।
३. ना० शा० ५.२ अ० भा०।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

शिष्टे कक्ष्याविभाग'[१] इति मतस्यास्यैवमेवोपलम्भात्। नेपथ्यगृहद्वारद्वय-मध्यगतत्वमत्र द्वितीयभूमिगतत्वमेव। अस्ति हि रङ्गवेदिकाया द्विभूमि-त्वम्।[२] तत्रैका भूमिः पीठरूपा, अपरा च मत्तवारणीरङ्गशीर्षरूपेणाव-शिष्टा परिक्रमाभूमिः।[३] पीठभूमौ दर्शनीयस्येव परिक्रमाभूमावदर्शनीयस्य वस्तुजातस्य व्यक्तिजातस्य वा कक्ष्याविभागेनावस्थानमिति चात्र दृश्य-श्रव्य-प्रविभागः। अतश्च मत्तवारणीगर्भयोः प्रच्छन्नत्वमेव, न प्रकाशत्वम्, अतश्च न तत्र प्रयोगविधानम्, तत्र प्रेक्षकाणां दृष्टेरप्रसरात्। दृश्यत्वे च मत्तवारण्यामपि पीठत्वप्रसक्तिः, अनुपपन्नश्च सर्वसंमतः प्रविभागः पीठ-वारण्योः।[४]

अस्ति च रङ्गशीर्षस्य वैकल्पिकत्वम्, कुतपविन्यासस्येव तत्र प्रयोग-विधानस्याप्यनुमतेः। अतएव मालविकाछलिके पीठं नेपथ्यं चेति द्वे एव भूमी।[५] अतएव च प्रतिमानाटकादौ दशरथशवादिप्रवेशस्य संभवः। 'रङ्गशीर्ष मात्रे कुतपविन्यास इति पक्षे त्वेवंविधानां प्रकरणानामशक्य-संभवमेवोपस्थापनम्। मत्तवारणीगतत्वेन व्यवस्थायां तु प्रसरतितरां चातुरस्री सर्वेषामप्येषाम्। नोचितश्च निर्बन्धः श्रव्यस्य कुतपस्य दृश्य-तायै, ततश्च तस्य रङ्गशीर्षमात्रगतत्वेन व्यवस्थायै। श्रव्यता च न नाम व्याहन्येत मत्तवारणीगतत्वेनापि कुतपानाम्।

एवं प्रयोगविधेश्चित्रत्वमिव कुतपस्यापि समग्राङ्गत्वं, नियतदेश-गतत्वं, दृश्यत्वं च रसप्रधानेषु रूपकेषु न ह्येव भजन्ति सर्वाङ्गव्यापित्वम्, एकदेशगतत्वं पुनर्न नानुमन्येत। श्रीगदितादिषु तु नास्ति क्षतिः सर्वाङ्ग-व्यापित्वेऽप्येषाम्।

अयमत्र निष्कर्षः—

'कुतुपापरपर्यायस्य त्रिविधस्यापि कुतपस्य आसमाप्ति स्थायित्वं,

१. ना० शा० १३.१ अ० भा०।
२-३. 'द्विभूमिर्नाट्यमण्डप' इति ना० शा० २.८०, अ० भा०।
४. ना० शा० २.६४, ९९।
५. मालविकाग्निमित्रस्य द्वितीयेऽङ्के 'नेपथ्यगृहगतायामि'ति श्लोकः।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

नियतस्थानस्थितत्वं, समग्राङ्गत्वं, दृश्यत्वं च पूर्वरङ्गस्यैव चित्रेष्वेव प्रयोगेषूपपद्यते, अन्यत्र पुनरागमापायित्वं प्रच्छन्नत्वं रङ्गशीर्षमत्तवारणी-साधारण्येन स्थितत्वं चेति ।

संस्कृत-साहित्यविभागाध्यक्षः
प्राच्यविद्यासंस्थान
बनारस हिन्दू विश्वविद्यालय

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

कठोपनिषदस्तात्पर्यम्

डा० हिमांशु चक्रवर्ती

तात्पर्यनिर्णायकानि लिङ्गानि

उप-नि-पूर्वस्य सदेर्धातोः क्विप्-प्रत्ययेन निष्पन्नस्योपनिषच्छब्दस्य ब्रह्मविद्यार्थकत्वं भवतीति प्रदर्श्यते सर्वैरद्वैतवादिभिः। अत उपनिषन्मात्रस्य ब्रह्मप्रतिपादकत्वं सिध्यत्येव। तथापि तत्तदुपनिषदस्तात्पर्यं खलु ब्रह्मण्यवेति तात्पर्यनिर्णायकलिङ्गैर्यथाशास्त्रं निरूपणीयम्। शास्त्रेषु निर्दिष्टानि लिङ्गानि च—

उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये॥

अत्र कारिकायामुपक्रमोपसंहारावित्येकं लिङ्गम्, तस्यार्थश्च—उपक्रमोपसंहारयोरैक्यम्। अभ्यासश्च पौनः पुन्येन कथनम्। अपूर्वता च प्रमाणान्तरागोचरता। फलं च प्रयोजनम्। अर्थवादः खलु तात्पर्यविषयीभूतस्यार्थस्य स्तुतिरथवा तद्विपरीतस्य निन्दा। उपपत्तिर्युक्तिः। तात्पर्यार्थस्य प्रतिपादनाय तदानुकूल्येन समुपस्थाप्यते हि युक्तिः। सर्वत्र लौकिकेषु वैदिकेषु च शास्त्रेषु तात्पर्यनिर्णयार्थमियमेव पद्धतिः समाश्रीयते।

लिङ्गानामावश्यकता

यदादौ तदेवान्ते प्रोक्तं चेत्तर्हि तदेव तात्पर्यमिति मन्तव्यम्। पुनः पुनः कथ्यते चेत्तदानीं तदेव विशेषतः प्रतिपाद्यते। मानान्तरसिद्धस्यैवार्थस्य कथने तत्र तात्पर्यं न विद्यते परन्तु किं नाम नूतनं प्रोच्यत इति सर्वैरन्विष्यत इत्यतस्तदेव भवति तात्पर्यम्। फलकीर्तनादपि तात्पर्यं निरूपयितुं शक्यमिति सर्वे जानन्ति, न हि तात्पर्याविषयीभूतस्य पदार्थस्य फलकीर्तने कोऽपि यतते। प्रशंसितार्थः प्रतिपाद्यः निन्दितश्च नेति सर्वजनीनः प्रत्ययः। यदा यत् प्रतिपाद्यते तदा तस्य प्रतिपादनाय

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

युक्तिर्हेतुर्वा समुपन्यस्यते, अन्यथा निर्युक्तिकस्य तत्त्वस्य श्रवणे विचारक्षमस्य पुरुषस्य न भवति स्पृहेति सर्वेषामेव तात्पर्यनिर्णायकानां लिङ्गानामावश्यकत्वं सिद्धमेव।

प्रथमलिङ्गेन तात्पर्यावधारणम्

अधुना तत्तल्लिङ्गविशेषः समालोच्यते। यमनचिकेतसोः संवादरूपेण प्रसृतेयमुपनिषत्। तत्र नचिकेतसे प्रदातव्येषु त्रिषु वरेषु प्रथमतो नचिकेतसा प्रार्थितमैहिकं वस्तु। अनन्तरं स्वर्गजनकं फलं तेन काङ्क्षितम्। गतमितः पर्यन्तमनित्यं वस्तु, तन्न वेदान्तिभिर्विशेषतः प्रार्थनीयम्। तदनन्तरं तृतीयवरादेव प्रारब्धा मुख्योपनिषदात्मतत्त्वस्वरूपा। तथा चोपक्रमो भवति नचिकेतसः प्रश्नेन—

येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके।
एतद् विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीयः॥

(कठोपनिषद् १।१।२०)

अत्र शरीराद्यतिरिक्तस्य पदार्थस्यास्तित्वमात्रं पृच्छयते, आत्मतत्त्वं ह्यत्र सामान्यत एव प्रश्नविषयः। परं साक्षादात्मतत्त्वविषयकप्रश्नस्योपक्रमः खलु तत ऊर्ध्वमेव कृतः—

अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृताकृतात्।
अन्यत्र भूताच्च भव्याच्च यत्तत् पश्यसि तद्वद॥

(तत्र १।२।१४)

इत्यनेन। पापपुण्याभ्यां कार्यकारणाभ्यां भूतभविष्यद्वर्तमानेभ्यश्चान्यत् सर्वव्यवहारातीतं ब्रह्मतत्त्वमात्मतत्त्वं वा वदेति विशेषत उपक्रमो द्रष्टव्यः। तदुपसंहारश्च दृश्यते यमेन प्रोक्ते प्रतिवचने—

अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः।
तं स्वाच्छरीरात् प्रवृहेन्मुञ्जादिवेषीकां धैर्येण।
तं विद्याच्छुक्रममृतं तं विद्याच्छुक्रममृतमिति॥

(तत्र २।३।१७)

शरीराद्यनित्यानात्मपदार्थेभ्यस्तमङ्गुष्ठमात्रमन्तरात्मानं हृदये सन्नि-

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

विष्टं शुद्धं शुक्रं नित्यं पदार्थं प्रवृहेत्, निष्कर्षेत्, पृथक् कुर्यादिति स्पष्टतो यमेन नचिकेतसे समुपदिष्टम् । एवञ्चोपक्रमोपसंहारयोरैक्यरूपाल्लिङ्गा-दात्मतत्त्वमेवैतस्या उपनिषदस्तात्पर्यमिति सिद्धम् ।

द्वितीयं लिङ्गमभ्यासः

अभ्यासाख्यं द्वितीयं लिङ्गं तु सुप्रकटमेव । साकल्येन सप्तविंशत्युत्तर-शतसंख्याकेषु मन्त्रेषु प्रायः शतं मन्त्रा आत्मतत्त्वप्रतिपादका इति तात्पर्यार्थस्य पौनःपुन्येन प्रतिपादनं निःसन्दिग्धम् । तथापि विशेषतः केचन मन्त्रा अत्रोदाह्रियन्ते—"न जायते म्रियते वा विपश्चित् (तत्र १।२।१८), "अणोरणीयान् महतो महीयानात्मास्य जन्तोर्निहितो गुहायाम् (तत्र १।२।२०), "पराञ्चि खानि····कश्चिद् धीरः प्रत्यगात्मान-मैक्षदावृत्तचक्षुरमृतत्वमिच्छन्" (तत्र २।१।१), "सूर्यो यथा····एकस्तथा सर्वभूतान्तरात्मा" (तत्र २।२।११), "नित्योऽनित्यानां चेतनश्चेतना-नाम्" (तत्र २।२।१३), "ऊर्ध्वमूलोऽवाक्शाखः····तदेव शुक्रं तद् ब्रह्म" (तत्र २।३।१), "भयादस्याग्निस्तपति" (तत्र २।३।३) इत्यादयः ।

अपूर्वताद्वारा तात्पर्यनिर्णयः

अपूर्वता च द्रष्टव्या खल्वधोलिखितेषु समुद्धृतमन्त्रवाक्येषु—"देवैरत्रापि विचिकित्सितं पुरा न हि सुविज्ञेयमणुरेष धर्मः" (तत्र १।१।२१), "श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यं न विद्युः" (तत्र १।२।७), "नैषा तर्केण मतिरापनेया" (तत्र १।२।९), "नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन" (तत्र १।२।२३), "नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा । अस्तीति ब्रुवतोऽन्यत्र कथं तदुपलभ्यते ।" (तत्र २।३।१२), "विज्ञानसारथिर्यस्तु मनः प्रग्रहवान् नरः । सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् ।" (तत्र १।३।९) 'दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः" (तत्र १।३।१२), "उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधत" (तत्र १।३।१४) इति । एवञ्च दर्शितं यदयमात्मा देवानामप्यविज्ञातः प्रत्यक्षानुमानादि-प्रमाणानामविषयः सर्वथातिदुरूहोऽपि विज्ञानसहितेन मनसा श्रेष्ठाचार्यो-पदेशेनाधिगन्तुं शक्य इति । तस्मादपूर्वतारूपतृतीयलिङ्गेनापि सिध्यत्या-त्मनस्तात्पर्यविषयीभूतत्वम् ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

फलमिति चतुर्थं लिङ्गम्

फलप्रतिपादकेभ्यः श्रुतिवाक्येभ्योऽपि प्रत्याय्यते यदात्मैव कठोपनिषदस्तात्पर्यलब्धोऽर्थः। तथाहि—दुःखनिवृत्तिः सुखावाप्तिर्वा चरमं फलमात्मज्ञानस्य। दुःखेषु मूर्धन्यं हि जन्म मरणं च। आत्मज्ञानेन जन्ममरणादिरूपदुःखस्यात्यन्तिको नाशो भवति, स एव मोक्षो मुक्तिर्वा। तथा चोक्तं कठोपनिषदि—

मृत्युप्रोक्तां नचिकेतोऽथ लब्ध्वा विद्यामेतां योगविधिं च कृत्स्नम्।
ब्रह्मप्राप्तो विरजोऽभूद्विमृत्युरन्योऽप्येवं यो विदध्यात्ममेव॥
(२।३।१८)

अपि चान्याः श्रुतयः—"यं ज्ञात्वा मुच्यते जन्तुरमृतत्वं च गच्छति" (कठ २।३।८), "निचाय्य तन्मृत्युमुखात् प्रमुच्यते" (१।३।१५), "सोऽध्वनः पारमाप्नोति (१।३।९), "अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति" (१।२।१२), "अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते" (२।३।१४) इत्याद्याः।

अर्थवादलिङ्गेन तात्पर्यनिरूपणम्

अर्थवादश्च पञ्चमं लिङ्गम्। तदेतल्लिङ्गं प्रशंसारूपं निन्दात्मकं च। तात्पर्यविषयीभूतोऽर्थ स्तुत्यात्मकेनार्थवादेन दृढीक्रियते, तद्विपरीतार्थस्य निन्दया च तदेव फलं साध्यते। अर्थवादाः क्वचित् केवलप्रशंसात्मका न वस्तुभूताः किन्तु प्रमाणान्तरविरुद्धत्वान्न स्वार्थे प्रामाण्ययुक्ताः। तादृशा अर्थवादा गुणवादा इत्युच्यन्ते। अपरे च केचनार्थवादा ज्ञातज्ञापकत्वादप्रामाण्यभाजोऽनुवादसंज्ञकाः। तदितरेऽपि सन्ति केचन ये न प्रमाणान्तरविरुद्धा नापि च ज्ञातज्ञापकास्तेषामेव भूतार्थवादत्वसंज्ञा। उक्तञ्च सुरेश्वराचार्यकृत-बृहदारण्यकभाष्यवार्त्तिकान्तर्गते सम्बन्धवार्त्तिके-

विरोधे गुणवादः स्यादनुवादोऽवधारिते।
भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः॥
(५६७ कारिका)

अत्र कठोपनिषद्युक्ता अर्थवादा अपि भूतार्थवादा इति ज्ञेयम्। भवतु, स्तुतिरूपा अर्थवादा आदावुद्ध्रियन्ते—"**येन रूपं** रसं गन्धं शब्दान्

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

स्पर्शांश्च मैथुनान् । एतेनैव विजानाति किमत्र परिशिष्यते, एतद्वै तत् ॥" (कठ २।१।३), "तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम्" (२।२।१२), "तेषां शान्तिः शाश्वती नेतरेषाम् (२।२।१३), एवञ्च रूपरसगन्धशब्दमैथुनस्पर्शरूपां शाश्वतसुखशान्तिरूपां च स्तुतिमभिधाय "यो यदिच्छति तस्य तत्" (१।२।१६) इति च प्रोच्य ब्रह्मलोकोपास्यत्वं च "एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते" (१।२।१७) इत्यनेन वाक्येन प्राह श्रुतिः ।

तात्पर्यार्थमनादृत्य तद्विपरीतार्थग्राहिणां निन्दां प्रदर्शयति श्रुतिः — "यदेवेह तदमुत्र यदमुत्र तदन्विह ।

मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ॥ (२।१।१०)
मनसैवेदमाप्तव्यं नेह नानास्ति किञ्चन ।
मृत्योः स मृत्युं गच्छति य इह नानेव पश्यति॥ (२।१।११)

इत्याभ्यां मन्त्राभ्याम् ।

उपपत्तिनामकं षष्ठं लिङ्गम्

उपपत्तियुक्तिर्वा षष्ठं लिङ्गम् युक्त्या प्रतिष्ठाप्यते यदेक एवात्मा सर्वत्र विराजमानः । तत्रेयं शङ्का—सर्वत्रैवात्मनोऽवस्थितौ सर्वत्रात्मन एवैकस्य भानं स्यात्, बहुजीवरूपेण घटपटादिरूपेण च बहुत्वप्रतीतिर्न स्यात् । अपि च, यद्येक एवात्मा सर्वत्र सर्वान्तर्यामिरूपेण सर्वेषां हृदये सन्निविष्टः स्यात्तदा जीवानामसंख्यातानि दुःखानि खलु परमात्मनोऽपि स्युः, परमात्मापि दुःखशोकादिसंसृष्टः स्यादिति गतं परमात्मनः सुखरूपत्वं परमात्मनः परमात्मत्वं च । तत्र प्रथमायाः शङ्काया उत्तरं सयुक्तिकमुपस्थाप्यते मन्त्रद्वयेन—

अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव ।
एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ॥
(२।२।९)
वायुर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव ।
एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ।
(२।२।१०)

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

अग्निरेकोऽपि दाह्यभेदाद् बहुत्वं प्राप्नोति, तथाऽत्मन एकत्वेऽपि शरीरभेदाद् बहुजीवप्रतीतिस्तथा घटपटादिप्रपञ्चप्रतीतिश्चेत्युपपत्तिर्द्रष्टव्या। एकस्यैव च वायोः प्राणापानादिबहुत्वप्रतीतिराधारभेदात्। एवमेव जीव-भेदादेकस्यैव प्राणवायोरपानवायोर्वा विविधसामर्थ्यवत्त्वमनुभवसिद्धमेव।

द्वितीयशङ्कानिरासार्थं च युक्त्यन्तरोपस्थापकं श्रुतिवाक्यमुदाह्रियते कठोपनिषदः—

सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः।
एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः॥

सर्वलोकप्रकाशकः सूर्यश्चक्षुर्द्वाराशुचिपदार्थान् पश्यन्नपि यदि न तैर्लिप्येत तदात्मापि सर्वेषु जीवेष्वन्तरात्मत्वेन विराजमानोऽपि न तदीयैर्दुःखादिभिर्लिप्तो भवेदिति सर्वथा युक्तिरनुग्राहिका।

सिद्धान्तः

अतश्च षड्विधैस्तात्पर्यनिर्णायकैर्लिङ्गैरुपेत आत्मा खलु कठोपनिषदस्तात्पर्यविषयीभूत इति दुर्निवारः शास्त्रसिद्धान्तः सर्वैः समादरणीय इति शम्।

व्याख्याता
जादवपुर–विश्वविद्यालय

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

यास्कस्य चिन्तने मौलिकता

डा० रामकृष्ण सराफः

संस्कृतवाङ्मये महर्षिर्यास्को निरुक्तरचनया तथैव समाद्रियते यथाष्टाध्यायीकृद्रूपेण महर्षिः पाणिनिः रामायणरचयितृरूपेण महर्षिर्वाल्मीकिर्महाभारतकाररूपेण वा महर्षिव्यासः।

महर्षिणा स्वकीये निरुक्ते वैदिकशब्दा व्याख्याताः। वैदिकमन्त्राणामर्थज्ञानेन सहैव क्लिष्टशब्दानां निर्वचनस्यापि ज्ञानं निरुक्तेन भवति इति तैनोक्तम्। महर्षिणा स्वीयां पद्धतिमाविष्कृत्य वैदिकशब्दाः समाख्याताः। वैदिका वा लौकिका वा सर्वेऽपि भवन्ति शब्दा धातुजा भवन्तीति यास्कवचनम्। अतः सर्वेशब्दा अवश्यमेव निर्वचनीयाः। शब्दस्यार्थं पुरस्कृत्य कस्यापि धातोः साम्येन शब्दः परीक्षितव्यः।[१] व्याकरणशास्त्रे स्वीकृते प्रकृतिप्रत्ययविभागे महर्षेराग्रहो न दृश्यते।[२]

वैदिकशब्दानां निर्वचनस्य प्रसंगे यास्कस्य मौलिकी प्रतिभासमुल्लसति। एषा प्रवृत्तिः विशेषरूपेण तदा लक्ष्यते यदा वैदिकशब्दानां रूढां व्याख्यामनादृत्य तेषां निर्वचनं महर्षिरभिनवत्वेन प्रस्तौति। यास्केन त एव शब्दा व्याख्याता ये निघण्टौ संगृहीताः।

निरुन्ते प्रथमेऽध्याये तृतीये पादेऽध्वर इति शब्दस्य व्याख्यां प्रस्तुत्वन् महर्षिः कथयति यदध्वर इति यज्ञानाम। ध्वृधातुस्तु हिंसार्थकः। अध्वरश्च तस्य प्रतिषेधकः। एवं स एवाध्वरो नाम यत्र हिंसा वधो या प्रतिषिध्यते।[३] सामान्येनाध्वाब्दो यज्ञवाचकः। यास्केन निर्भयमस्वीकृतः। तस्य नवोनंच व्याख्यानमुपस्थापितम्। यज्ञ इति शब्दस्तु पुरुष-

---

१. अर्थनित्यः परीक्षेत केनचिद् वृत्तिसाम्येन। निरुक्तम्-प्रकाशक मेहरचन्द्र लक्ष्मणदास दिल्ली—६-प्रथम संस्करण १९६४ पृष्ठ ६।

२. न संस्कारमाद्रियेत। तदैव पृष्ठ—६२।

३. अध्वर इति यज्ञनाम। ध्वरतिर्हिंसाकर्मा तत्प्रतिषेधकः। तत्रैव पृ०—२५।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

सूक्तेऽपि विद्यते।[1] तत्रापि स शब्दो हिंसां नावबोधयति। यज्ञशब्देन तत्र पूजा पवित्रं कर्म वा परिलक्ष्यते।[2] ऋषिणा तस्मिन् सूक्ते मानस्या संकल्पनया सृष्टियज्ञस्य स्वरूपं परिकल्पितं यस्येद्दग्विधानां जागतिके-पदार्थानामुत्पत्तिः प्रदर्शिता। तत्र लौकिकयज्ञस्य स्थाने 'अध्यात्मिको यज्ञः' प्रतिष्ठापितः।

ब्राह्मणवाङ्मये नानाविधा यागा विस्तेरण वर्शिताः सन्ति। यागानां वर्णनं यद्रूपेण ब्राह्मणग्रन्थेषु प्राप्यते, आरण्यकवाङ्मये तस्माद्विरक्तिः संजायते। तत्र यज्ञियं कर्मकाण्डं विहाय ज्ञानोन्मुखी प्रवृत्तिर्दर्शनपथ-मायाति। बृहदारण्यकोपनिषदि अश्वमेघयज्ञस्य फलप्राप्त्यर्थं तस्य यज्ञस्य प्रत्यक्षतो विधानं नादिश्यते, परमश्वमेघस्याश्वरूपेण उषा आराधनीयेति निर्दिश्यते।[3] तथैव सूर्यस्तस्य नेत्ररूपेण वायुश्च प्राणरूपेणाराध्यः।

आरण्यकेषु परिलक्षितायाः प्रवृत्तेः पर काष्ठोपनिषद्वाङ्मये प्रेक्ष्यते यत्र ज्ञानमेव मोक्षसाधनमित्यंगोक्तम्। महर्षेर्यास्कस्य समयः सप्तमी शती ईसापूर्वमिति विद्वभिः स्वीक्रियते।[4] अस्मिन्देशे कालोऽयमुपनिषदां चिन्तनधारया प्रभावितः प्रतीयते। अतो नेदमाश्चर्यं यद् यास्कस्व व्याख्यापद्धतिः 'आरण्यकानामुपनिषदश्च' चिन्तनेन प्रभाविता स्यात्।

महर्षिरध्वर इति शब्दस्य तु 'हिंसाविहीनो यज्ञ' इत्यर्थं प्रतिपादय-त्येव। अध्वर्युशब्देनापि अयमेवार्थो ध्वन्यते, यत्र 'अध्वरस्य' अर्थात् हिंसाविहीनयज्ञस्य नेता (प्रवर्तकः) अध्वर्युरिति[5] स स्वीकरोति।

●

---

१. यज्ञेन यज्ञमयजन्त देवाः। ऋग्वेदे १०/९०/१६।
२. ऋग्वेदे १०/९०/१६ सायणभाष्यम्।
३. उषावा अश्वस्य मेध्यस्य शिरः। सूर्यश्चक्षुर्वातः प्राणः। बृहदारण्यो-कोपनिषदि। १/१/१।
४. हिन्दीनिरुक्त सम्पा० डा० कपिलदेव शास्त्री साहित्यभण्डार मेरठ १९७८ भूमिकायां पृ० २४।
५. अध्वर्युः............अध्वरस्य नेता। निरुक्तम् प्रका० मेहरचन्द्र लक्ष्मणदास दिल्ली ६ १९६४ पृ० २५।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

विष्णुपदार्थः

सुनीतावर्मा

विष्णुपदस्य व्युत्पत्तिः विष्लृ (व्याप्तौ) विष् (विप्रयोगे) विषु (सेचने) विश् (प्रवेशने) णु (स्तुतौ) अशूङ (व्याप्तौ) षिञ् (बन्धने) वी (गतौ) वश् (कान्तौ) वृष् (शक्तिबन्धे) स्तम्भु (प्रतिबन्धे) इति एकादशधातुभ्यः प्रत्ययसंयोगात् सिध्यति। विष्णुपदमेकमेव परं तस्य अर्था धातुभेदाद् भिन्नाः। येभ्यः धातुभ्यः विष्णुपदस्य व्युत्पत्तिः सिध्यति वस्तुतः ते विष्णुदेवतापदार्थस्य अपि द्योतकाः न वा इत्येव अस्य शोधपत्रस्य प्रयोजनम्।

वेदेषु, पुराणेषु, निरुक्ते, कोशेषु, अन्येषु च ग्रन्थेषु विष्णुपदं प्रयुक्तं प्राप्यते। तद्यथा—

ऋग्वेदे—द्विपञ्चाशत् मन्त्रेषु विष्णुपदं प्रयुक्तम्। अत्र व्युत्पत्तिप्रवणाः प्रयोगा प्राप्यन्ते। तद्यथा—

विचक्रमे पृथिवीमेष एतां क्षेत्राय विष्णुर्मनुषे दशस्यन्।
ध्रुवासो अस्य कीरयो जनास उरुक्षितिं सुजनीमा चकार॥[1]

अत्र क्रमु (पादविक्षेपे) इति धातुप्रयोगात् गमनशीलः विष्णुः इति स्पष्टम्।

ऋग्वेदस्य विष्णुसूक्तं तु विशेषतो महत्त्वपूर्णमस्ति। तद्यथा—

प्र तद् विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा॥[2]

अत्र विष्णुः पदत्रयेण निखिलं जगत् मिमीते अतएव विष्णुः व्यापकः इति वक्तुं शक्यते। तत्रैव विष्णुर्वृष्णः इत्यपि प्राप्यते। तद्यथा—

१. ऋग्वेदे॥ ७।१००।४॥
२. ऋग्वेदे॥ १।१५४।२॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi- Hyderab

प्र विष्णवे शूषमेतुमन्म गिरिक्षित उरुगायाय वृष्णे ।
य इदं दीर्घं प्रयतं सधस्थमेको विममे त्रिभिरित्पदेभिः ॥[१]

अत्र वृष् (शक्तिबन्धे) धातुना विष्णुः वृष्णः इति प्राप्यते । अपि च विष्णुः लोकानसृजत् । आकाशं चस्कम्भ । तद्यथा—

विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि ।
यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः ॥[२]

अपि च—"विशेषेण नूयते जनैरिति विष्णुः ।" तद्यथा—

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ।[३]

अत्र णु (स्तुतौ) धातुना विष्णुः स्तूयमानः इति स्पष्टम् ।

शुक्लयजुर्वेदे अपि विष्णुपदं द्वाविंशतिमन्त्रेषु उपलभ्यते ।

तत्र मुख्यतया—

इन्द्रश्च मरुतश्च क्रपायोपोत्थितोऽसुरः पण्यमानो मित्रः ।
क्रीतो विष्णुः शिपिविष्टऽरावासन्नो विष्णुर्नरन्धिषः ॥[४]

अत्र विष्णुः रश्मिभिः रश्मिषु वा जलेन जले वा पशुभिः पशुषु वा विष्टः अत एव सर्वेषु पदार्थेषु प्रविष्टः इति स्पष्टम् । अपि च—विष्णवे स्वाहा विष्णवे निभूयपाय स्वाहा विष्णवे शिपिविष्टाय स्वाहा ।[५]

अत्र विष्णुपदस्य जगद्रक्षकः प्रवेशकः प्रविष्टः च इति स्पष्टा अर्थाः । विष्णुपुराणे, मत्स्यपुराणे, वायुपुराणे, वामनपुराणे, पद्मपुराणे च विष्णुपदं प्रयुक्तम् उपलभ्यते । तद्यथा—**वामनपुराणे**—

गुणातीतः स भगवान् व्यापकः पुरुषः परः ।
अनन्तभोगशायी च यन्नाभिकमलादभूत् ॥

---

१. ऋग्वेदे ॥ १।१५४।३ ॥
२. ऋग्वेदे ॥ १।१५४।१ ॥
३. ऋग्वेदे ॥ १।२२।२० ॥ 'संस्कृत पञ्चदेवतास्तोत्राणि' इत्यत्र २१४ तमे पृष्ठे सुरेन्द्रनारायण त्रिपाठीमहोदयैः चर्चितम् ।
४. यजुर्वेदे ॥ ८।५५ ॥
५. यजुर्वेदे ॥ २०।२२ ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

विष्णुश्च स च गोविन्द ईश्वरश्च सनातनः।
यस्तं वेद महात्मानं स जीवन्मुक्त उच्यते ॥[1]

अत्र व्यापकत्वाद् विष्णुः इति विष्लृ (व्याप्तौ) धातुना निष्पन्नः। अतएव विष्णुः व्यापक उक्तः। पुनश्च मत्स्यपुराणे व्यापको जगद्विष्टम्भकः प्रतिबन्धकश्च विष्णुः। तद्यथा—

न क्षीयसे नक्षरसि कल्पकोटिशतैरपि।
तस्मात्त्वमक्षयत्वाच्च विष्णुरित्यभिधीयसे ॥
विष्टब्धं च त्वया सर्वजगत्स्थावरजंगमम्।
जगद्विष्टम्भनाच्चैव विष्णुर्वेति प्रकीर्त्यते ॥
विष्टभ्य तिष्ठसे नित्यं त्रैलोक्यं सचराचरम्।
यक्षगन्धर्वनगरं सुमहद्भूतपन्नगम् ॥
व्याप्यत्वामेव विशते त्रैलोक्यं सचराचरम्।
तस्माद्विष्णुरिति प्रोक्तः स्वयमेव स्वयम्भुवा ॥[2]

अत्रापि व्यापकत्वाद् विष्टम्भनाच्च विष्णुः इति विष्लृ (व्याप्तौ) स्तम्भु (प्रतिबन्धे)[3] चेति धातुभ्यां निष्पन्नः।

महाभारते विशेषरूपेण विष्णुपदस्य प्राप्तिर्भवति। तत्र मुख्यतया—

व्याप्तं मे रोदसी पार्थकान्तिश्चाभ्यधिका स्थिता।
क्रमणाच्चाप्यहं पार्थ विष्णुरित्यभिसंज्ञितः ॥[4]

अत्र विष्णुः रोदसी व्याप्य स्थितः इति उक्तः। महाभारते एव वृहत्वाद् विष्णुरित्यपि प्राप्यते। तद्यथा—

"वृहत्वाद्विष्णुरुच्यते।"[5]

वृहन्नारायणोपनिषदि—विष्णुः व्यापकः इति प्राप्यते। तद्यथा—जगति यत्किंचिद् दृश्यते तत्सर्वं व्याप्य तिष्ठति। ततो विष्णुस्तथा च—

"यत्किञ्चिज्जगत्सर्वं दृश्यते श्रूयते अपि वा।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ॥[6]

---

१. वामनपुराणे ४२ अध्याये शब्दकल्पद्रुमे पृ० ४५४।
२. मत्स्यपुराणे लक्षणैः ॥ २४७।३८-३९-४१-४२ ॥
३. मत्स्यपुराणे लक्षणैः लक्षितम्।
४. महाभारते शान्तिपर्वणि ॥ ४१।४२ ॥
५. महाभारते ॥ ५७१।३६ ॥
६. वृहन्नाराणोपनिषदि ॥ १३।१।२ ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

तैत्तरीयायाम् उपनिषदि—'स च एव जगत् सृष्ट्वा तत्र प्राविशत् ।' अतएव अत्र प्रवेशनात् विष्णुः इति स्पष्टम् । तद्यथा—

नामानि—"तत्सृष्ट्वा तदेवानुप्राविशत् ।"[१]

अच्युतः, त्रिविक्रमः, वासुदेवः, अनन्तः, नारायणः, उरूक्रमः, पुरुषः, सनातनः, प्रजापतिः, विश्वरूपः, विभुः जलेशयः इत्यादि प्रमुखनामानि अपि विष्णुपदार्थस्य एव द्योतकानि । किं बहुना विष्णु-सहस्रनाम्नि विष्णोः सहस्रनामानि प्राप्यन्ते ।

व्युत्पत्तिः—विष्णुपदस्य व्युत्पतिः बहुषु स्थलेषु प्राप्यते । तद्यथा **निरुक्ते**—अथ यद्विषितो भवति तद्विष्णुर्भवति विष्णुर्विशतेर्वाव्यश्नोतेर्वा ।[२]

इति अत्र वि षिञ् (वन्धने) धातुना अशूङ् (व्याप्तौ) धातुना विश् (प्रवेशने) धातुना च विष्णुपदस्य व्युत्पत्तिः प्राप्यते । तद्यथा **ऋग्वेदे** विष्णुः शीघ्रव्यापनशीलः इति प्राप्यते । तद्यथा—

"इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पांसुरे ॥"[३]

अयमेव सूर्यः यदा रश्मिभिः विषितः व्याप्तः भवति तदा विष्णुः इत्युच्यते । अथवा यतोऽयं रश्मिभिः सर्वतः आविष्टो भवति तस्माद्विशतेः साध्यः । अथवा रश्मिभिरयं सर्वं व्यश्नुते । व्याप्नोति तस्माद् विष्णुः । व्यश्नोतेर्वा इति वि पूर्वकं अशूङ (व्याप्तौ) इति मध्यकालीनः सूर्यः आदित्यो वा विष्णुर्भवति ।

दुर्गाचार्यः अपीदमेव स्वीकरोति । तद्यथा—

यदा रश्मिभिरतिशयेनायं व्याप्तो भवति व्याप्नोति वा रश्मिभिरयं सर्वं तदा विष्णुरादित्यो भवति ।[४]

अपि च 'वि' उपसर्गकस्य षिञ् (वन्धने) धातोरपि निष्पाद्यते सर्वं जगत् नियमयतीति भावः । तथा च—

"अय यद्विषितो भवति तद् विष्णुरिति विषिणोति विषिणाति इति वा विष्णुः ।"[५]

---

१. तैत्तरीयायाम् उपनिषदि ॥ २।६ ॥
२. निरुक्ते द्वादशे अध्याये पृ० ५५६ ।
३. ऋग्वेदे ॥ १।२२।१७ ॥
४. दुर्गाचार्यः ॥ २।३॥ (भागवत सम्प्रदाये पृ० ७६)
५. निरुक्ते ॥ १२।१८ ॥ (संस्कृतेपञ्चदेवतास्तोत्रे पृ० २१३)

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

विविधैः कर्मभिः तत्फलैश्च सिनाति जीवानिति विष्णुः ।

विष्णुपुराणे—विश् धातोः (विश् प्रवेशने इति) विष्णुपदस्य व्युत्पत्तिः प्राप्यते ।

तद्यथा—**यस्माद् विश्वमिदं सर्वं तस्य शक्त्या महात्मनः ।**
तस्मादेवोच्यते विष्णुर्विश् धातोः प्रवेशनात् ॥[1]

मत्स्यपुराणे—प्रवेशनात् व्याप्त्या च भगवान्विष्णुरित्यभिधीयते ।

तद्यथा—**प्रविश्यान्तर्महातेजाः स्वयमेवात्मसम्भवः ।**
प्रभावादपि तद् व्याप्त्या विष्णुत्वमगमत्पुनः ॥[2]

वायुपुराणेऽपि—विश् धातोः (विश् प्रवेशने) विष्णुपदस्य व्युत्पत्तिः प्राप्यते ।

तद्यथा—**यस्माद्विष्टमिदं सर्वं वामनेनेह जायता ।**
तस्मात्त्वं वै स्मृतो विष्णुर्विश धातोः प्रवेशनात् ॥[3]

पद्मपुराणेऽपि—विश् धातोः (विश् प्रवेशने इति) विष्णुपदस्य प्राप्तिर्भवति ।

तद्यथा—स भगवान्विष्णुः प्रकृत्या प्रविवेशह ।[4]

विष्णुसहस्रनाम्नि—लोकाध्यक्षत्वेन अक्षरूपेण प्रविष्टः विष्णुः उल्लिखितः ।

तद्यथा—**अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम् ।**
लोकाध्यक्षं स्तुवन्नित्यं सर्व दुःखातिगो भवेत् ॥[5]

हलायुधकोशे—विष्णुपदस्य व्युत्पत्तिः विष्लृ (व्याप्तौ) घातोः नु प्रत्ययेन सिध्यति । अतएव वेवेष्टि व्याप्नोति विश्वं यः (स विष्णुः) । वेषति सिञ्चति आप्यायते विश्वमिति वा (विष्णुः) । विशति सर्वभूतानि विशन्ति सर्वभूतानि[6] (इति वा विष्णुः) ।

१. विष्णुपुराणे ॥ ३।१।४६ ॥
२. मत्स्यपुराणे ॥ २।३ ॥
३. वायुपुराणे ॥ ५५।१३७ ॥
४. पद्मपुराणे ॥ ६।२२६।९५ ॥
५. शङ्कराचार्य विरचिते प्रकरणग्रन्थे विष्णुसहसुनाम्नि पृ० ५१३ ।
६. हतायुघ कोमे पृ० ६२८ ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

शब्दकल्पद्रुमे—चायमर्थो विशदरूपेण उक्तः।[१]

वाचस्पत्ये—विश् धातोः प्रवेशनात् विष्णुपदस्य व्युत्पत्तिः प्राप्यते।[२]

संस्कृतशब्दार्थकौस्तुभे—विष्णुपदस्य व्युत्पत्तिः विष् (व्याप्तौ) धातुना प्राप्यते।[३]

अमरकोशरामाश्रमीटीकायां[४] सायणकृतायां माधवीयायां धातुवृत्तौ[५]—च विष्लृ (व्याप्तौ) धातोः (विषेः किच्चेति) नु प्रत्ययेन सिध्यति विष्णुशब्दः।

संस्कृतहिन्दी-इंग्लिशकोशे—विष् (विप्रयोगे) विष् (सेचने) इति धातुत्रयेण व्युत्पाद्यते विष्णुः।[६]

बृहद्देवतायां विष्णुपदस्य व्युत्पत्तिः प्राप्यते यत्—

विष्णातेर्विशतेर्वा स्याद् वेवेष्टेर्व्याप्तिकर्मणः।
विष्णुर्निरुच्यते सूर्यः सर्वः सर्वान्तरश्च यः॥[७]

विष्णुसहस्रनाम्नः शाङ्करभाष्ये नुक् प्रत्ययेन विष्णुपदस्य व्युत्पत्तिः साधिता। तद्यथा—"वेवेष्टि व्याप्नोति विष्णुः" वेवेष्टेर्व्याप्त्यभिधायिनो नुक् प्रत्ययान्तस्य रूपमिति। अतएव देशकाल परिच्छेदशून्य इत्यर्थः।[८]

विष्णुसहस्रनाम्नि 'कान्त' पद प्रयोगात् वश् (कान्तौ) धातोरपि विष्णुः व्युत्पाद्यते। तद्यथा—

कामदेवः कामपालः कामी कान्तः कृतागमः।
अनिर्देश्य वपुर्विष्णुर्वीरोऽनन्तो धनञ्जयः॥[९]

मध्वाचार्यः वी (गतिव्याप्तिप्रजनकान्त्यसनखादनेषु) विष्लृ

१. शब्दकल्पद्रुमे चतुर्थभागे पृ० ४५२।
२. वाचस्पत्ये पृ० ४९३४।
३. संस्कृतशब्दार्थ कौस्तुभे पृ० १०९०।
४. रामाश्रमी टीकायां विष्णुपदनिर्वचने पृ० ११।
५. माधवीयायां धातुवृत्तौ पृ० ३९६।
६. संस्कृतहिन्दीइंग्लिशकोशे पृ० ५४५।
७. बृहद्देवतायाम्॥ २।६९॥
८. विष्णुसहस्रनाम्नः शाङ्करभाष्ये १४ श्लोक गीताप्रेस (गोरखपुर)।
९. शङ्कराचार्यविरचितप्रकरणग्रन्थे विष्णुसहस्रनाम्नि पृ० ५५९।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

(व्याप्तौ) वश् (कान्तौ) विश् (प्रवेशने) चेति विष्णुपदव्युत्पादने धातुचतुष्टयं स्वीकरोति ।[1]

अनेन प्रकारेण विष्णुपदस्य प्राप्ता व्युत्पत्तय उल्लिख्यन्ते ।

१. विष्लृ (व्याप्तौ-वेवेष्टि व्याप्नोतीति)+नुक् (विषेः किच्च । उणादि । ३।३९)=विष्णुः=व्यापकः ।

२. विषु (सेचने-वेषति सिञ्चतीति)+नुक् (विषेः किच्च। उणादि। ३।३९)=बिष्णुः=सेचकः ।

३. विष् (विप्रयोगे-विष्णाति वियुनक्तीति) म्नुक् (विषेः किच्च । उणादि । ३।३९)=विष्णुः=वियोजकः ।

४. विश् (प्रवेशने-विशति प्रविशतीति)+नुक् (विषेः किच्च । उणादि । ३।३९)=विष्णु=प्रवेशकः ।

५. अशूङ् (अश्नुते-व्याप्नोतीति) प्रत्ययसूत्रादिक नप्राप्यते । निरुक्तकारेण साधितं रूपमिदम्)=विष्णुः=व्यापकः ।

६. षिञ् (बन्धने सिनातीति) प्रत्ययसूत्रादिकं न प्राप्यते । संस्कृते पञ्चदेवतास्तोत्रे चर्चितं रूपमिदम्)=विष्णु=नियामकः ।

७. वी (गतौ-वेतीति) प्रत्ययसूत्रादिकं न प्राप्यते । मध्वाचार्येण साधितं रूपमिदम्)=विष्णुः=गमनशीलः ।

८. णु (स्तुतौ नौतीति) प्रत्ययसूत्रादिकं न प्राप्यते । संस्कृते पञ्च-देवतास्तोत्रे सम्भावितं रूपमिदम्)=विष्णुः=स्तुतः ।

९. वश् (कान्तौ-वष्टि विश्वम् इति) प्रत्ययसूत्रादिकं न प्राप्यते । मध्वाचार्येणसाधितं रूपमिदम्)=विष्णुः=कान्तः ।

१०. स्तम्भु (प्रतिबन्धे स्तम्भनोति स्तम्भनाति स्तम्भते इति) प्रत्ययसूत्रादिकं न प्राप्यते । मत्स्यपुराणे चर्चितं रूपमिदम्)=विष्णुः=स्तम्भकः ।

११. वृष् (शक्तिबन्धे-वर्षयते प्रजाः प्रसूते इति) प्रत्ययसूत्रादिकं न प्राप्यते । संस्कृते पञ्चदेवतास्तोत्रे चर्चितं रूपमिदम्)=विष्णुः=वृषणः ।

अथ विष्णुपदस्य धातून् प्रत्ययान् प्रयोगान् अर्थांश्च दर्शं दर्शं साम्प्रतम् अर्थनियमनं सुकरम् ।

१. विष्लृ धातोः सामान्योऽर्थः व्यापकः, कारणत्वेन सर्वकार्याणां

---

१. संस्कृते पञ्चदेवतास्तोत्रे पृ० २१३ ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderab

व्यापनाद् व्याप्तः इति अस्ति। किन्तु विशिष्टः अर्थः विष्णुदेवः एव। यद्यपि आकाशः व्यापकः सूर्यः व्यापकः पृथ्वीव्यापकावायुश्च व्यापकः। किन्तु ते सर्वेऽपि स्वस्वसीम्नि एव व्यापकाः। विष्णुस्तु इमानि सर्वाणि व्याप्य व्यापकः। विष्णुः सार्वभौमः। अतएव विष्लृ (व्याप्तौ) धातुः नुक् प्रत्ययसंयोगात् व्यापकं विष्णुदेवमेव सूचयति। अतएव विष्णु-देवतार्थद्योतने रुढोऽयं व्यापकार्थकः विष्णुशब्दः।

२. विश् धातोः सामान्योऽर्थः प्रवेशकः इति अस्ति। किन्तु विशिष्टः अर्थः विष्णुदेवः एव। यद्यपि जीवः शरीरेषु प्रविशति चैतन्यं जडेषु प्रविशति रश्मयः जगति च प्रविशन्ति तथापि इमानि सर्वाणि स्वस्वाधारेणु एव प्रविशन्ति इति ख्यातम्। विष्णुस्तु एतेषु सर्वेषु प्रवेशकः प्रविष्टः इति श्रूयते। अतएव विश् (प्रवेशने) धातुः नुक् प्रत्ययसंयोगात् प्रवेशकं विष्णुदेवमेव सूचयति। अतएव विष्णुदेवतार्थ-द्योतने रुढोऽयं प्रवेशकार्थकः विष्णुशब्दः।

३. विषु धातोः सामान्योऽर्थः सेचनम् इति अस्ति। किन्तु विशिष्टः अर्थः विष्णुदेवः एव। यद्यपि मेघाः पृथ्वीं सिञ्चन्ति प्रकाशः अन्धकार-निगूढं जगत् सिञ्चति ध्वनिः श्रोत्रं सिञ्चति स्पर्शः त्वचं सिञ्चति तथापि ते सर्वे स्वस्वसीम्नि एव सिञ्चन्ति। विष्णुस्तु चेतनमचेतनञ्च सम्पूर्णं विश्वं सिञ्चति। अतएव सर्वसेचकत्वाद् सर्वसेचकः विष्णुः इति सिध्यति। अतएव विष्णुदेवतार्थद्योतने रुढोऽयं सेचनार्थकः विष्णुशब्दः।

४. विष् धातोः सामान्योऽर्थः पृथक्कारकः इति अस्ति। किन्तु विशिष्टः अर्थः विष्णुदेव एव। यद्यपि हंसः दुग्धं जलं च विष्णाति पृथक् करोति, सत्यम् असत्यं च विष्णाति पृथक्करोति, तथापि इमानि सर्वाणि स्वस्यं पृ क्करणकर्म कुर्वन्ति। विष्णुस्तु इमानि सर्वाणि पृथक्करोति। किं बहुना विष्णुस्तु सर्वान् संसाराद् मायामोहाद् दुष्कर्मभ्यश्च विष्णाति। अतएव विष् (विप्रयोगे) धातुः नुक् प्रत्ययसंयोगात् पृथक्कारकं विष्णु-देवमेव सूचयति। अतएव विष्णुदेवतार्थद्योतने रुढोऽयं विप्रयोगार्थकः विष्णुशब्दः।

५. अशूङ् धातोः सामान्योऽर्थः शीघ्रव्यापकः इति अस्ति। किन्तु विशिष्टः अर्थः विष्णुदेवः एव। यद्यपि जलं व्यापकं सूर्यः व्यापकः विद्युद् व्यापिका तथापि ते सर्वे स्वस्थलेषु एव व्यापकाः। विष्णुस्तु सर्वेषु पदार्थेषु सर्वेषु स्थलेषु च नित्यं व्यापकः। विष्णुः सार्वभौमः। अतएव

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

अशूङ् (व्याप्तौ) धातुः शीघ्रव्यापकं विष्णुदेवमेव सूचयति। अतएव विष्णुदेवतार्थद्योतने रुढोऽयं शीघ्रव्यापकार्थकः विष्णुः शब्दः।

६. षिञ् धातोः सामान्योऽर्थः सर्वस्य नियामकः इति अस्ति। किन्तु विशिष्टः अर्थः विष्णुदेवः एव। यद्यपि सूर्यःकालं विषिणाति नियमयति चन्द्रमाः मासं नियमयति ग्रहाः लोकं नियमयन्ति तथापि ते सर्वे स्वस्वभागेषु एव नियमयन्ति। विष्णुस्तु सर्वेषाम् एव नियामकः भूत्वा अपि बन्धनरहितः। अनन्तदेशतः कालतोवस्तुतश्चापरिच्छिन्नः। सर्वेषु भूतेषु च गूढः। अतएव विष्णुः सार्वभौमः। अतएव षिञ् (बन्धने) धातुः सर्वस्य नियामकं विणुदेवमेव सूचयति। अतएव विष्णुदेवतार्थद्योतने रुढोऽयं बन्धनार्थकः विष्णुशब्दः।

७. णु धातोः सामान्योऽर्थः स्तुतः स्तूयमान इति वा अस्ति। किन्तु विशिष्टः अर्थः विष्णुदेवः एव। यद्यपि यज्ञः नूयते स्तूयते कर्मंस्तूयते देवाःस्तूयन्ते तथापि ते सर्वे स्वस्वभक्तै एव नूयन्ते स्तूयन्ते। विष्णुस्तु सर्वैः प्राणिभिः स्तूयते। अतएव णु (स्तुतौ) धातोः निष्पन्नः विष्णुशब्दः विष्णुदेवतापरकः इति सम्भाव्यते।

८. वी धातोः सामान्योऽर्थः गन्ता; गच्छति सर्वस्थलेष्वित्ति अस्ति। किन्तु विशिष्टः अर्थः विष्णुदेवः एव। यद्यपि प्राणिनः गच्छन्ति सूर्योगच्छति वायुर्गच्छति ध्वनिर्गच्छति प्रकाशो गच्छति तथापि ते सर्वे स्वस्वसीम्नि एव गच्छन्ति। विष्णुस्तु त्रिभिः पदैः सर्वत्र विचरणं करोति सूर्यरूपेण च द्युलोके विचरणं करोति। विष्णुः सार्वभौमः। अतएव वी [गतौ] धातुः सर्वत्र गमनशीलं विक्रमिणं विष्णुदेवमेव सूचयति। अतअव विष्णुदेवतार्थद्योतने रूढोऽयं गमनशीलार्थकः विष्णुशब्दः।

९. वश् धातोः सामान्योऽर्थ इष्टः कान्तः इति अस्ति। किन्तु विशिष्टः अर्थः विष्णुदेवः एव। यद्यपि कान्ताः चङ्क्म्यन्ते धनं काम्यते यशः काम्यते। कामङ्काममेव जगत् प्रचरति। तथापि—गीतायाम्

इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः।
मनस्तु परा बुद्धिः यो बुद्धेः परतस्तुः सः॥

इति साक्ष्यात् कामः विष्णुरेव वश् धातोः निष्पाद्यते। अतएव वश् [कान्तौ] धातुः श्रीकान्तं सर्वकान्तं विष्णुदेवमेव सूचयति। अतएव वश् [कान्तौ] धातोः निष्पन्नः विष्णुशब्दः विष्णुदेवतापरकः इति सम्भाव्यते।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

१०. स्तम्भु धातोः सामान्योऽर्थः प्रतिबन्धकः स्तम्भकः इति अस्ति। किन्तु विशिष्टः अर्थः विष्णुदेवः एव। यद्यपि भाव मूढः लोकः स्तम्भते सिंहभीताः हरिण्यः स्तम्भन्ते, समाधिलीनाः जीवन्मुक्ताः स्तब्धाः श्रूयन्ते, तथापि जगद्विष्टम्भकः पृथिवीबिष्टम्भकः विष्णुरेव स्तम्भरूपेण कूटस्थः विस्तुतः। अतएव स्तम्भु (प्रतिबन्धे) धातुः सर्वत्र स्तम्भकं विष्णु-देवमेव सूचयति। अतएव विष्णुदेवतार्थद्योतने रुढोऽयं स्तम्भकार्थकः विष्णुशब्दः।

११. वृष् धातोः सामान्योऽर्थः वृष्णः शक्तिबन्धकः प्रजाप्रसविता इति अस्ति। किन्तु विशिष्टः अर्थः विष्णुदेवः एव। यद्यपि वृषः प्रजजने रुढः अन्नानि वर्षयन्ते मेधाश्च वर्षयन्ते तथापि समग्रलोक प्रसवात् वृष्णः एव विष्णुरिति ख्यातः। अतएव वृष् (शक्तिबन्धे) धातुः सर्वत्र वृष्णं विष्णुदेवमेव सूचयति। अतएव विष्णुदेवतार्थद्योतने रुढोऽयं स्तम्भ-कार्थकः विष्णुशब्दः।

एवं समस्तव्युत्पत्तिपर्यालोचनया सर्वत्र व्याप्तः प्रविष्टः सेचकः पृथक्कारकः निबद्धः गन्ता स्तुतः कान्तः स्तम्भकः वृष्णः विष्णुः तैः तैः धातुभिः निष्पन्न ज्ञायते। लक्षणया विष्णुदेव एव अत्र अर्थरूपेण सिध्यति। तद्यथा—विष्णुपुराणे

ज्योतींषि विष्णुर्भुवनानि विष्णुर्गिरयो दिशश्च।
नद्यः समुद्राश्च स एव सर्वं यदस्ति यन्नास्ति च विप्रवर्याः॥

अपि च—भूतात्मा चेन्द्रियात्मा च प्रधानात्मा तथा भवान्।
आत्मा च परमात्मा च त्वमेकः पंचधास्थितः॥

अतएव देवानां देवो विष्णुरेकादशधातु निष्पन्नोऽत्र राजतेतराम्॥

शोधछात्रा
संस्कृतविभागे
मेरठ विश्वविद्यालयः।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

अलंकारशास्त्रे वामनस्य योगदानम्

डॉ० विभारानी दुबे

आचार्यो वामनो रीतिसम्प्रदायस्य प्रवर्त्तको 'रीति' इति शब्दस्य प्रथमप्रयोक्तास्ति। काव्यशास्त्रस्येतिहासे स एव सर्वप्रथम आचार्योऽस्ति यः काव्यस्य आत्मतत्त्वं जिज्ञासते। तस्यानुसारेण शब्दार्थः काव्यस्य शरीरं, रीतिश्चात्मास्ति। वामनमते तु रीतिर्विशिष्टा पदरचना, विशेषस्तु गुणयुक्तत्वम्। अतस्तन्मतेन गुणयुक्तरचना एव काव्यात्मेति पदमधितिष्ठति।

अत्रेदमवधेयं यद् आत्मनः सत्तास्वीकरणेन तस्य वर्णनेन च वामनो देहवादी प्रकटति। तस्य काव्यात्मारीतिः चार्वाकदर्शनस्य देहात्मवादेन सदृशोऽस्ति। यथा प्रत्यक्षवादिन चार्वाका अवयवसंस्थानमेव आत्मा इति स्वीकुर्वन्ति शरीरनाशेन सह आत्मा अपि नश्यति इति आमनन्ति च तथैव वामनोऽपि काव्यं वैदर्भी, गौडी, पाञ्चाली चेति तिसृभिः रीतिभिर्लक्षित प्रतिपादयति। "एतासु तिसृषु रीतिषु रेखास्विव चित्रं काव्यं प्रतिष्ठितमिति।"[1] रेखाभावे यथा चित्रस्य सत्ता नास्ति तथैव रीत्यभावे काव्यमपि नास्ति। वस्तुतश्चित्रेण सह काव्यस्योपमां सम्पधार्य वामनो ध्वनिवादिनां सामीप्यमलभत। यतो न केवलं रेखा एव चित्रम् अपितु चित्रस्य परमा साधिका रेखैव। तथैव काव्याभिव्यञ्जकत्वे परमा-साधिका रीतिरेव, तया एव काव्यं व्यक्तं भवति। अनेन प्रकारेण वामनो ध्वनिमार्गेण स्पृष्टोऽपि स्पष्टरूपेण तस्य सत्तां प्रतिपादयितुमसमर्थोऽभवत्। वस्तुतो रीतिः साधिका अस्ति न तु साध्या, किन्तु वामनेन सा साध्य-रूपेण वर्णितास्ति। वस्तुतो विशिष्टपदरचनाख्याया रीतेरात्मतत्त्व-मङ्गीकृत्यापि वामनाचार्यः शब्दार्थरूपकाव्यशरीर-संघटनामेव रीतिं प्रतिपादयति। एवं स काव्ये देहात्मवादमेव प्रतिष्ठापयामास। अस्मादति-रिक्तमपि वामनस्य महती प्रतिपत्तिर्विशिष्यते।

१. काव्यालङ्कारसूत्रवृत्तौ, १।२।१३ वृत्ति।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderal

आनन्दवर्धनेनापि स्वीकृतं यत् आचार्यवामनो ध्वनितत्त्वं ज्ञात्वापि सम्यक् रूपेण तत् प्रतिपादयितुमसमर्थोऽभवत् ।

अस्फुटस्फुरितं काव्यतत्त्वमेतद्यथोदितम् ।
अशक्नुवद्भिर्व्याकर्तुं रीतयः सम्प्रवर्तिताः ।।

एतद्ध्वनिप्रवर्तनेन निर्णीतं काव्यतत्त्वमस्फुटस्फुरितं सदशक्नुवद्भिः प्रतिपादयितुं वैदर्भी गौडी पाञ्चाली चेति रीतयः प्रवर्तिताः । रीति-लक्षणविधायिनां हि काव्यतत्त्वमेतदस्फुटतया मनाक् स्फुरितमासीदिति लक्ष्यते ।"[१]

आनन्दवर्धनस्येदं वक्तव्यं रीतिसम्प्रदायस्य मौलिकतां महत्तां च स्पष्ट-यति । आत्मना हीनं शरीरं यथा व्यर्थं तथैव रीतिविहीनं काव्यमपि त्याज्यं भवति । काव्ये किं तत्त्वमात्मपदे स्थातुमर्हतीति वामनेनैव पुरस्कृतम् ।

रीतिषु समग्रगुणोपेता वैदर्भीति वामनः प्रकटयति । यथाहि—

अस्पृष्टा दोषमात्राभिः समग्रगुणगुम्फिता ।
विपञ्चीस्वर-सौभाग्या वैदर्भीरीतिरिष्यते ।।[२]

गौडीया रीतिस्तु ओजः कान्तिगुणाभ्यां, पाञ्चाली च माधुर्य-सौकुमार्यगुणाभ्यां लक्षिते । एतासु तिसृषु रीतिषु वैदर्भी एव परमो-पादेया—गुणसाकल्यात्, न पुनरितरे स्तोकगुणत्वात् । "विदर्भादिषु दृष्टत्वात् तत् समाख्या"[३] 'न पुनर्देशैः किञ्चिदुपक्रियते काव्यनाम्'[४] इत्यादि वामनोक्त्या तन्मतेनापि देशविशेषेण सह रीतिविशेषस्य कोऽपि उपकार्योपकारकभावो नास्ति ।

वामनमतेन तु केवलं गौड्यां पाञ्चाल्यां च प्रावीण्येन वैदर्भ्यां काव्य-रचना न निष्पद्यते । न खलु अतत्त्वाभ्यासे तत्त्वस्यसिद्धिर्भवति—'न शणसूत्रवानाभ्यासे त्रसरसूत्रवानवैचित्र्यलाभः ।'[५] वैदर्भीविषये वामनेनेदं

१. ध्वन्यालोके, ३।४७ ।
२. काव्यालङ्कारसूत्रवृत्ति, १।२।११ वृत्तिः ।
३. तत्रैव, १।२।१० ।
४. तत्रैव, १।२।१० वृत्तिः ।
५. तत्रैव, १।२।१८ ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

ख्यापितं—'तासां पूर्वा ग्राह्या गुणसाकल्यात् ।'[1] अनेन सर्गबन्धे तु उत्तमकाव्यत्वं घटितम्, परं मुक्तककाव्ये प्रायः समग्रगुणानां स्थितेरभावादुत्तमत्वं कथमपि न सिध्यति ।

काव्यशास्त्रस्येतिहासे वामनः प्रथम आचार्योऽस्ति येन गुणाः परिभाषिताः । गुणालंकारान् स एव पूर्वतो विभजते । 'काव्यशोभायाः कर्तारो धर्मा गुणाः, तदतिशयहेतवस्त्वलंकाराः ।'[2] रीतीनां विभागो गुणाधीन एव । समग्रगुणोपेतत्वेन वैदर्भी श्रेष्ठा । एवमेव गुणानां प्राधान्यमपि निर्दिश्य, स तदेव शब्दार्थस्य धर्मं इति स्वीकरोति—'ये खलु शब्दार्थयोर्धर्माः काव्यशोभां कुर्वन्ति ते गुणाः ।'[3] नैते गुणा रसाश्रिताः अपि तु रसा एव गुणानाश्रयन्ते--'दीप्तरसत्वं कान्तिः ।'[4] शब्दार्थभेदेन गुणाना विंशति भेदाः सन्ति । नैते गुणाः कल्पनासृष्टाः, यतः सहृदयसंवेद्यत्वं तेषां स्थितेः प्रमाणम्--'नाऽसन्तः संवेद्यत्वात् ।'[5] न सर्वजनहृदयग्राहकत्वेऽपि एते गुणाः भ्रममूलकाः न भवितुमर्हन्ति--'न भ्रान्ता निष्कम्पत्वात्'[6] सर्वत्राहृष्टत्वात् न ते गुणाः पाठधर्माः--'न पाठधर्माः सर्वत्राहृष्टेः ।'[7]

वामनस्य मौलिकोद्भावना तु गुणालंकाराणां भेदनिरूपणेन प्रथिता । गुणरहितानामलंकाराणां स्थितिर्न तु काव्ये शोभां जनयति, न च स्वयमेव भासते--'ओजःप्रसादादीनां तु केवलं काव्यशोभाकरत्वमिति ।'[8] अतएव काव्ये गुणा नित्याः, अलंकाराश्चानित्याः । एवं गुणानामधारो वामनादेव ध्वनिवादिभिरपि गृहीतः। अंशत ऊनत्वाद् वामनस्य सिद्धान्तः पूर्वरूपेण समादृतो नाभूत् ।

---

१. काव्यालङ्कार सूत्रवृत्ति, १।२।१४ ।
२. तत्रैव, ३।१।१–२ ।
३. तत्रैव, ३।१।१ वृत्तिः ।
४. तत्रैव, ३।२।१५ ।
५. तत्रैव, ३।१।२६ ।
६. तत्रैव, ३।१।२७ ।
७. तत्रैव, ३।१।२८ ।
८. तत्रैव, ३।१।१ वृत्तिः ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

वामनमतेन काव्यं अलंकारादेव ग्राह्यम्–'काव्यं ग्राह्यमलंकारात्' ।[१] परमलंकारशब्दस्तेन व्यापकरूपेण प्रयुक्तः । सौन्दर्यमात्रम् अलंकारशब्देन व्यपदिश्यते—'सौन्दर्यमलंकारः'[२] तच्च सौन्दर्यं काव्ये दोषाणां परिहाराद्, गुणालंकाराणामादानेन च प्रकटयति । सौन्दर्यमलंकारः इति कथयित्वा सौन्दर्यस्य यत् व्यापकत्वं तेन निर्दिष्टम्, नैतत् सर्वमाचार्यः कुत्रापि व्याख्यातवान्, मनोनिवेषेण सौन्दर्यंसाधनानि उपमादीनि एव वर्णितानि ।

वामनमतेन काव्ये गुणानां नित्यत्वमलंकाराणामनित्यत्वं च दृष्ट्वा काव्यालंकारसूत्रवृत्तेः कामधेनु-टीकाकारः काव्ये गुणानां समावायस्थितिः, अलंकाराणां तु संयोगस्थितिरित्यमन्यत—"अतो मन्यामहे गुणत्वादोजः प्रभृतीनामात्मनि समवायवृत्या स्थितिरलङ्कारत्वाद्यमकोपमादीनां शरीरे संयोगवृत्या स्थितिरिति ग्रन्थकारस्याभिमतमिति ।"[३] मतमिमुद्भटेन भृशमालोचितम् । उद्भटानुसारेण काव्ये गुणालंकारयोर्न कोऽपि भेदोऽस्ति । तयोः भेदव्यवहारः क्रियते । स गड्डलिकाप्रवाहेणैवाविवेकपूर्ण एव—"समवायवृत्याशौर्यादयः संयोगवृत्या तु हारादय इत्यस्तु गुणालङ्काराणां भेदः, ओजःप्रभृतीनामनुप्रासोपमाचोदीनामपि समवायवृत्त्या स्थितिरिति गड्डलिकाप्रवाहेणैवैषां भेदः' इत्यभिधानमसत् ।"[४]

परं वामनमतेन गुणानां नित्यत्वमलंकाराणां चानित्यत्वमिति कथने अयमेव आशयो यत् गुणरहिते केवलमलंकारयुक्ते काव्ये सौन्दर्यं न विद्यते । गुणन्तु यौवनमिव नित्यं अन्तरंगं च धर्मो विद्यते, अलंकारस्तु वाह्यः, आतिशय्यकारी धर्मोऽस्ति । सौन्दर्यदृष्ट्यालंकारकोटिर्गुणमतिशेते । अत्रेदमवधेयं यदेकत्र यौवनाद् गुणं औपम्यं तस्य अंतरङ्गत्वं स्थापितं तत्रैव तस्य नित्यत्वमपि व्यवहितम् । यतो हि नाम यौवनं न तु सार्वकालिकम् । एवं वामनस्य गुणालङ्कारयोर्मध्ये स्वरूपभेदो न खलु

१. काव्यालङ्कारसूत्रवृत्ति, १।१।१ ।
२. तत्रैव, १।१।२ ।
३. तत्रैव, ३।१।४ कामधेनुटीका, पृ० ८५ ।
४. उद्भटमतं काव्यप्रकाशस्य अष्टम उल्लासे उद्धृतम् ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

परिणामभेदो वर्तते। अनया रीत्या तस्य गुणोऽपि साधनकोट्यामेवाकलनीयो न तु साध्यटौ।

अलङ्कारसम्प्रदायस्य सापेक्षत्वेन रीतिसम्प्रदायोऽग्रे सरति। अलङ्कारसम्प्रदाये रसोऽपि अलङ्कारेषु गण्यते, परं रीतिसम्प्रदाये रसस्यान्तर्भावोऽर्थगुणकान्तौ दृश्यते। सम्भवतो नाट्यं प्रति आकर्षणे नैव रसस्यानिवार्यत्वं गृहीतम्। यतो वामनेन—'सन्दर्भेषु दशरूपकं श्रेयः'[1] इति प्रोक्तम्। यस्मात् तत् दशरूपकं चित्रपटवत् चित्रम्। दशरूपकादेव कथाख्यायिकामहाकाव्यादीनामन्येषामपि काव्यभेदानां क्लृप्तिः कल्पनीया—'ततोऽन्यभेदक्लृप्तिः'[2]। इत्थमिदं स्पष्टं यत् नाट्यशास्त्रं प्रति आकर्षणमेव रसस्यानिवार्यत्वं प्रत्यपि समाकर्षत्, यतः नाट्यशास्त्रस्योद्भावको भरतमुनिः नाट्ये रसस्य स्थितिः परमावश्यिकीत्यमन्यत—'न हि रसादृते कश्चिदर्थः प्रवर्तते'। तथ्यमिदं यत् वामनः रसं स्वीकर्तुमपि तस्य प्रधानतां नेयेष। अस्यां स्थितौ तस्य सिद्धान्तः शब्दार्थं यावदेव संकुचितो बभूव। अनेन हेतुना वामनानन्तरं रीतिसिद्धान्तस्य काव्यात्मत्वेन प्रतिपादका न्यूना एव। तथापि नाचिरं तस्य सिद्धान्तः परवर्ति सिद्धान्तान् वासितवान्। अस्माद्धेतोः ध्वनिवादिनो रीतिसम्प्रदायं कटु आलोच्यापि रीतिसिद्धान्तं संशोधितरूपेण समुपस्थापितवन्तः। ध्वनिवादिभिराचार्यैः रीतिः वैदर्भी गौडी पाञ्चाली चेति नाम्ना न विभक्ता, तैः रसध्वनेर्व्यञ्जनायां पदानां विशिष्टविनियोगो विशेषितः। वामनो रीतिगुणयोरभेदमन्यत, इदमपि तस्य मते चिन्त्यमेवनिर्दिष्टम्। समग्रगुणालंकृता वैदर्भी उत्तमकाव्यस्य निर्दशिका, ओजः कान्तिमती गौडीया तु रससंस्पर्शेन युक्ता, परं माधुर्यसौकुमार्योपपन्ना पाञ्चाली ध्वनिवादिनां चित्रकाव्यस्य समत्वं भजते। रसभावादेः विवक्षाशून्यमुक्तिवैचित्र्ययुक्तञ्च काव्यं चित्रपदमेवावतिष्ठते। ध्वनिवादिनो गुणानां सम्बन्धः रसेन सह मन्यन्ते, न तु रीत्या सह। वामनमतेन गुणाः काव्यशोभायाः कर्तारो धर्माः, अलङ्कारस्तु तदतिशयहेतवः, परं ध्वनिवादिनः गुणान् रसाद् भिन्नं तत्त्वं मन्यन्ते, तेषां मतेनालंकारा न केवलं सौन्दर्यवर्धका अपितु कुत्रचित् सहायाः, कुत्रचिदपरोधकाः, कुत्रचिच्च ताटस्थ्यभावेन काव्ये

---

१. काव्यालंकार सूत्रवृत्तिः, १।३।३०।
२. तत्रैव, १।३।३२।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parmi, Hyderabad

तिष्ठन्ति । वस्तुतो वामनः काव्यस्य वस्तुगतं स्वरूपमेवावर्णयत् । रीतेः किं प्रयोजनं, किं च लक्ष्यं इत्यादि प्रश्नान् न समाहितवान् । ध्वनिकारस्य दृष्टिर्वामनापेक्षया सूक्ष्मतरा आसीत् । अतएव स वामनस्य आत्मभूतां रीतिं साधनरूपेण अंगीकृतवान् । वस्तुतो वामनस्यात्मभूता-रीतिरंगस्थानमेवाधात् तथापि तस्या मौलिकता शाश्वती एव ।

हिन्दूविश्वविद्यालये संस्कृत-विभागे शोधच्छात्रा

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

महाभारते गोप्रतिष्ठा

डा० रामजी उपाध्यायः

गावःकामदुघा देव्यो नान्यत् किंचित्परं स्मृतम् । अनु० ५१.३३

अस्माकमिह देशे भारते गोप्रतिष्ठा पुरा शनैः शनैः समवर्धत । महाभारते तु गौरग्निना ब्राह्मणेन वा समं सम्मानिता । तथा हि—

गावोऽधिकास्तपस्विभ्यो यस्मात्सर्वेभ्य एव च ।
ब्राह्मणैः सहिता यान्ति तस्मात् बरतरं पदम् ।
एकं गोब्राह्मणं तस्मात् प्रवदन्ति मनीषिणः ॥

अनु० ६५.३६,४०

अतएव गौरर्च्या । तथा हि—

अमृतं ब्राह्मणा गाव इत्येतन्त्रयमेकतः ।
तस्माद् गोब्राह्मणं नित्यमर्चयेत यथाविधि ॥ १४८.१६

गोप्रतिष्ठाया मौलिककारणमासीद् तस्याः सोमस्याधिष्ठानता ।
इयं गौश्चतुष्पदेषु वरिष्ठेति सम्मतम्—

सरसां सागरः श्रेष्ठो गौर्वरिष्ठा चतुष्पदाम् ॥ भी ११६.३२
तस्माद् गावो महाभागाः पवित्रं परमुच्यते ।
तथैव सर्वभूतानां गावस्तिष्ठन्ति मूर्धनि ॥

अनु० ७८.७

यज्ञैराप्यायते सोमः स च गोषु प्रतिष्ठितः ।
सर्वे देवाः प्रमोदन्ते पूर्ववृत्तास्ततः प्रजाः ॥ अनु० ७६.१४
गावः प्रतिष्ठा भूतानां तथा गावः परायणम् ।
गावः पुण्याः पवित्राश्च पावनं धर्म एव च ॥ अनु० ८०.१२
धारयन्ति प्रजाश्चैव पयसा हविषा तथा ।
एतासां तनयाश्चापि कृषियोगमुपासते ॥ अनु० ८२.१७
जनयन्ति च धान्यानि बीजानि विविधानि च ।
ततो यज्ञाः प्रवर्तन्ते हव्यं कव्यं च सर्वशः ॥ अनु० ८२.१८

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Pamir, Hyderab

गोमाहात्म्यकीर्तनेन च—

पुत्रार्थी लभते पुत्रं कन्या पतिमवाप्नुयात् ।
धनार्थी लभते वित्तं धर्मार्थी धर्ममाप्नुयात् ॥
विद्यार्थी प्राप्नुयाद् विद्यां सुखार्थी प्राप्नुयात् सुखम् ॥

अनु० ८३.४६ ४७

किमिदं गोमाहात्म्यमिति च्यवनेन सुष्ठु प्रख्यापितम्—

गोभिस्तुल्यं न पश्यामि धनं किञ्चिदिहाच्युत ॥
कीर्तनं श्रवणं दानं दर्शनं चापि पार्थिव ।
गवां प्रशस्यते वीर सर्वपापहरं शिवम् ॥
गावो लक्ष्म्याः सदा मूलं गोषु पाप्मा न विद्यते ।
अन्नमेव सदा गावो देवानां परमं हविः ॥
स्वाहाकारवषट्कारौ गोषु नित्यं प्रतिष्ठितौ ।
गावो यज्ञप्रणेत्र्यो वै तथा यज्ञस्य ता मुखम् ॥
अमृतं ह्यक्षयं दिव्यं क्षरन्ति च वहन्ति च ।
अमृतायतनं चैताः सर्वलोकनमस्कृताः ॥
तेजसा वपुषा चैव गावो वह्निसमा भुवि ।
गावो हि सुमहत्तेजः प्राणिनाञ्च सुखप्रदाः ॥
निविष्टं गोकुलं यत्र श्वासं मुञ्चति निर्भयम् ।
विराजयति तं देशं पाप्मानं चापकर्षति ॥
गावः स्वर्गस्य सोपानं गावः स्वर्गेऽपि पूजिताः ।
गावः कामदुघा देव्यो नान्यत् किञ्चित् परं स्मृतम् ॥

अनु० ५२.२६–३३

महाभारतानुसारेण गावः सन्निकृष्टफलाः, सर्वभूतानां मातरः, सर्वसुखप्रदाः, मङ्गालायतनं च भवन्ति ।[१] गोधनस्य राष्ट्रवर्धनत्वं तदेव व्यनक्ति ।[२]

गवां जीवन-पद्धतिर्गोव्रतिभिः ऋषिभिराचर्यते ।[३]

१. अनु० ६८.६–७ ।

२. विराट ३३.१० ।

३. यत्रतत्रशयो नित्यं येन केनचिदाशितः ।
येन केनचिदाच्छन्नः स गोव्रत इहोच्यते ॥ उ० ९७.१४ ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

गवामुपनिषद्

भीष्मः सौदासाय गवामुपनिषदं प्रोक्तवान्।[1] तदनुसृत्य गावोभूतानां प्रतिष्ठा, महत् स्वस्त्ययनं, सनातनीपुष्टिः, लक्ष्मीमूलं, सततान्नम्, देवानां परमं हविः, यज्ञफलम्, यज्ञप्रतिष्ठा, ऋषिभ्यो होम्यदा भवन्ति। अपरञ्च—

गवां मूत्रपुरीषस्य नोद्विजेत कदाचन।
न चासां मांसमश्नीयाद् गवां व्युष्टिं तथाश्नुते॥
गोमयेन सदा स्नायाद् गोकरीषे च संविशेत्।
गोमत्या विद्यया धेनुं तिलानामभिमन्त्र्य यः।
सरत्नमयी दद्यान्न स शोचेत् कृताकृते॥
गावो मामुपतिष्ठन्तु हेमशृङ्गाः पयोमुचः।
सुरभ्यः सौरभेयाश्च सरितः सागरं यथा॥
गावः पश्यन्तु मां नित्यं गावः पश्याम्यहं सदा।
गावोऽस्माकं वयं तासां यतो गावस्ततो वयम्॥
एवं रात्रौ दिवा चैव समेषु विषमेषु च।
महाभयेषु च नरः कीर्तयन्मुच्यते भयात्॥

अनु० ७७.१६–२४ तः

अन्यच्च—

गावः सर्वभूतानां मूर्धनि तिष्ठन्ति।[2] यतो हि नाम—

गौर्मे माता गौवृषभः पिता मे।
दिवं शर्म जगती मे प्रतिष्ठा॥ अनु० ७५.७

वृषभ-महिमा

वृषभो बभूव शिवस्य ध्वजो वाहनञ्च। तद्यथा—

वृषभञ्च ददौ तस्मै सह ताभिः प्रजापतिः।
प्रसादयामास मनस्तेन रुद्रस्य भारत॥
प्रीतश्चापि महादेवश्चकार वृषभं तदा।
ध्वजं च वाहनञ्चैव तस्मात् स वृषभध्वजः॥

---

१. अनु० ७७.४।
२. तत्रैव ७८.७।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderab

ततो देवैर्महादेवस्तदा पशुपतिः कृतः ।
ईश्वरः स गवां मध्ये वृषाङ्क इति चोच्यते ॥
अनु० ७६. २७-२९

गोमूर्तिप्रदानम्

गोप्रदानेन मरणानन्तरं गोलोकवासो निर्दिष्ट एव महाभारते। ये जना गोप्रदानेऽसमर्थास्ते घृतधेनुम्, तिलधेनुं, जलधेनुं च प्रदाय गोलोके क्रमशः घृतनदीं, क्षीरनदीं, कामप्रवहां नदीं चोपभुञ्जते ।[१]

गोघातक

गोघातः परं पापमिति महाभारते प्रोक्तम्—

विक्रयार्थं हि यो हिंस्याद् भक्षयेद्वा निरङ्कुशः ।
घातयानं हि पुरुषं येऽनुमन्येयुरर्थिनः ॥
घातकः खादको वापि तथा यश्चानुमन्यते ।
यावन्ति तस्या लोमानि तावद्वर्षाणि मज्जति ॥
अनु० ७२.३,४

अन्यत्रापि गोहत्या महापातकमिति प्रतिपादितम् ।m

तथापि राजकीयपाकशालासु गोविकर्त्तारो नियुज्यन्ते स्म ।[२] भीम आत्मानं गोविकर्त्तेति परिचाययति ।

गोमांस-भक्षणं संस्कृत-समाजे निषिद्धं निन्दनीयं च सम्मतम् ।[३]

गवामुपरिस्थापनम्

महाभारतानुसारेण पुरा गावः पशव इति यज्ञे तासामालभनं प्रावर्तत। तद्यथा—

रन्तिदेवस्य यज्ञे ताः पशुत्वेनोपकल्पिताः । अनु० ६५.४१
आलभ्यन्त शतं गावः सहस्राणि च विंशतिः ।
शान्ति० २९.११९

---

१. अनु० ७०,३८-४०;७२.३५
m. शान्ति० १४५.१८;
२. वि० २.७
३. कर्ण० ३०.३०,३२

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

किन्तु ततः परं तासामुपरिष्ठापनं परिगृहीतम् । अत एव
पशुत्वाच्च विनिर्मुक्ताः प्रदानायोपकल्पिताः ।
ता इमा विप्रमुख्येभ्यो यो ददाति महीपते ।
निस्तरेदापदं कृच्छ्रां विषमस्थोऽपि पार्थिव ॥
गवामालभनाद् विरमणं तासां प्रदानमात्रमेव केवलम् ।

अनु० ६५.४२

पुण्यत्माकमिति विधानं भारतीयसंस्कृतौ परकोटिकं प्रगमनं प्रद्योतयति । परतः लोकधारणा बभूव—

न गोभ्यः परमं किंचित् पवित्रं पुरुषर्षभ ॥ अनु० ८२.५

गोदानम्

गोदानममृतदानमिव प्रशस्यम् ।[1] गावो लोकानां प्राणाः, शरणञ्च सन्ति । अत एव गोदानं प्राणदानं शरणदानमेव ।[2] तत्र भीष्मः स्पष्टयति—

दानानामपि सर्वेषां गवां दानं प्रशस्यते ॥ अनु० ८२.३

गवां सौन्दर्यम्

न केवलं पयोऽपि तु सौन्दर्यमपि गवां निरीक्ष्यते स्म । सौन्दर्यानुरूपं नन्दिन्या अधो विधं वर्णनमस्ति—

षडायतां सुपार्श्वोरुं त्रिपृथुं पञ्चसंवृताम् ।
मण्डूकनेत्रां स्वाकारां पीनोधसमनिन्दिताम् ॥
सुवालधिं शङ्कुकर्णां चारुशृङ्गां मनोरमाम् ।
पुष्टायतशिरोग्रीवां विस्मितः सोऽभिवीक्ष्य ताम् ॥

आदि० १६५.१३–१४

गोपालनम्

गोपालने गोसंख्यस्य महत्त्वमासीत् । गोसंख्यः सहदेव आत्मानं निवर्णयति—

---

१. अमृतं वै गवां क्षीरमित्याह त्रिदशाधिपः ।
तस्माद्ददाति यो धेनुममृतं स प्रयच्छति ॥ अनु० ६५.४४

२. अनु० ६५.४७,४८ ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderab

क्षिप्रं हि गावो बहुला भवन्ति
न तासु रोगो भवतीह कश्चित्।
तैस्तैरुपायैर्विदितं मयैतद्—
एतानि शिल्पानि मयि स्थितानि ॥ वि० ९.१२
कतिपय राजकुमारा गोसंख्याने नैपुण्यमवापुः।

गोसेवा-व्रतस्यौदात्त्यं कृष्णस्य गोरक्षणेन स्पष्टमेव प्रतिभाति।[1] तस्य गोविन्द इति नाम गवां वेदनात् सिद्धमेव महाभारते।[2]

गोमती-माहात्म्यम्

गोमती-विद्याया भृशं महत्त्वं महाभारते निगदितम्। तस्या अध्यापनं कथं क्रियेतेति—

गवां मध्ये शुचिर्भूत्वा गोमतीं मनसा जपेत्।
पूताभिरद्भिराचम्य शुचिर्भवति निर्मलः॥
अग्निमध्ये गवां मध्ये ब्राह्मणानां च संसदि।
विद्यावेदव्रतस्नाता ब्राह्मणाः पुण्यकर्मिणः॥
अध्यापयेरञ्छिष्यान् वै गोमतीं यज्ञसम्मिताम्।
त्रिरात्रोपोषितः श्रुत्वा गोमतीं लभते वरम्॥
पुत्रकामश्च लभते पुत्रं धनमथापि च।
पतिकामा च भर्तारं सर्वकामांश्च मानवः॥
अनु० ८०.४०-४३

गो-लक्ष्मी-संवादः

पुरा श्रीः कान्तं वपुः कृत्वा गोमध्यं प्रविवेश। श्रीः गाः प्रत्युवाच—

इच्छामि चापि युष्मासु वस्तुं सर्वासु नित्यदा। अनु० ८२.९

गाः प्रत्यूचुः—

अध्रुवा चलचित्तासि ततस्त्वां वर्जयामहे
श्रिया पुनः पुनः प्रार्थिता गा निर्दिशन्ति स्म—
शकृन्मूत्रे निवसनः पुण्यमेतद्धि नः शुभे॥
अनु० ८२.२३

१. गोवर्धनो धारितश्च गवार्थे भरतर्षभ॥ उ० १२८.४५।
२. गोविन्दो वेदनाद् गवाम्। उ० ६८.१३।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

गोस्तुतिः

महाभारते वसिष्ठेन गोस्तुतिर्निर्दिष्टा ययाह्निकं सर्वं पापं प्रक्षाल्यते। तथा हि—

यया सर्वमिदं व्याप्तं जगत् स्थावरजङ्गमम्।
तां धेनुं शिरसा वन्दे भूतभव्यस्य भारतम्॥

अनु० ७९.१५

घृतक्षीरप्रदा गावो घृतयोन्यो घृतोद्भवाः।
घृतनद्यो घृतावर्तास्ता मे सन्तु सदा गृहे॥
घृतं मे हृदये नित्यं घृतं नाभ्यां प्रतिष्ठितम्।
घृतं सर्वेषु गात्रेषु घृतं मे मनसि स्थितम्॥
गावो ममाग्रतो नित्यं गावः पृष्ठत एव च।
गावो मे सर्वतश्चैव गवां मध्ये वसाम्यहम्॥
इत्याचम्य जपेत् सायं प्रातश्च पुरुषः सदा।
यदह्ना कुरुते पापं तस्मात् स परिमुच्यते॥

अनु० ७७.१–४

गोलोकः

कुत्र वर्तते गोलोकः, कीदृशश्चायं लोकः—तत्र ब्रह्मसुरभिसंवादोऽस्त्रि—

त्रयाणामपि लोकानामुपरिष्टान्निवत्स्यसि।
मत्प्रसादाच्च विख्यातो गोलोकः स भविष्यति॥ अनु०८२.३५

विष्णुलोकवत् गोलोको विराजते। गोदानेन गोलोकवासः सम्भवति। गोलोकस्य रमणीयं स्वरूपमवधेयमेव। तद्यथा—

यत्र वृक्षा मधुफला दिव्यपुष्पफलोपगाः।
पुष्पाणि च सुगन्धीनि दिव्यानि द्विजसत्तम॥
सर्वा मणिमयी भूमिः सूक्ष्मकाञ्चनवालुका।
सर्वत्र सुख-संस्पर्शा निष्पङ्का नीरजा शुभा॥
रक्तोत्पलवनैश्चैव मणिदण्डैर्हिरण्मयैः।
तरुणादित्यसङ्काशैर्भान्ति तत्र जलाशयाः॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderab

महार्हमणिपत्रैश्च काञ्चनप्रभकेसरैः ।
नीलोत्पलविमिश्रैश्च सरोभिर्बहुपङ्कजैः ॥
निर्मलाभिश्च मुक्ताभिर्मणिभिश्च महाधनैः ।
उद्धूतपुलिनास्तत्र जातरूपैश्च निम्नगाः ॥
सौवर्णगिरयस्तत्र मणिरत्नशिलोच्चयाः ।
सर्वरत्नमयैर्भान्ति शृङ्गैश्चारुभिरुच्छ्रितैः ॥
नित्यपुष्पफलास्तत्र नगाः पत्ररथाकुलाः ।
दिव्यगन्धरसैः पुष्पैः फलैश्च भरतर्षभ ॥

अनु० ८०.१८–२६ तः

उपरि विवेचनेन गवां धार्मिक-प्रतिष्ठा प्रत्यक्षमेव। यथा पुरा त्तथाधुनापि गवां धार्मिकदृष्ट्या लोकरक्षणापेक्षया च सातिशयं महत्त्वं विद्यत एव। कौटुम्बिकसदस्या इव गावः वृद्धत्वेऽपि पालनीया भरणीया। वैदेशिकमुद्राप्राप्तये गोमांसस्य गोचर्मणो वा विदेशे स्वदेशे वा विक्रयोपक्रमो शूनासु गवां घातेन महान् विद्रूपो व्यापारः भारतस्य सांस्कृतिकदृष्ट्या परापतनं राष्ट्रस्य विगर्हितामर्थलोलुपतामेवोत्तेजयति। यत्किञ्चित् कस्यचित् पुरुषस्याकरणीयं तत्तु राष्ट्रस्य कृतेऽपि पापमेव। गवां वानराणां वा हत्या केवलं मुद्रायाः प्राप्त्यर्थमेव भारतेऽनुगृहीता। सा मुद्रा राष्ट्रस्य कलङ्कमेवावहतीति विचारकैः साधु सम्बोधनीयम्।

संचालकः
भारतीय-संस्कृति-संस्थानम्
महामनापुरी वाराणसी–५

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

रसगंगाधरवास्तवस्तवः

आचार्य–श्रीमधुसूदनशास्त्री

विदितमेव नो वस्तेषामेषां समेषाम् यत् सर्वं सावधि निश्चितं निरवधिज्ञाख्यमन्तर्महः। अत एव सहस्रसहस्रवर्षं ब्रह्मचर्यमधिवसन्तोपि ऋषयो महर्षयो नाशक्नुवन् इयत्तया ईदृक्तया च तन्महः परिच्छेत्तुम्। महतामपि महान्तो व्याख्यातारश्च स्वाभिप्रायं प्राकट्यकार्षुः यच्छास्त्राणां यथावदर्थग्रहणं न सर्वैः सुशकम्।

इति परितः सम्भाव्य दुरुपदेशकैः प्रतारितान् अतएव दुरुपदेशजलनिधौ नितान्तं विप्लुतान् आलिङ्कारिकराद्धान्तान् समुद्दिधीर्षुर्भक्तजनमानसनिवासा भगवती वाग्देवी पुम्भावमवाप्य गुरुवर–श्रीबालकृष्णमिश्ररूपेण अवातारीत्। अवतीर्णास्ते गुरवस्तत्र तत्र दुर्मतिग्रस्तान् अनयान् समुदमूलयन्। आलंकारिकसमयं प्रत्यतिष्ठिपन्। श्रद्धया आराद्धाः शुश्रुषुभक्तमधीषिषुं मामलंकारादिशास्त्राण्यध्यापिपन् इति प्रमोदपरम्परेयं भूयसां तैर्थिकानाम्।

अध्ययनानेहसि मन्मनसि भावः उदगुर्यत् आलंकारिकनिबन्धान् व्याख्यातृभिरस्पृष्टांशान् क्वचिदपि अनिबन्धान् विवृणुयाम्। तान् गुरुभ्यः पुरस्तात् न्यवेदम्। ते सास्तुङ्कारंनिरकुक्षन् विवृणुस्वेति। ततः समये समये सेवायामुपस्थाय संशयं निःसंशयं दुष्टं निर्दुष्टञ्च कर्त्तुं प्रायतिषम्। एवमत्र मधुसूदन्यां वर्णनाप्यनर्थकेन न भाव्यम्। परम्—

फलैः सुपुष्पैश्च समेधिते वने
पुरीषमेवैष गवेषते किरिः।
तथैव यः स्वाऽऽशठताप्रकाशने
समुद्यतस्तत्र निवेद्यते मया।

महाभारते १३।३७।१२ इति संकेते महाभारतकारः—

आन्वीक्षिकीं तर्कविद्यामनुरक्तो निरर्थिकाम्।
इत्येवं तर्कविद्यां निरर्थिकां मनुते।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderab

अयथार्थानुभवस्त्रिविधः—संशयविपर्ययतर्कभेदात्। गौतमकणादौ स्वयं तर्कमयथार्थानुभवं व्यचाक्षाते। अनिष्टप्रसङ्गस्तर्क इति तद्व्याख्यातारः। ततश्च निरर्थिकाम् अयथार्थानुभवात्मिकाम् तथा अनिष्टप्रसङ्गस्वरूपाञ्च परिभाव्य तां परिपठ्य च आत्मघोषः कश्चित् किमपि आघोषयति चेदाघोषयतु नाम। सर्वे तं शश्शर्घिष्यन्ति। परं मन्मनस्तदा व्यस्मेष्ट यदा महान्तस्तार्किकसार्वभौमाः श्रीकेदारनाथ ओझा महानुभावाः मत्सतीर्थ्या अत्र विवृतौ पास्पर्द्धन्ति।

भोः! विवृतिकार तव विवृतौ मम का स्पर्द्धा। मया तु पञ्चापि पण्डितास्तुच्छीकृताः। श्रूयताम्—

श्रीमथुरानाथः स्थूलदृष्टिः। रसगङ्गाधरटीप्पणे तस्य अनधिकारचेष्टा। पण्डितप्रवरपुरुषोत्तमचतुर्वेदिनस्तथैवानधिकारचेष्टा। श्रीपण्डितवदरीनाथ झामहोदयस्यापि एवमेवानधिकारचेष्टा। श्रीमदनमोहनझा मनीषिणा ग्रन्थस्य दुर्दशैव कृता। श्रीगीरिधरशर्मणोऽपि किं विचारितं श्रीमद्भिः इति मत्कृतप्रश्नमुपेक्ष्य मौनमालम्बन्त पुनर्विचारावसराय न समनह्यन्त। मौनावलम्बनं विचाराय असंनहनमेषां स्वभाववसिद्धम्। हिन्दूविश्वविद्यालये महामनसां मालवीयमहोदयानां तत्त्वावधाने एका तत्त्वगोष्ठी समभवत्। तत्राधुनिकानां पक्षस्तत्त्वानां नवतिः। प्राचीनानां पक्षः पञ्च तानि।

तस्मिन् समये पं० मधुसूदनझा महानुभावैः साकं चतुर्वेदिनस्तद्गोठ्यामागताः। तत्र पं० चिन्नस्वामिप्रभृतिपण्डितैः विचाराय आहूतास्तदापि मौनमालम्बन्त, न च समनह्यन्त। तदा गोष्ठ्यां सर्वैरुद्घुष्टं यद् भवान् केवलं रटितपठितव्याख्यानपटुः न शास्त्रज्ञ इति।

भोः! एतत्तुच्छीकरणं वा अन्यस्तु। विवृतिविषये तु निरर्गलामनार्हन्तीं मुधैवाकार्षुः। कीदृशीति चेत् प्राग्भवतां भूमिकां समूह्य तथा सूनपसार्य पश्चात्तां पोस्फोटयिष्यामि।

अथ भूमिसमूहनम्

नव्यन्यायतत्वचिन्तामणिप्रभृतिग्रन्थानामिति एतस्याः प्रथमं पदम्। अतो नव्यन्यायपदं ग्रन्थशब्देन सापेक्षम्। सापेक्षञ्च असमर्थं भवति। अतो नव्यन्यायपदं तत्त्वचिन्तामणिप्रभृतिशब्देनसमासं नार्हतीति अशुद्धमिदम्।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

पूर्वमीमांसायां शास्त्रदीपिकाभाट्टदोपिकादयः, व्याकरणे शेखरादयश्च तस्यैव निदर्शनानि इति। तस्यैवेत्यस्य कोऽर्थः किं नव्यन्याययुगस्येति। भगवन्तः नास्त्येषु नव्यन्यायस्य अवच्छेदकावच्छिन्नवचसां सञ्चारः। अत्र यद्यपि ग्रन्थानां भाषैव साक्षिणी, तथापि यदि सञ्चारं मन्यते तर्हि, मुखमस्तीति वक्तव्यं दशहस्ता हरीतकी इत्याभाणकवद् ब्रुवन्तु नाम।

पण्डितराजो दीधितिमपि अध्येत। अध्येतेति लङ्रूपम्। लङः प्रयोगः अरुणद् यवनः साकेतम् इति यथा समसामयिकपुरुषव्यसायकथनावसर एव कृतः, तथैव करणीयः। नायं पण्डितराजो भवत्सामयिक इत्यशुद्धम्।

रसगङ्गाधरसरला टीका विजृम्भते इत्यत्र टीकेति स्त्रीलिङ्गान्वितं पदम्। नागोजिभट्टमहोदयानां वैदुष्योपरि आक्षेपाः प्रकाशिताः सन्ति इत्यत्र आक्षेपाः प्रकाशिता इति पुंलिङ्गान्विते वहुचनान्ते च ते। परं (टीका आक्षेपाश्च) इष्टं नाभूद् इति नपुंसकम् एकवचनान्तं पदमन्वया-नर्हमशुद्धम्।

प्राचीनार्वाचीनच्छन्दोभ्यो लोकप्रचलितगीतिच्छन्दौभ्यश्च विर-चितवन्तः इत्यत्र च्छदोम्यः छन्दोभ्यश्च इति पञ्चम्यन्ते पदे अशुद्धे। अत्र च्छन्दोभिरिति तृतीयाविभक्तिर्भवितुमुचिता।

रसगङ्गाधरटीप्पणे इत्यत्र टी इति दीर्घेकारघटितं पदमशुद्धम्। टिप्पणं वा टिप्पणी वा भवति।

व्यर्थानि बहूनि पदानि दोषं विनैव लक्षणे योजनोयानि इति किम् आलंकारिकाणां शैली इत्यत्र दोषं विनैव इत्यस्य लेखने कोऽभिप्रायः। भगवन्! प्रयोजनं विनैवेति लेखनीयम्।

अयोध्या—प्रचलितसंस्कृतं संस्कृतपत्रे संस्कृतं साप्ताहिक संस्कृतपत्रे इति शीर्षकं लेखं संस्कृतपत्रे अयोध्यासञ्चालित साप्ताहिकसंस्कृतं पत्रे इत्येवं निः समन्वितं संस्कृतमितिपदं चतुर्वारं प्रयुक्तं महदशुद्धम्।

ननु भोः! संस्कृतमिति साप्ताहिकस्य संस्कृतपत्रस्य संज्ञा। संज्ञा तु यादृशी भवेत् तादृशी एव लेखनीया व्यवहरणीया च यद्येवं तर्हि राम इति रामचन्द्र इति कृष्ण इति अपि संज्ञा, तर्हि रामः दशरथपुत्राय, रामचन्द्रः कौसलेशपुत्राय कृष्णः वसुदेवपुत्रायेत्याद्यप्येवं वक्तव्यम् कुतः रामाय रामभद्राय रामचन्द्राय वेधसे कृष्णात्परं किमपि तत्वमहं न जाने।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderab

इति प्रयुज्यते ? केदारनाथ ओझा इति संज्ञा ततश्च केदारनाथः ओझाः शास्त्रिणे इति वक्तव्यम्। यदि तथा न वक्तुं शक्यते तर्हि उपर्युक्तं सर्वमशुद्धमेव।

यद्यप्यसौ, तथापि तत्रापि अनधिकारचेष्टा श्रीवदरीनाथझा महोदयेन रचिता, एवमेव तत्रापि अनधिकारचेष्टा उभयत्र तस्येति पदाभावस्ततोऽशुद्धे वाक्ये।

जातित्वसाधकान् अनुमानप्रयोगानित्यत्र मुक्तावलीग्रन्थोक्त समवायिकारणतावच्छेदकतया द्रव्यत्वजातिसिद्धिरितिवत्, ननु द्रव्यत्वजातौ किं मानमितिवच्च जातिसाधकानिति भवितव्यमन्यथा अशुद्धमेव।

अनुमानप्रयोगान् चन्द्रिकायां लाञ्छितां विधातुमिव इत्यत्र चन्द्रिकां लाञ्छिताम् इति वा चन्द्रिकायां तां लांछितामिति वा लेखनीयमन्यथा अशुद्धमेव तत्पदम्।

एवमेव परं कुत्रापि प्रयोगे जातित्वस्य साध्यतेत्यत्रापि तथैवाशुद्धिः अस्तु तदनावश्यकम् इत्यत्र तन्नात्रेति समुचितमन्यथा अशुद्धमेव।

तस्य सुधारो महता श्रमेण सम्भावितमभूत् इत्यत्र सुधारः सम्भावितमिति कोक्तिः। अशुद्धलेखने महान् प्रेमा। यदीयमुपास्थास्यद् नाहमत्र प्रावर्त्यस्यम्। इत्यत्र उपास्थास्याद् इति परस्मैदमशुद्धम्। स्यद् नाहम् इति च स्यन्नाहमित्यस्याभावे अशुद्धमेव। प्रावर्त्यस्यमिति कथं कुतः सिद्ध्येदिति अशुद्धमेवकः किं ब्रूयात् पदे पदे अश्वमेधो महाप्राज्ञानां भवतां विजृम्भते।

यापयत् व्यतीयाय इत्यत्र वक्ता जीवन्नेव स्वयमेव भूतानद्यतनपरोक्षकालिकः संवृत्तः। मतोऽहं किल विललाप इतिवत् भवन्तो वर्त्तन्ति किम्।

मम द्रुतदर्शिता न जाजागार इत्यत्रापि सेवाऽशुद्धिः। इति किं वचः किं लेखश्च भवान्। मन्ये, व्याकरणे व्युत्पत्तिर्नास्ति भवताम्।

भवद्भ्यो रोचेत तदा विलिखतु इति वाक्यं किं समुचितम् ? भवद्भ्य इति वहुवचनान्ते पदं विलिखतु इति एकवचनान्तमुपादीयते। येभ्यः पूर्वमेकवारं समादरार्थे बहुत्वं प्रयुज्यते पुनस्तदर्थं तस्मिन्नेव वाक्यें समादरसंकोचः।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

भूयः श्रमसाध्यमिति भिया नातुष्यत इत्यत्र अतुष्यत इति द्रव्य-संकोचाच्च क्रयणेच्छा नोदेत इत्यत्र च उदेत इत्यात्मनेपदित्वं परस्मैपदिधात्वोः।

अध्ययनेन किमपि समीहितं प्राप्स्यते न वेति संशयो जागर्त्येव इत्यत्र संशयप्रकटनार्थं प्राप्येत इति। लिङ्लकारः प्रयोक्तव्यः। न तु लृट् मन्ये हिन्दीसंस्काराधारेण लिखितम्। एवमेव सर्वत्राशुद्धयोऽहमहमिकया पुरः प्रचरन्ति। इतोऽपि विकरालाऽव्युत्पत्तिरालंकारिकपदार्थनिरूपणे रस-चन्द्रिकायामस्ति, तच्छास्त्रीयसम्प्रदायस्य अनभिज्ञत्वात्। रसचन्द्रिका-विवेचनसमये भावुकेभ्यस्तां समुपहरिष्यामि। सर्वशास्त्रविदपि असाम्प्र-दायिकश्चेन्मूर्खवदुपेक्षणीयः इति शंकराचार्याः शाङ्करभाष्ये प्रोचुः।

असकृदवधानेनापि सावधानाध्ययनमन्तरा कथं ग्रन्थग्रन्थिविमोचनं स्यात्। अत एव भवता सुष्ठूक्तम् आलोचनास्य कठिना गडुभूतत्वाद् विषमग्रन्थिभूतत्वात् इति। अध्ययनमन्तरा ज्ञानं न भवेत्। ज्ञानमन्तरा-लोचना कथं स्यात्? न स्यादित्यर्थः। अतः आलोचनाकरणे काठिन्यमेव।

आलोचनास्य इत्यत्र अस्येति पदेन कस्य ग्रहणम्? कस्य आलोचना मधुसूदन्या आलोचना करणीया चेत्, अस्या इति वक्तव्यम्। पदे-पदे अश्वमेधः।

मूलपाठस्थाने सोपपादनं गुरुभूतत्वादिति। अस्य वाक्यस्य कोऽभि-प्रायः? मूलपाठस्थाने मधुसूदनीकर्त्तृकम् उपपादनसहितं लेखनं गुरुभूत-त्वात् श्रेष्ठत्वात् संग्राह्यमिति किम्? इति चेत्तर्हि भवतो हृदयस्य पवित्रता जागर्ति। अतोऽत्र भवतो दुर्भावनायाः प्राग्रसरता न जातेति मन्ये।

पाठकल्पनमनुचितमिति यदा संशयजागरणेन मधुसूदनी नाधीता। तदा अनधीती भवान् इदमनुचितमिदमुचितमिति कथं जानीयात्।

ग्रन्थसन्दर्भाभिप्रेतानवबोधनिबन्धनम्? इति लिखता मधुसूदन्या ग्रन्थसन्दर्भाभिप्रायो न हि बुद्धस्तर्हि तदनवबोधस्य सङ्केतोऽत्र प्रकृते उक्तपंक्तिलेखनसमये अवश्यं करणीय आसीत् अन्यथा आकाशभाषितमेव। कुत्र कीदृशं कियत् पाठकल्पनं कृतम्। ग्रन्थाभिप्रायः कः कीदृश इति स्थलनिर्देशमन्तरा कथं ज्ञातुं शक्येत? स्थलनिर्देशे तु दत्तोत्तर-त्वं स्यादेव।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderab

प्रथमो भागो मुद्रित इति। द्वितीयभागस्य पाण्डुलिपिः कुत्रचित् सं० वि० विद्यालये इति। तृतीयभागो नाद्यावधि दृष्टिपथं गतः। इति त्रीणि वाक्यानि। अत्रैषां का सङ्गतिः? तृतीयभागः कतमो दृष्टिपथं ना गतः। यद् द्वितीयभागस्य पाण्डुलिपिरेव। यदा स एव न मुद्रितः, तदा तन्मुद्रणमन्तरा तृतीयभागस्य मुद्रणं कथं स्यात्। तदन्तरा तस्य दर्शनमसम्भावि एव। मधुसूदनीयुतस्य तस्यापणेषु हि० वि० विद्यालये प्रेसे च दर्शनं सम्भावितमेव।

मधुसूदनीप्रकाशमित्यत्र मधुसूदन्याः सोपपादमित्यत्राऽकारघटित इकाररहितो दकारः। काव्यत्वज्ञानमिति लिखन्त्या मधुसूदिन्या इत्यत्र इकारघटितोऽकाररहितो दकारो लिखितः। मन्ये भवतः संशयाकुलत्वमधिकम्। तेन व्यामोहो जागरितः।

व्यक्तिविवेकं ध्वन्यालोकं रसगङ्गाधरञ्च मद्गुरोः सकाशादधीयानाः इति। रसगंगाधरस्य आदिमो भागो मम गुरोः सकाशादधीतो लिखितश्च इत्याभ्यां मधुसूदनीनिर्मातुः श्रद्धाराद्धगुरुश्लथीकृतदृढग्रन्थित्वं साम्प्रदायिकत्वञ्च सूच्यते। अतः परं प्रमौदस्थानं सतीर्थानाम्।

तच्च वाक्यं धर्मितावच्छेदकं काव्यत्वज्ञानमिति लिखन्त्या मधुसूदन्या दुरुपयुक्तमिदम् इत्येवं लिखताम् एषां महात्मनां जनकञ्चनां लोकप्रतारणं च पश्यन्तु पाठकप्रवराः। तत्र तु धर्मितावच्छदेकज्ञानविषयः काव्यत्वज्ञानम् इति खनेत्रव्योमनेत्रेऽब्दे प्रथमसंस्करणरूपायां प्रथमं मण्डितायां मधुसूदन्यां पाठः। सादरं साग्रहं निमन्त्र्यन्ते पण्डिताः भवत्सु कोऽपि पश्यतु मधुसूदन्या दुरुपयुक्तं वा सूपयुक्तं वेति।

मधुसूदन्या दुरुपयुक्तमिति, रसनिरूपणे नव्यमते अवच्छादकं दुःष्यन्तत्वमपि अव्यवस्थितं लिखति इति अनिर्वचनीयमेवेति मूलमशुद्धं व्याख्याति इति चेह प्रथमवाक्ये कर्त्री मधुसूदनी। परं लिखतीत्यस्य वाख्यातीत्यस्य कर्त्ता कः चेन्मधुसूदनी तर्हि तस्यास्तृतीयान्ततया लिख्यते व्याख्यायते इति भाव्यम् न तूक्तप्रयोगाभ्याम्। तथा त्वशुद्धिरेव तत्र।

व्यवहारचाञ्चल्यमिव अव्यवस्थितं किमपि लिखति इत्यस्य वाक्यस्य कथं समन्वयः। अत्र लेखनकर्त्ता कः। व्यवहारचाञ्चल्यं कस्योपमानं तेन कस्योपमा क्रियते। प्रकृते कः कथं लिखति इति प्रस्तुतम्। अतः

हिमालयः पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्या इव मानदण्डः

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

इत्यत्र यथा पृथिव्याः मानदण्डस्तोयनिधी वगाह्य तिष्ठति तथा हिमालयस्तौ वगाह्य तिष्ठति इतिवद् व्यवहारचाञ्चल्यं यथा किमप्यव्यवस्थितं लिखति ।, तथा मधुसूदनी किमपि अव्यवस्थितं लिखति इत्यन्वय: किम् । एव हि मधुसूदनीव्यवहारचाञ्चल्ययो लेखनक्रियायां कर्त्तृत्वेन उपमेयोपमानभावं कुर्वन्तो भवन्तो धन्याः ।

अवच्छादकं दुष्यन्तत्वमपि अनिर्वचनीयमेवेति मूलमशुद्धं व्याख्याति इत्यत्र मधुसूदन्या यद् व्याख्यातं तदेवाक्षरशो लिखन्तोऽपि न लज्जन्ते इमे पुस्तके गृहीत्वा पश्यन्तु पाठकमहाभागाः पुस्तके त एव सर्वत्र। विस्तृतेर्मयान्नात्र ताः पङ्क्तयोऽवतार्यन्ते ।

शान्तरसोदाहरणव्याख्यानविषये मूलं ताद्रूप्यावगमाद्रतेरप्रतिपत्तिः इत्यत्र कविनिष्ठाया रतेरप्रतिपत्तिं व्याख्याति । तेन पद्यभावार्थं मूलाभिप्रेतत्वञ्च नावबुध्यते इति स्फुटमेव ।

पाठकाः पश्यन्तु, अस्य ओझामहाशयस्य निर्लज्जत्वम् धाष्टर्यञ्च । पण्डितराजो रसगङ्गाधरमूले शान्तरसोदाहरणं निरूपयन् प्रस्तौति शान्तो यथा—मलयानिलेति । एतदुत्तरं कथयति—इदं पुनर्नोदाहार्यम्–सुरस्रोतस्विन्या इत्यादि ।

अत्र विचारः । प्रश्नः पूर्वपद्यं शान्तरसस्योदाहरणं द्वितीयं न तथेति । तत्र किं विनिगमकम् । उत्तरयति पूर्वस्मिन् पद्ये वक्तुर्ब्रह्मात्मकता, अर्थात् ब्रह्मणा सहाभेदावगमः, तेन वक्तृगताया रतेरप्रतिपत्तिः । अर्थात् प्राधान्येन न ज्ञप्तिः । ततो निर्वेदस्य प्राधान्येन प्रतिपत्तिरतः शान्तरसोदाहरणं तत् । द्वितीयपद्ये तु वक्तृनिष्ठाया रतेः प्राधान्येन प्रतिपत्तिरतो निर्वेदस्य गुणीभूततया न शान्तरसोदाहरणमेतत् ।

तदेतदुच्यते ग्रन्थकारेण—अत्रापि द्वितीयपद्येऽपि यद्यपि स्थायी निर्वेदः प्रतीयते, तथापि कविरतौ गुणीभूत इति न शान्तरसध्वनिव्यपदेशहेतुः । पूर्वपद्ये तु तत्ताद्रूप्यावगमाद्रतेरप्रतिपत्तिरेवातो निर्वेदस्य गुणीभूतत्वाशङ्कैव नोदेति । इति निर्विचिकित्सं व्याख्याति कविनिष्ठाया रतेरिति । उभयोः पद्ययोर्वक्ता पण्डितराज एव । निर्माय नूतनमुदाहरणानुरूपमित्युक्तेः । तेनैव निर्मिते इमे पद्ये अतः स एवात्र कविरिति सर्वं सुस्थम् ।

निपातजन्योपस्थितिप्रयोज्यप्रकारतेत्यत्र अभिनवा मधुसूदनी टीका

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderab

स्वस्वरूपं गोपयितुं यतमाना व्याख्यानप्रगल्भा अपि संकुचिता इति। अत्र सादरं प्रार्थ्यन्ते पण्डिताः पाठकाः। अत्रत्या मधुसूदनी द्रष्टव्या भवद्भिः अयं किं वक्ति इति।

एवं प्रत्यक्षराशुद्धिमयप्रपञ्चां भूमिकां समूह्य रसचन्द्रिकायाः पांसवोऽपसार्यन्ते।

आरम्भे मङ्गलाचरणे गुरुप्रसादादित्यत्र चकोरमनः इति पदमशुद्धम्। उपमानानीति उपमितमिति च सूत्रयोर्नैवमुदाहरणम्। मयूरव्यंसकादयश्चेत्यस्यापि उदाहरणं भवितुं नार्हति। यतो व्यंसको धूर्त्तः। अतो व्यंसकपदवद् गुणवाचकंपदमपेक्ष्यते। मनः पदं द्रव्यवाचकं न तु गुणवाचकम्। अतोऽशुद्धमेवैतत्। पिशुनात्मनां प्रथमग्रासे मक्षिकानिपातः। अग्रे मदीयमतिचुम्बिनीत्यस्य व्याख्याने—तेन तैलधारावदविच्छिन्नचित्सन्ततिर्भक्तिः प्रार्थिता इति। उन्मुग्धानामुच्छृङ्खलानां मते चित्सन्तति ज्ञानं भक्तिः। भोः! सा परानुरक्तिरीश्वरे इत्यनुरागरूपां भक्तिं लक्षयन् शाण्डिल्याचार्यं! भोः! कर्म भक्तिं ज्ञानं च पृथक् पृथगुपदिशन् भगवन्! कृष्ण! भवन्तौ सत्वरमेव पलायेताम्। अन्यथा भवन्तौ प्राध्वंकृत्यायं भवतोः किमपि करिष्यत्येव। अस्य धेकनमनिष्टमेव। हंहो, सम्प्रदायवित्त्वं व्याकरणज्ञानञ्च किमपि ओझा महाशये नास्ति।

अत्रैव प्रधानो वाक्यार्थ इत्यशुद्धम्। प्रधानशब्दस्य महामात्यमात्रार्थं विहाय सर्वत्र क्लीबत्वम्। महामात्यमात्रार्थेऽपि पुंस्त्वम् वोपालितमते नान्येषाम्।

तात्पर्यस्य झटिति अनाकलनात्कुतोऽत्र लक्षणावसरः इत्यत्र मूले अनाकलनादित्यशुद्धं मुद्रापितमोझामहाशयेन। तात्पर्यस्य अनाकलने एव अनुपपत्तावेव लक्षणावकाशः। आकलने कुतोऽत्रावकाशः। अतः आकलनादिति पाठः शुद्धः साम्प्रदायिकानाम्। केवलं परनिन्दनं जानाति, अन्यत् शास्त्रं किमपि नावबुध्यत एष ओझामहाशयः।

अयि पाठकमहानुभावाः, क्षणमवधत्त सम्प्रति रसस्वरूपनिरूपणव्रण उपचर्यंते। अच्छम्। किमुच्यते ओझामहाशयैः-आत्मा (पक्षः) आनन्दस्वरूपः (साध्यः) परमप्रीत्यास्पदत्वात् (हेतुः)। ननु भोः कोऽत्र दृष्टान्तः। नाहं केदारनाथो दृष्टान्तं जानामि। यद्यज्ञास्यम्, तदवश्यमलेखिष्यम्।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

यथा धूमाद् यो वह्निमान् दृश्यते, स पर्वतः तथैव परम, प्रीत्यास्पदत्वाद् य आनन्दस्वरूपः, स आत्मा। एवं हि परमप्रीत्यास्पदत्वाद् ये आनन्दस्वरूपाः पुत्रयुवतिप्रभृतयस्ते सर्वेऽप्यात्मानिः। किं भोः! इयमेव प्रक्रिया वेदान्ते, तर्हि वहूनामात्मनां सद्भावे एकमेवाद्वितीयं ब्रह्म इति श्रुत्यावराक्या गतम्।

यत्रापि दृश्यते प्रीतिस्तत्रसर्वत्र आत्मसम्बन्धादेवजायते इत्यत्र सेति पदस्यच्युतिः। सा जायते इति वाच्यम्। गुणवत्यपि शत्रावात्मीयत्वाभावाद् विद्वेष एव न प्रीतिः। भवदुक्तिरियम्। तत्रोच्यते नायं नियमः।

यतो द्वेष्योऽपि सम्मतः शिष्टस्तस्यार्त्तस्य यथौषधम्। त्याज्यौ दुष्टः प्रियोऽप्यासीदङ्गुलीवोरगक्षता॥

इति कालिदासः अत्र द्वेष्योऽपि शत्रुरपिशिष्टश्चेत् सम्मतः, सम्यङ्मतः इष्टः परमप्रीत्यास्पदम्। एवमात्मसम्बन्धाभावाद्विद्वेष एव न प्रीतिरित्युक्तिः। पराहता प्रियोऽपि परमप्रीत्यास्पदोऽपि, दुष्टश्चेत्याज्योबहिष्कार्यः। विद्वेष्य एव स्त्रीयात्मसम्बन्धवती अङ्गुली उरगदष्टा निःसार्यते बहिः। अत्र अङ्गुल्यात्मसम्बन्धेऽपि कथं पराहता इव त्यज्यते। अभीष्यते दुष्टस्यापि दुर्गुणस्यापि जीवनमित्युक्तिर्भवतः द्वेष्य।

यत्रापि प्रीतिर्दृश्यते तत्र सर्वत्र आत्मसम्बन्धः इति भवदुक्तिः एवञ्च यत्रापि धूमो दृश्यते तत्र सर्वत्र पर्वतसम्बन्धः इत्यपि भवान् वक्तु। भवति तु साध्यनिरूपितव्याप्त्याश्रयो हेतुः। अतो यत्र हेतुस्तत्र साध्यम्। प्रकृते भवदुक्तौ यत्र हेतुस्तत्र पक्षः। यतः प्रीतिर्हेतुस्थानीया आत्मापक्षस्थानीयः सत्यम् तार्किकत्वम् अयथार्थानुभवरूपतर्कविद्यावत्वं भवति वर्त्तते।

अतएव आद्य शङ्कराचार्याः स्वभाष्ये जगदुः बलैशत्ति नास्ति कर्त्ताऽकर्तेति विरुद्धं बहु तर्कयद्भिराकु श्रीकृतः शास्त्रार्थः। तेनार्थनिर्णयो दुर्लभः इति।

यस्य सम्पर्कादन्यत्रानन्दः सोऽवश्यं परमानन्द इति भवदुक्तिः। यस्य धनिकस्य सम्पर्काद् धनप्रदाद् धनप्रदातृत्वरूपसम्बन्धाद् अन्यत्र धनप्रतिगृहीतरि आनन्दः स धनिकोऽके अवश्यं परमानन्द इत्येवार्थः किमेतस्याः। सूर्यादिप्रकाशस्य नेत्रप्रकाशमनुरुध्येव किंचित् प्रकाशता इति भवदुक्तिः। अत्र प्रकाशिता इति वक्तव्यम्। प्रकाशशब्दो भावघञन्तः तत्र तलपि

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderab

भावार्थः प्रत्ययः। उक्तार्थानां प्रयोगाभाव इति नयात् प्रकाशता इति पदमशुद्धम्। अशुद्धिस्तु स्वभावे निविष्टा। एतस्य सूर्यप्रकाशस्थानीयस्य आत्मप्रकाशस्य नेत्रप्रकाशस्थानीयमन्तः करणप्रकाशमनुरुध्येव किंचित्प्रकाशतेत्याशयः किम्। अहो ! वेदान्तप्रक्रिया ओझीया।

परमात्मापि आत्मीय एव परमात्मनि न तु यवनस्य परमात्मनिप्रीतिर्दृश्यते इति भवदुक्तिः। किमनन्ताः परमात्मानः आत्मीयपरमात्मा एकः। यवनस्य परमात्माऽन्यः आंग्लस्य परमात्मा इतरः। किञ्ज्ञः किंलेखः किंवचो भवान्। अथवा को दोषः, भवतां वेदान्तप्रक्रिया एवैतादृशी।

ओ विचारक ! कागजो मदीयः, कलमः स्वीयः। मषी तत्पात्रञ्चात्मीये करसञ्चालनमपि स्वाधीनं ततः कस्त्वं प्रतिरोध्दा योद्धा लिखामि ये भावा उदगुस्तान्। अनभ्यासमित्याङ्गसम्प्रदायविदः शास्त्रज्ञाः।

तद्यथा—स्वोत्पत्तिकालरूपाद्यक्षणविशिष्टो घटो गन्धवान् पृथिवीत्वात्। उत्पन्नविनष्टो घटो गन्धवान् पृथिवीत्वात्। कालो देशो वां गोत्ववान्, गोमत्वात्। पर्वतान्यः पर्वतो दहनान्यदहनवान् धूमान्यधूमवत्वान्। इत्यादि भणामि लिखामि, त्वं कः ?

अहो विलक्षणओझामहाशयस्य चाहः। अत एव अन्धकारवत् परान् अन्यान् श्रेष्ठांश्च आवृणोति। परं विरसास्माद् दुःसाहसात्। प्राज्ञंमन्यमना हठेन आलंकारिकवैयाकरणसत्संप्रदायं विना पठितो भवान् केवलं षष्ठीपंचमीत्यादिविभक्तिज्ञानबलेन अस्मिन् शास्त्रमार्गे मा खेलतु।

अन्यच्च—यत्तु आत्मा आनन्दस्वरूपः इत्युदलेखीत्। तच्छ्रुतिविरुद्धमनुभवविरुद्धञ्च। तद्यथा आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन। आनन्दं ब्रह्मणो रूपं तच्च मोक्षे प्रतिष्ठितम्। स एको ब्रह्मण आनन्दः इत्यादि श्रुतिषु षष्ठीभिः आत्मानन्दयोर्भेदोऽवगम्यते। अतएव रसं ह्येवायं लब्ध्वा आनन्दीभवति इत्यत्र मत्वर्थीयेन प्रत्ययेनापि आत्मानन्दयोर्भेदो बुध्यते। आधाराधेयभावोऽत्र सम्बन्धः। आनन्दं ब्रह्म इत्यत्रापि स मत्वर्थीयान् प्रत्ययेन आनन्दवद्ब्रह्मेत्येवार्थो न तु आनन्दं ब्रह्म। अन्यथा नित्यपुंस्कस्यानन्दशब्दस्य नपुंसकलिङ्गताया अनुपपत्तेः।

किंचानुभवविरुद्धं यथा न मे साम्प्रतं किंचिदपि सुखं दुःखमेव सर्वं-

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

भावेन वर्तते। इत्येवं सुखाभावस्य दुःखानुभवस्य चानुसन्धानात्। आत्मनः कथमानन्दरूपता स्यात् ।

एवं विषयाशुद्धेः प्रत्यक्षराशुद्धिमयप्रपञ्चनाच्च भवतां तत्र भवतां विषये प्रसिद्धमिदम्—

पठिता न गुरोः कस्मादुपनीतवताश्रुतिः ।
न दृष्टानि सुकर्माणि शास्त्राणि च श्रुतानि नो ॥

इति तदेतत्प्रत्यक्षमनुभवामः। पश्यामः। लोकमुखात् शृणुमश्चेति शम् । शुभं लेखकपाठकयोर्भूयात् । हरिः ओम् तत्सत् ।

भदैनी वाराणसी ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

ध्वनिपूर्ववर्त्याचार्याणां रसपरामर्शः

डॉ० विभारानी दुबे

अलंकाराणां बहुलप्रयोगो दोषो नास्ति, यतोऽलंकारेणानुभूतौ सह्र्द्य सम्प्रेषणीयत्वमवाप्यते। काव्येऽतिशयोक्तिं भामहदण्डिप्रभृतिभ्य आरभ्यानन्दवर्धनमम्मटादयः प्रशंसन्ति। अतिशयोक्तेर्विषये मम्मटस्येयं स्पष्टोक्तिरस्ति—"सर्वत्र एवं विधविषयेऽतिशयोक्तिरेव प्राणत्वेनावतिष्ठते। तां विना प्रायेणालंकारत्वायोगात्।"[1] काव्येऽस्या अतिशयोक्त्या आधायकोऽलंकार एव, अतोऽलंकाराणामुपेक्षा कथमपि न सम्भवति। सामान्यरूपेणालंकारेषु सादृश्याभेदाध्यवसायविरोधादयो लौकिकसम्बन्धा दृश्यन्ते। परं काव्यालंकारा लोकादतिशयेन प्रयुज्यन्ते। अन्यथा 'गौरिव गवयः' इत्यादि प्रयोग उपमा स्यात्, 'स्थाणुर्वा पुरुषो वा' इति संदेहस्योदाहरणं भविष्यति। अलंकारस्योपयोगिता शोभावर्धने एव न शोभाप्रसारेण। अतएव आनन्दवर्धनेनापि काव्येऽपृथग्यत्ननिर्वर्त्यानामलंकाराणां स्थितिः स्वीकृता—

'रसाक्षिप्ततया यस्य बन्धः शक्यक्रियो भवेत्।
अपृथग्यत्ननिर्वर्त्यः सोऽलंकारो ध्वनौ मतः॥"

यतो यत्नसाध्यालंकारेषु कवेरभिनिवेशोऽलंकारान् प्रत्येव भवति, अतो रसस्तत्रोपेक्ष्यते। एतादृशं काव्यं सहृदयाह्लादकं न भवति। अनेन आनन्दवर्धनेनालंकाराणां नियोजनं रसस्याङ्गरूपेण निरूपितम्—

'विवक्षा तत्परत्वेन नाङ्गित्वेन कदाचन।
काले च ग्रहणत्यागौ नातिनिर्वहणैषिता॥
निर्व्यूढावपि चाङ्गत्वे यत्नेन प्रत्यवेक्षणं।
रूपकादिरलंकारवर्गस्याङ्गत्वसाधनम्॥

इयं दृष्टिर्ध्वनिपूर्ववर्त्याचार्याणां मध्ये नास्फुरत्। यतस्ते काव्येऽलंकाराणां मुख्या रसानां तु अमुख्या स्थितिरिति मन्यन्ते।

---

१. काव्यप्रकाशः, १०२ सूत्रस्यवृत्तिः।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

रसभावतदाभासभावशान्त्यादिरक्रमः ।
भिन्नो रसाद्यलंकारादलङ्कार्यतया स्थितः ॥'

रसभावरसाभासभावाभासभावोदयभावशान्तिभावसन्धिभावशबल-त्वादीनि ध्वनिवादिभिरुत्तमकाव्यरूपेण निरूपितानि, तान्येव ध्वनिपूर्व-वर्त्याचार्यैं 'रसवद्, प्रेय, ऊर्जस्वि, समाहितम्' इति अलंकारा निरूपिताः सन्ति। यद्यपि रसवदाद्यलंकारा ध्वनिवादिनोऽपि स्वीकुर्वन्ति परं ते तेषां सत्ता तत्रैव मन्यन्ते यत्र रसभावादिरंगरूपेण निरूपितोऽस्ति, तेषां सन्निवेशश्च ते गुणीभूतव्यङ्ग्यमध्ये कुर्वन्ति।

डॉ० शंकरन्-महाभागेन भामहो रसविरोध्याचार्यरूपेण वर्णितः।[1] तस्य मतमप्रमाणीकृत्य रसवदाद्यलंकारान् प्रति गणेशत्र्यम्बकदेशपाण्डे-महोदयेन सम्यग्विवेचितम्—रसस्तावदासीदेव पूर्वतरम्।[2]

अत्रेयं शङ्का भवति यत् यदा भामहस्य रस एवाभीष्टः तदा केन कारणेन तेन वक्रोक्तिरेव सातिशयं वर्णिता ? अत्र देशपाण्डेयेन समा-

1. The attitude of Bhamaha to Rasa theory is distinctly that of an exponent of a rival school of eriticism, and this is clear from the scanty treatment that he accords to it. He who holds that Alamkaras exhaust the chief characte-ristics of poetry naturally brings rasa also under an ala-mkara Rasavat (111.6).

Some Aspects of Literary Criticism in Sanskrit. P. 27.

१. रसव्यवस्था तो पहले ही नाटचशास्त्र में की गयी थी। उसी रसव्यवस्था को उन्होंने काव्यशास्त्र में ले लिया। काव्यशास्त्र में रस व्यवस्था लेने में इन प्राचीन आचार्यों ने उसका अनुवादमात्र किया। ऐसे निकट सम्बन्ध उस समय काव्य और नाटच के थे कि इस तरह केवल अनुवाद मात्र करने से काम चल जाता था। प्राचीन ग्रन्थों में सिद्धानुवाद की इस पद्धति पर ध्यान देने से, उसमें रस चर्चा क्यों नहीं आयी, इस बात का कारण ध्यान में आता है और फिर उन्हें रस का विरोधी सिद्ध करने का प्रसंग आता नहीं, उन ग्रन्थों में रस का अनुवाद किया गया है, इतना देखने मात्र से काम निकलता है।

—भारतीय साहित्यशास्त्र, पृ. ६९।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

हितम्—रसस्तु नाट्याभिनये सम्यगास्वाद्यते। न पुनरन्यविधेषु काव्येषु रसो भवति वक्रोविना।

अत्र नायं संदेहस्य विषयो यत् भामहो रसस्य सत्तां सम्यग्मनुते। यतोऽनेकशास्तेन रसः संकेतितः। महाकाव्यलक्षणप्रसंगे सर्वेषां रसानां प्रयोगं सोऽनुमोदते काव्यालंकारे—

'युक्तं लोकस्वभावेन रसैश्च सकलैः पृथक्।' १.२१

सर्वेषां रसानां वर्णनं तेन रसवदलंकारे समावेशितम्—

'रसवद्दर्शितस्पष्ट-शृङ्गारादिरसं यथा।' ३.६

यत्र शृङ्गारादि रसाः स्फुटरूपेण प्रतीयन्ते स एव रसवदलंकारः। अत्र सर्वे रसा भामहेन शृङ्गारादिरसे सन्निवेशिताः। शृङ्गारातिरिक्तास्तस्य के रसा अभीष्टाः, किं च तेषामभिधानमित्यादि प्रश्नानामुपरमस्तत्र नास्ति। रसवदलंकारस्योदाहरणे श्लोकस्यैकं चरणं भामहेनोद्धृतम्—

'देवी समागमद्धर्ममस्करिण्यतिरोहिता।' ३.६

अस्याः पंक्तेस्तात्पर्यं न स्पष्टम्। इयं पंक्तिः कस्य हृदयमाह्लादयितुं समर्था ? अस्मिन् पद्ये कस्यापि नायिकाया रूपदर्शनवर्णनं स्यात्। तत् किं तन्मात्रेणैव शृङ्गार उद्भवितुमर्हति ? अवधेयमत्रमिदं यत् रसः खलु विभावानुभावव्यभिचारिणः संयोगाद् व्यङ्ग्यः, न तु वाच्यः।[२] अतएव पण्डितराजेन रसविषये विभिन्नं एकादश मतं वर्णयित्वा इदं मतं खण्डितं यद् विभावादिवर्णनमात्रेण रसस्य निष्पत्तिर्न भवति। रसवदलंकारस्य

१. नाट्य का अर्थ है रस। वह अभिनय से युक्त होता है। इसलिए भामह ने नाट्य को 'अभिनेयार्थकाव्य' कहा है। किन्तु सर्गबन्ध आदि काव्य में रस अभिनेय नहीं होता। वह शब्दार्थों के द्वारा प्रतीत होता है।........ शब्दार्थों में रसाभिव्यक्ति का सामर्थ्य निर्माण करने के लिए उन पर वक्रोक्ति का संस्कार होना आवश्यक है। इसी कारण से भामह को काव्य में रस के साथ शब्दार्थ वैचित्र्य की भी अपेक्षा है।

—भारतीय साहित्यशास्त्र, पृ० ७०।

२. रसादिलक्षणस्त्वर्थः स्वप्नेऽपि न वाच्यः। काव्यप्रकाश, पृ० २१७।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

भामहस्योक्तोदाहरणं विभाववर्णनमेवास्ति। अतएव पण्डितराजेनोक्तम्—

'तदेवं पर्यवसितस्त्रिषु मतेषु सूत्रविरोधः। विभावानुभावव्यभिचारिणामेकस्य तु रसान्तरसाधारणतया नियतरसव्यञ्जकतानुपपत्तेः सूत्रे मिलितानामुपादानम्।'[१]

अर्थात् यत्र विभावादिवर्णनादेव रसनिष्पत्तेः कथनं भवति, तत्र सूत्रादेव विरोधो भविष्यति। यदि क्वचिदीदृशं वर्णनं भवति तदा तत्रानुभवादय आक्षेप्तव्याः। परं प्रकृतप्रसंगे आक्षेपस्यापि अवकाशो नास्ति। अतोऽयं श्लोकार्धः कथमपि श्रृङ्गाररसस्योदाहृणं नास्ति। स्वशब्दाभिधानादपि रसस्य प्रतीतिर्न भवितुमर्हति, यथा श्रृङ्गारः, हास्यः करुणादिः कथनेन तद्-तद् रसानामनुभूतिर्न भवति। इदं तथ्यं वक्रोक्तवर्णनप्रसंगे भामहेन दृष्टमेव, यतस्तेन वार्ताया वक्रोक्त्या भेदं कृत्वा स्पष्टीकृतं काव्यालङ्कारे—

न नितान्तादिमात्रेण जायते चारुता गिराम्।
वक्राभिधेयशब्दोक्तिरिष्टा वाचामलंकृतिः॥ १.३६

परं स रससन्दर्भे पूर्णरूपेणेदं तथ्यं विस्मरति। भामहस्येदं ज्ञानमासीत् यद्रसः प्रकरणे रमणीयतां वर्धयति, अर्थं च पूर्वापेक्षया सुलभतया ग्राहयति। इदमेव च पश्चात् कान्तासम्मितोपदेश इति नाम्ना व्यपदिष्टम्। तद्यथा प्रोक्तं काव्यालङ्कारे—

स्वादुकाव्यरसोन्मिश्रं शास्त्रमप्युपयुञ्जते।
प्रथमालीढमधवः पिबन्ति कटुभेषजम्॥ ५.३

अर्थात् मधुना सह कटुकौषधमपि ग्राह्यं भवति, तथैव शास्त्राणां दुर्बोध सिद्धान्तोऽपि रसपेशलतावशेन ग्राह्यो भवति। किन्तु इदं सत्यं यत् रसस्य किं स्वरूपमस्ति, अस्य ज्ञानं भामहादिध्वनिपूर्ववर्त्याचार्याणां नासीत्। रसवदादीनामलंकाराणां लक्षणोदाहरणञ्च अस्य स्पष्टं निदर्शनमस्ति। दण्डिनापि रसविषये किमपि भामहादधिकं नोक्तम्। वामनेन अर्थगुणकान्तौ रसस्यान्तर्भावः कृतः परं तेनापि रसस्याभिव्यञ्जनापक्षे न विवेचितम्। उद्भटेन यद्यपि रसवदलंकाराणां परिष्कृतं

१. रसगंगाधर, पृ० १५१–५२।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

स्वरूपं वर्णितं तथापि तेन स्ववाचकशब्देष्वपि रसस्य सत्ता अभिमता काव्यालङ्कारसारसंग्रहे—

रसवद्दर्शितस्पष्ट-शृङ्गारादिरसादयम् ।
स्वशब्दस्थायिसंचारीविभावाभिनयास्पदम् ॥ ४.३

ध्वनिपूर्ववर्त्याचार्या रसान् रसवदाद्यलंकारेषु गणयित्वा रसायालंकारादधिकं महत्त्वं न ददुः। अन्यत्र ध्वनिवादिनो रसस्यापूर्वामाह्लादकतां दृष्ट्वा, रसध्वनिमेवोत्तमकाव्यरूपेण स्वीकुर्वन्ति, रसमेव अलंकार्यकोटौ च परिगणयन्ति।

रसवदलंकाराणां विषये प्रो० हिरियन्ना-महोदयस्य समालोचना अवधेयाम्। अस्मिन् विषये तेन प्रोक्तम् ध्वनिपूर्ववर्त्याचार्याणां रसवदाद्यलंकाराणामुदाहरणं दृष्ट्वा इदमेव प्रतीयते, यत् तेषां दृष्ट्या रसो वाच्य एवास्ति। स्पष्टीकरणार्थं तेन 'अभिज्ञानशाकुन्तलस्य' अयं श्लोक उद्धृतः —

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्द्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम्।
शष्पैरर्द्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा,
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥ १.७

अस्मिन् श्लोके भीतमृगशावको वर्णितः, येन भयानकरसस्योद्भूतिः भवति। अत्र न कोऽपि शब्दो भयस्याभिधायकः परं मृगशावकस्य चेष्टानामीदृशं वर्णनमस्ति येनेदं प्रतिभाति यत् स भीतोऽस्ति। अयमेव रसस्य व्यङ्ग्यत्वम्।

यदि रसो वाच्यो नास्ति तदा रसगतानुभूतिरर्थापत्तिगम्या भविष्यतीत्यपि नावधारणीयम्। अर्थापत्त्याऽपि तथ्यस्य यावगतिर्भवति सा वर्णनात्मिका वस्तुगता च स्यात्, न भावगता। अतो रसस्तु सर्वास्वप्यवस्थासु व्यङ्ग्य एव स्वीकर्तुं योग्यः।

Hence we may conclude that, in neither case, can Rasa be classed under Alamkara. If the Rasavadalamkara is held to be Vacya, it will not yield the intended experience but only presents its objective accompaniments, if on the other

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

hand, it is taken to be Arthapattigamya, the experience to which it leads wlll be very far from what it meant by Rasa.[१]

अनेन प्रकारेणेदं स्पष्टं प्रतिभाति यद्ध्वनिपूर्ववर्त्याचार्यैं रसवदलङ्कारेषु परिगणय्य न केवलं रसस्य महत्त्वं न्यूनीकृतं प्रत्युत तेषां वर्णनमिदं परिचाययति यद्रसगतानुभूतिः कथमभिव्यज्यते, इति तथ्यं तैर्विज्ञातं नासीत्। ध्वनिवादिनां मौलिकोपलब्धिर्व्यञ्जनाव्यापार एव, येन रसगतानुभूतिरभिव्यक्तिपथेऽवतरति। वस्तुतोऽभिधया प्रतीयमानोऽर्थं एव न मुख्यः प्रतिपाद्यः कवेर्भवति। प्रत्युत व्यज्यमानार्थ एवाभिप्रेतार्थो भवति। स ध्वनिकारेण प्रतीयमान इति व्याख्यातः। अतएव मम्मटेनोक्तम्—'न खलु विभावानुभावव्यभिचारिण एव रसः, अपितु रसस्तैरित्यस्ति' क्रमः।

इत्थं डॉ० देशपाण्डे-महोदयस्य इदं कथनं युक्तियुक्तं यद् ध्वनिपूर्ववर्त्याचार्या रसं विजानन्ति स्म। अपरञ्च यद् भारतस्य रसविवेचनमेवाधिकृत्य पुनरावृत्तिदोषं परिहतुं 'रसवद्' इति कथयित्वाध्याहारः कृतः, इति देशपाण्डे-मतं न समीचीनम्। यतो भामहादीनां रसवदलंकारस्यावधारणाया भरतस्य रसनिरूपणं नितान्तं पार्थक्यं भजते। इदञ्चोक्तविवेचनाद् स्पष्टमस्ति।

साकेत नगर
वाराणसी

१. Art Experience, p. 67

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

चरित्र-परिरक्षणम्

रामलखनपाण्डेयः

समग्रस्यापि संसारस्य चारित्रिकं यद्भवति स्वरूपं तदधुना निरन्तरं विलुप्यते । चरित्रस्योद्भावयिता शिक्षयिता चास्माकं देशस्तत्र सर्वाधिकं चिन्तास्पदं वर्तते । मनोरियं घोषणा कियती न शोचनामवतारयति—

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥

तदेते भारतस्याग्रजन्मानः स्वकीयाचारेण किमधुना शिक्षयन्ति जगतीतलं तदवाच्यमेव तिष्ठतु । ततश्च परं का वार्ता स्यादत्र विषये परापेक्षिणामन्येषामिति भवतु नाम । किन्तु सन्त्येव साम्प्रतमपि चरित्रचिन्तनपरास्तथाविधाश्चिन्तकप्रवराश्चरित्रभ्रंशमवरोद्धुमाबद्धपरिकराः । विचिन्त्यन्ते बहुभिरपि स्वमतिभिर्नीतिमद्भिर्नानोपायास्तन्निराकरणाय प्रयासाश्चानुष्ठीयन्ते । साक्षिभूताश्चरित्राचरणमात्रपूताश्चाचार्यास्तत्र निर्दिशन्ति चारित्रिकं स्वरूपं तत्प्रतिष्ठापनविधानं तद्गतं माहात्म्यं च प्रकटयन्ति ।

भारतमेवास्ति चरित्रस्य जनयिता देशः । सर्वं दुःखमयं जगदिति भारतीयमहर्षयश्चरित्रनिर्माणद्वारेण लोकस्य शोकमपाकर्तुं पुरानिरन्तरं प्रायतन्त । शास्त्रोक्तप्रकारेण चरित्रं नाम जीवनस्य सर्वोत्तमं विधानमस्ति । तदाश्रिते सति कुतो मोहः क्व वा शोकः ।

भारतस्यास्ति सनातनो धर्मः । तस्मादत्र विनाशशीलमपि जीवनं सनातनतया जीवितुं युज्यते । अथ कर्माधीनत्वादेव जीवनं विनश्यतीति सर्वं कर्म चरित्ररूपेण परिणमय्य सनातनं क्रियते । चरित्रं भगवतः स्वभावस्वरूपादनादिकालतश्चरितमेव तिष्ठत्यनन्तकालपर्यन्तं चापि चरितमेव स्थास्यति । तस्मादिदानीमपि मद्द्वारेण यदस्ति चर्यमाणं तदपि तदेव चरित्रमिति । तदेवं यथा यथा कर्मगतं जीवनं चरित्रद्वारेण सनातनं क्रियते तथा तथा तद्गतो जीवोऽपि स्वात्मनः सनातनं स्वरूपमधिकुरुते ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

अस्माकं वेदादिशास्त्रेषु चरित्रनिर्मापकाणां तत्त्वानां बाहुल्यं वर्तते। वेदस्य द्रष्टारो महर्षयश्चरित्रद्वारेण स्वजीवनममृतमयं कुर्वन्तो लोकस्याभ्युदयायापि चरित्रनिर्माणकरं मार्गं बहुधा प्रास्तुन्वन्त यथा—

न ऋते श्रान्तस्य सख्याय देवाः ॥ ऋ. ४.३३.११ ॥
सत्यं ततान सूर्यः ॥ ऋ. १.१०५.१२ ॥
मधु नक्तमुतोषसो मधुमत् पार्थिवं रजः ।
मधु द्यौरस्तु नः पिता ॥ ऋ. १.९०.७ ॥
माता पृथिवी महीयम् ॥ ऋ. १.१६४.३३ ॥
विश्वं तद् भद्रं यदवन्ति देवाः ॥ ऋ. २.१४.१६ ॥
मा नो मर्तस्य दुर्मतिः परिष्ठात् ॥ ऋ. ३.१५६ ॥
निन्दितारो निन्द्यासो भवन्तु ॥ ऋ. ८.६७.७ ॥
अस्ति रत्नमनागसम् ॥ ऋ. ८.६७.७ ॥
सत्येनोत्तभिता भूमिः ॥ ऋ. १०.८५.१ ॥
मोघमन्नं विन्दते अप्रचेताः ।
केवलाघो भवति केवलादी ॥ ऋ. १०.११७.६ ॥
संगच्छध्वं सं वदध्वं ॥
सं वो मनांसि जानताम् ॥ ऋ. १०.१९१.२ ॥

ऋषीणां परम्परायामत्र परवर्तियुगे चरित्रनिर्मातारो महामानवाः समभूवन् । गौतमबुद्धो महावीरश्च तत्र प्राथमिकौ प्रमुखौ चापि । तौ जीवनपर्यन्तं जनतासु विहरन्तौ जनांश्चरित्रपथे प्रावर्तयताम् । महिमान्विता तयोर्वाणी भारतस्य यशःपताकेव सुदूरमपि विललास । तत्र बुद्धस्य धम्मपदगता चरित्रनिर्भरा वाणी यथा—

न हि वेरेन वेरानि सम्मन्तीध कुदाचन ।
अवेरेन च सम्मन्ति एस धम्मो सनन्तनो ॥
न परेसं विलोमानि न परेसं कताकतं ।
अत्तनोव अवेक्खेय्य कतानि अकतानि च ॥
न भजे पापके मित्ते न भजे पुरिसाधमे ।
भजेथ मित्ते कल्याणे भजेथ पुरिसुत्तमे ॥
सब्बे तसन्ति दण्डस्स सब्बेसं जीवितं पियं ।
अत्तानं उपमं कत्वा न हनेय्य न घातये ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

सुकरानि असाधूनि अत्तनो अहितानि च ।
यं वै हितं च साधुं च तं वे परमदुक्करं ॥

अस्यैव महात्मनो बुद्धस्य पथप्रदर्शनेन प्रभावितः सम्राडशोकः सम्पूर्णामपि स्वप्रजां सच्चरित्रां कर्तुं शिलालेखान् व्यटंकयत्। तेषां सारांशोऽत्र दीयते—

मातापित्रोः शुश्रूषा मित्र-संस्तुतज्ञातीनां च ब्राह्मणश्रमणानां च साधुदानम् । प्राणानामनालम्भः साधुः । अल्पव्ययता अल्पभाण्डता साधुः । कर्तव्यं मतं हि मे सर्वलोकहितम् । संयमो भावशुद्धिः कृतज्ञता दृढभक्तिता च नित्या बाढम् । ततः एषा दासभृतके सम्यक् प्रतिपत्तिः, सारवृद्धिर्नामबहुविघातस्य त्विदं मूलं यद् वचोगुप्तिः । सर्वा च निरतिर्भवतु या उद्यमरतिः । सा हि ऐहलौकिकीपारलौकिकी । प्रणयं गच्छेम सुमनुष्याणाम् । सर्वे मनुष्याः प्रजा मम ।

प्राचीनकालादारभ्य विंशशताब्द्या मध्यावधिकं यावदत्रत्यवाङ्मयें वैदिकसाहित्यस्यादर्शाः पल्लविता रामादिवद्वर्तितव्यं न रावणादिवदिति। वाल्मीकिः, व्यासः, अश्वघोषः, भासः, कालिदासः, भारविः, भवभूतिश्चेत्यादिसंस्कृतकवयः कबीर-सूर-तुलसी-मीरा-केशवदास-भारतेन्दु-जयशंकर-प्रसाद-सुमित्रानन्दपन्तप्रभृतयश्च हिन्दीकवयः सनातनोद्देश्यदृशैव स्वकाव्येषु प्रायतन्त। युगे तस्मिन् भारतस्यान्योपभाषास्वपि तादृक्कवीनामभावो नाभूत् । ज्ञानेश्वरस्य, विद्यापतेः, रवीन्द्रनाथस्य च काव्यानि दृशानया महनीयानि सन्ति ।

कवीनामिव देशेऽस्मिन्नाचार्याणामपि महिमान्विता परम्परा विलसति । चरित्र-संरक्षणे चैतेषां महती चेष्टा बभूव । जैनबौद्धसंप्रदायगतास्तीर्थंकरा गणधराश्च जनतासु चारित्रिकं जीवनं स्वाचरणेन शिक्षणेन च निरन्तरं प्रसारयन्ति स्म । शंकराचार्यः स्वाद्भुतप्रभयाद्वैतप्रकाशं दिग्दिगन्तं विकीर्य भारतीयचरित्रं समुज्वलमकरोत् । परवर्तियुगीनोऽप्याचार्या देशममुं विपथादरक्षन् । तत्र रामानुजः, निम्बार्कः, मध्वः, बल्लभः, रामानन्दः, चैतन्यश्चेति प्रामुख्यं भजन्ति ।

आचार्याणामिव भक्तानां, गुरूणां, परमहंसानां, गोस्वामिनां, स्वामिनां संताख्य-साधूनां च चरित्रनिर्माणकरोपदेशाः तेषां जीवनगतानि च परमादरणीयानि सन्ति। तत्र ज्ञानेश्वरः, समर्थगुरुरामदासः, गुरुगोविन्दः,

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

रामकृष्णः, विवेकानन्दः, रामतीर्थः, दयानन्दः, महात्मागांधी, अरविन्दश्च चरित्रनिर्माण-पथे दीपका इव प्रभासन्ते ।

तथाप्तपुरुषपवित्रितोऽप्यसौ देशः सम्प्रति नूनं दुराचरणगर्ते कथमिव निपतति । दुश्चारित्र्येण जीवन्तो जना दुःखादुःखतरं भजन्ते । हा घ्नन्ति स्वयं स्वात्मानम् । आध्यात्मिकीं जीवनपद्धतिमुत्सृज्य नित्यमाधिभौतिकेन हेयातिहेयेन मार्गेण सर्वतोऽपि यान्त्रिकतामुपगतानामस्माकं पररूपमप्यस्तीति न ते विचिन्वन्ति । तपोमयीं साधनागतां वानन्दानुभूतिं विस्मृत्य मोघमैन्द्रियकसुखं कांक्षन्तो भारतीयाः स्वजीवनं भारमिवावहन्ति । आधुनिककवीनां वाचि पूर्वदिशा सन्देशगन्धोऽपि नास्ति । धर्माधिकारिणो मठाधीश्वरा विधर्माधिव्याधिमपाकर्तुं नोत्सहन्ते । मदिरविलासप्रवणाः शासननेतारो न सन्ति सच्चारित्र्यपरायणाः ।

कियन्तं कालं यावदयं देशो नोद्बोधमेष्यति ? कदा चात्रत्याः स्वसंस्कृतिं प्रति श्रद्दधानास्स्वचरित्रमुत्तमदिशि प्रवर्तयिष्यन्ति ? उद्युज्यमानाश्चरित्रचिन्तकाः संघटनरूपेणापि राष्ट्रियं मारकेशमिदमपाकर्तुं न पारयन्ति ।

तथापि लोकप्रकृतिर्नेमां चारित्रिकदुस्थितिं शाश्वतं सोढुं क्षमते । तामेव समाश्रयमाणः अचिरमेव कश्चिद् भगवत्स्वरूपोऽमानवीयमलौकिकं च पराक्रमं प्रकटयिष्यन्नार्यचरितं भारते विधास्यतीति विश्वसिमः ।

शोधच्छात्रः
सागर-विश्वविद्यालये
सागर (म. प्र.)

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

"विष्णुधर्मोत्तरे महाकाव्यलक्षणम्"

परमानन्दमिश्रः

विष्णुधर्मोत्तरे महाकाव्यलक्षणम्—

धर्मार्थकाममोक्षाणां शास्त्रं स्यादुपदेशकम् ।
पूर्वैराचरितं सद्भिर्धर्मकामार्थसाधकम् ॥
मोक्षस्य यत्रोपन्यास इतिहासः स उच्यते ।
तदेव काव्यमित्युक्तं चोपदेशविनाकृतम् ॥
एकस्य चरितादेव तथा काव्यं प्रकीर्तितम् ।
निबद्धौ यत्र राजेन्द्र नायकप्रतिनायकौ ॥
प्रयाणोद्यतसंप्रेषयुद्धयुक्तं तदेव तु ।
नायकाभ्युदयोपेतं महाकाव्यं तदिष्यते ॥
वर्णयेच्च महाकाव्ये देशपत्तनपार्थिवान् ।
ऋत्वद्रिनिम्नागाश्चैव तथा नारीश्च पार्थिव ॥
वर्णनीयौ तथैवात्र नायकप्रतिनायकौ ।
नायको धर्मविजयी सतां पन्थानमाश्रितः ॥
तथा च लोकविजयी विज्ञेयः प्रतिनायकः ।
प्रतिनायकघातस्तु वक्तव्यो नेतरस्य तु ॥
नायकस्य महाराज मरणं नैव वर्णयेत् ।
सशरीरस्य यस्य स्यात् स्वः प्राप्तिं तस्य वर्णयेत् ॥
छन्दोविरहितं गद्यं शब्दशास्त्रविरोधि च ।
कष्टाक्षरपदन्यासमश्लीलवचनान्वितम् ॥
तस्माद्दुर्लक्ष्यवाक्यार्थमप्रसिद्धाभिधायकम् ।
काव्यबन्धं न कुर्याद् वै पुनरुक्तं च यद्भवेत् ॥
विस्मये चाभ्यसूयायां भयशोकत्वरासु च ।
हर्षे च वीप्सा कर्तव्या पुनरुक्तं न तद्विदुः ॥
दूतवाक्ये तथा स्वप्ने कार्यगत्या तथागते ।
पुनर्वचननिर्देशे पुनरुक्तं च [न] तद्विदुः ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

ससंशयं न वक्तव्यं प्रतिज्ञारहितं तथा।
पूर्वापरविरुद्धं च यच्च लोकविगर्हितम्॥
शृङ्गारहास्यकरुणा रौद्रवीरभयानकैः।
बीभत्साद्भुतशान्ताख्यैः रसैः कार्यंसमन्वितम्॥
काव्यं कलाकौशलसंप्रयुक्तं धर्मेण चार्थेन तथोपपन्नम्।
धर्मेण युक्तस्य च नायकस्य कार्यं तथा चाभ्युदयान्तमेव॥

—विष्णुधर्मोत्तरे–३.१५.१-१५

लक्षणेऽस्मिन् काव्यमहाकाव्ययोर्भेदः प्रतिपादितः। यत्र केवलमेकस्य चरितमुपवर्ण्यते तत् काव्यम्, यत्र च नायकप्रतिनायकौ स्याताम्, तयोर्युद्धादिकमन्ते च नायकस्याभ्युदयः स्यात्तत्तु महाकाव्यमुच्यते। एतन्मतेनाश्वघोषस्य सौन्दरनन्दमहाकाव्यं काव्यत्वमधिगच्छति, यतस्तत्र नास्ति कश्चित् प्रतिनायकः। भामहाचार्येण महाकाव्ये चतुर्वर्गवर्णनसत्त्वेऽपि भूयसार्थोपदेशो भवेदिति प्रतिपादितं परमत्र धर्मस्यैव प्राधान्यमभिमतम्[1] नायकस्य विजयोऽपि धर्माश्रितो भवेत्। विष्णुधर्मोत्तरमतेन प्रतिनायको लोकविजयिरूपेण वर्णनीयः रुद्रटाचार्योऽपि प्रतिनायकस्य कुलवीर्यादिगुणवर्णनं स्वीकरोति।[2] प्रतिनायकस्य वधो वर्णनीयः किन्तु नायकस्य मरणं कथमपि न वर्णयेत्। रामायणशिशुपालवधहयग्रीववधप्रभृतिकाव्येषु प्रतिनायकवधो वर्णितः विष्णुधर्मोत्तरे नायकस्य सशरीरस्वर्गप्राप्तिवर्णनमपि प्रतिपादितम्। अलङ्कारस्यात्र चर्चा नास्ति परं महाकाव्ये सर्वे रसा भवेयुरिति वर्णितम्। महाकाव्ये वर्ण्यविषया अधोलिखिताः प्रमाणिताः—

सैन्यप्रयाणम्, आक्रमणम्, युद्धम्, प्रदेशाः, नगरम्, नृपाः, ऋतवः, पर्वताः, नद्यः, नार्यश्चेति। महाकाव्यस्य रचना छन्दोयुतैव भवेत्। काव्यबन्धे त्याज्या दोषाऽपि परिगणिताः, यैः संस्कृतकाव्यशास्त्रे काव्यदोषविवेचनस्यैतिह्यं प्रकटयति।

विष्णुधर्मोत्तरस्य महाकाव्यलक्षणेन कतिपयमहत्त्वपूर्णतथ्यानि प्रकटयन्ति। तद्यथा—

(१) सर्वैराचार्यैः सर्गबन्धो महाकाव्यमिति प्रतिपादितम्, किन्तु

१. काव्यलङ्कार–१.२१।
२. रुद्रटः का० लं० १६.२०।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

विष्णुधर्मोत्तरे महाकाव्यस्य सर्गबन्ध इति नाम नो वर्तते। परवर्त्तिनां परिकल्पनेयम् ।

(२) यन्नायकस्य सशरीरस्वर्गप्राप्तिवर्णनमुक्तं तत्तु रामायणमहाभारतयोरेव प्रभावः परिलक्ष्यते यतो रामायणे रामस्य महाभारते च युधिष्ठिरस्य सशरीरस्वर्गप्राप्तिर्वर्णिता ।

(३) प्रतिनायको लोकविजयी भवेदिति कथनेन रामायणस्य प्रतिनायको रावण उपलक्ष्यते ।

एवमुपर्युक्तविवेचनेन प्रतीयते यद् विष्णुधर्मोत्तरस्य महाकाव्यलक्षणं संस्कृतकाव्यशास्त्रेऽऽद्यत्वं भजते। एतेन च विष्णुधर्मोत्तरस्य काव्यशास्त्रीयभागस्यापि दण्डिभामहप्रभृतिभ्यः प्राग्वर्तित्वमनुमीयते ।

सागर-विश्वविद्यालये
संस्कृत-शोधच्छात्र।

Sanskrit Academy, Hyderabad Collection: c/o Hon. Dir. Shri Madhusudan Penna

In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

आग्नेयकाव्यलक्षणस्य वैशिष्ट्यं परवर्तिकाव्यशास्त्रेषु तस्य प्रभावश्च

डॉ० (श्रीमती) उषा द्विवेदी

आग्नेयालङ्कारस्यानुशीलनेन इदं सुस्पष्टं भवति यत् भरतोक्तपरम्पराया एव पोषणमग्निपुराणेऽप्यस्ति। परन्तु नाट्यशास्त्रादपि वैशिष्ट्यमग्निपुराणेऽवलोक्यते येनेयं धारणा बलवती भवति यदग्निपुराणे काव्यशास्त्रस्य तस्या लुप्तपरम्पराया प्रतिफलनमस्ति यस्या विकासो नाट्यशास्त्रेऽस्ति। अग्निपुराणे समुपवर्णितकाव्यलक्षणस्य संक्षिप्तपर्यालोचनेन परवर्तिषु काव्यशास्त्रकारेषु तत्प्रभावनिर्धारणेन च इदं स्पष्टं यत् सूत्ररूपेणाग्निपुराणे ये विषया उट्टङ्कितास्तेषामेवोपवृंहणमुत्तरवर्तिषु भाष्यभूतेषु बृहत्कायेषु काव्यशास्त्रेष्वभूत्।

अग्निपुराणस्य काव्यशास्त्रभागस्य प्रारम्भोऽग्नेस्तत्प्रतिज्ञया भवति यस्यां सोऽग्निर्वक्तियंद् 'अहं काव्यस्य नाटकादेश्च लक्षणानां वर्णनं करोमि'। एतदनन्तरं वाङ्मयस्य चतुर्णां भागानां ध्वनिर्वर्णपदवाक्यानां वर्णनं सूत्ररूपमस्ति। काव्यशास्त्रे एतत्पूर्वं कस्मिन्नपि ग्रन्थे वाङ्मयस्येतादृशं वर्णनं नास्ति।[१] परवर्तिग्रन्थकारेषु भोजराजेनाग्निपुराणस्येयेमानुपूर्वी अविकलमुद्धृता।[२] अग्निपुराणे वर्णितस्य शास्त्रेतिहासकाव्यानां भेदस्यापि प्राप्तिरन्यत्रनास्ति। इयं नवकल्पना यच्छास्त्रेषु शब्दानां इतिहासपुराणेष्वर्थानां प्राधान्यं भवति तावुभावपि वाच्यार्थप्रधानौ, अतः काव्यं ताभ्यां विभिद्यते व्यंग्यार्थप्राधान्यात्, अनया नवोद्भावित कल्पन

१. "This enumeration of the fourfold phase of speech is not traceable un any of the extant works on poetics" S. M. Bhattacharya : The Alamkara Section of the Agnipurana, 1976, P 2.

२. ध्वनिर्वर्णाः पदं वाक्यम्'—सरस्वतीकण्ठाभरण १.१।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

येव राजशेखरेणापि 'वाङ्मयमुभययो, शास्त्रं काव्यं चेति' इत्युक्तम्।[१] एतदतिरिक्तं भोजराजेणापि अग्निपुराणप्रभावेणैव वाङ्मयस्यापौरुषेयार्षंपौरुषेयभेदाः कृताः।[२]

एकस्मिन् श्लोके, यो भट्टनायकीय इत्यभिनवगुप्तोक्तम्, प्रोक्तं यत् भट्टनायकेनाग्निपुराणोक्त एव वाङ्मयविभाग उद्धृतः। स च श्लोकोऽधुनाऽप्राप्ते 'हृदयदर्पणेऽस्तीति लोचनकारेणोक्तम्। तेनोक्तं यत् वेदेषु शब्दस्य प्राधान्यं भवति। परं काव्ये व्यापारस्य प्राधान्यं भवति। यस्मिन् शब्दार्थश्च गौणतां भजन्ते। परवर्तिकाले महिमभट्टेनापि[३] भोजानुरूपमेव शास्त्रेतिहासकाव्यानि विभाजितानि। भामहेनापि पुराणानुसारमेवतथैवोक्तम्।[४]

काव्यकारणताविवेकोऽपि कतिपयस्तरेषु दुर्लभत्वपरिगणनयाऽग्निपुराणे कृतः। नरत्वस्य दौर्लभ्यमारभ्य विद्यादौर्लभ्यं कवित्वदुर्लभता, काव्यनिर्माणशक्ति दुर्लभताव्युत्पत्तिदुर्लभतादिकमग्निपुराणेप्रतिपादितम्। विवेचनेनानेन विवेकस्य दौर्लभ्यं प्रतिपादितं भवति। वर्णनस्यास्य मूलं महतेस्यतस्यामुक्ताववलोकितुं शक्यते यस्यां प्रतिभामेवाधारभूतां स प्रतिपादयति। तदनुकारेणैव भामह[५] दण्डि[६] वामन[७] रुद्रटादिभिः[८] प्रतिभा प्रतिभानशक्तिपदानि प्रयुक्तानि। विश्वनाथेनैष श्लोकः काव्योपादेयत्वं प्रमाणयता प्रोक्तम् 'काव्यस्योपादेयत्वमाग्निपुराणेप्युक्तं' इत्यादिना वदता[९] अग्निपुराणानुरूपमेव प्राचीनवैयाकरणैरपि अक्षराणि व्यञ्जनवर्गेषु विभाजितानि। आग्नेया वाक्यपरिभाषापि दण्डिना काव्यलक्षणतयैवस्वीकृता।[१०]

---

१. काव्यमीमांसा पृ०–५॥
२. शृङ्गारप्रकाश पृ० ११५, सरस्वतीकण्ठाभरण पृ० २६०॥
३. ध्वन्यालोकलोचन पृ० ८९।
४. काव्यालङ्कार ५।३।
५. काव्यालङ्कार (भामह) १।५।
६. काव्यादर्श १।१०३।
७. काव्यालङ्कारसूत्रवृत्ति १।३।११,१६।
८. काव्यालङ्कार (रुद्रट) १।१४।
९. साहित्यदर्पण पृ० ७।
१०. काव्यादर्श १।१०।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

अग्निपुराणस्य काव्यपरिभाषा परवर्तीनि सर्वाण्यपि काव्यलक्षणानि क्रोडीकरोति। दण्डिना प्रोक्तं यदल्पमपि दोषं काव्ये नोपेक्षणीयम्[1]। वामनस्य त्वयं प्रसिद्धसिद्धान्तोऽस्ति यत् काव्यं तदेव ग्राह्यं भवति यदा तस्मिन्नलङ्काराः स्युः, दोषाश्च न स्युः।[2] भामहोऽपि स्वीकरोति यत् काव्येष्वलङ्काराः स्युः। काव्यं निर्दुष्टमपि भवेत्।[3] एवं भामहदण्डिवामनपरवर्तिभिः विश्वनाथकेशवमिश्रराजशेखरप्रभृतिभिरपि आग्नेयशैल्यामेव काव्यं परिभाषितम्।

इदं विचित्रमस्ति यत् काव्यपरिभाषायां रसस्य चर्चा नास्ति। परन्तु महाकाव्यपरिभाषायां भावरसयोः काव्यात्मकत्वं कण्ठतः प्रोक्तम्। रसानामपि विवेचनमग्निपुराणे विस्तृतमस्ति। भोजेनाग्निपुराणोक्तं काव्यलक्षणमेव गृहीतम्, परन्तु किञ्चित्परिवर्तनमपि विहितम्। तेन रसस्यावश्यकत्वमुपपादितम्। सरस्वतीकण्ठाभरणे भोजो वक्ति यत् कविभिः काव्यं कृत्वा सुखं यशश्च लभ्येते। यस्मिन् दोषा न सन्तु, श्रेष्ठतरा गुणाः सन्तु, अलङ्काराश्चापि सम्यग्विनिवेशिताः सन्तु।[4]

तेनैव शृङ्गारप्रकाशे शब्दभावयोरष्टानां सम्बन्धानां चर्चापि कृता। तस्मिन्नेवक्रमे चतुर्णां काव्यसम्बन्धानामपिचर्चास्ति। ते च—(१) दोषहानम् (२) गुणोपादानम् (३) अलङ्कारयोगः (४) रसावियोगश्चेति चत्वारः[5] सन्ति। शारदातनयेनापि 'भावप्रकाशने' एतस्य सम्बन्धचतुष्टयस्यैव चर्चा कृता।[6] परवर्तिभिरप्यालङ्कारिकैः मम्मट[7]-हेमचन्द्र[8]-वाग्भट[9]-विद्यानाथ[10]-प्रभृतिभिरपि अग्निपुराण-

---

१. काव्यादर्शः १।७ ॥
२. काव्यालङ्कारसूत्रवृत्तिः १।१।१—३ ॥
३. काव्यालङ्कारः (भामह) १।१३, १९, ३।१ ॥
४. सरस्वतीकण्ठाभरणः १।२ ॥
५. शृङ्गारप्रकाशः पृ० १८—२९।
६. भावप्रकाशनं पृ० १४५।
७. काव्यप्रकाशः १।१ ॥
८. काव्यानुशासनं पृ० १६।
९. काव्यानुशासनं (वाग्भट) पृ० १४।
१०. प्रतापरुद्रयशोभूषणं पृ० ४२।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

मनुकृत्यैव काव्यलक्षणानि विनिर्मितानि। तैः सर्वैरेव स्वकाव्यलक्षणेषु रसस्य निवेशो न कृतः। यद्यपि एभिः सर्वैरेवालङ्कारिकैः रसस्य काव्यात्मत्वमिष्यते। यथा—मम्मटाचार्येण काव्यप्रकाशस्याष्टमोल्लासे सप्तशीतितमायां कारिकायां रसस्य मुख्यत्वमुक्तम्।

काव्यस्य द्वयोरपि योन्योर्वेवेदलोकयोः चर्चायाः प्रभावः भामहवामनरुद्रटेषु परिलक्ष्यते। यतो हि वयं सर्वेष्वेतेष्वालङ्कारिकग्रन्थेषु अग्निपुराणोपवर्णितानां काव्यहेतूनां पल्लवितस्वरूपमुपलभामहे यावता प्रथमकाव्यहेतोर्वेदस्य प्रश्नोऽस्ति भामहेन वेदशब्दस्य प्रयोगमकुर्वतापि एतादृशानां कथानामाख्यायिकानां काव्यस्रोतरूपेणोल्लेखः कृतः।[1] कथनेऽस्मिन् लोकेश्च छायया लभ्यते। रुद्रटेनापि अनुत्पाद्यलोककथाश्रितानां काव्यानां चर्चाकृता।[2] भामहरुद्रटाभ्यामग्निपुराणस्य वेदश्च लोकः इत्यस्य स्थाने लोकाख्यानपदं प्रयुक्तम्। सम्भवतोऽग्निपुराणस्यैतस्यां धारणायां ते प्राचीनाचार्या एवाधारभूता येषां चर्चा राजशेखरेण काव्यस्रोतोरूपेण क्रियते[3]। ते च श्रुतोनां, लोककथानां काव्ययोनित्वमामनन्ति।

भाषामूलकस्यकाव्यभेदस्यरूपद्वयमग्निपुराणे मिलन्ति। परं दण्डीभामहप्रभृतिभिः काव्यस्यभाषाभेदेन त्रयश्चत्वारो वा भेदा उक्ताः। काव्यरूपभेदेन गद्यपद्य-मिश्रभेदाः यथापुराणमेव दण्डिनाप्युक्ताः।[4] भामहेन तु गद्यं पद्यमिति द्वौभेदावेवोक्तौ[5]। वामनेनापि भामहानुकूलमेवप्रोक्तम्[6]। गद्यस्य त्रयो भेदाः वामनेनाग्निपुराणमनुसृत्यैवोक्ताः।[7] दण्डिनाविकलं गद्यलक्षणमुद्धृतम्।[8] अग्निपुराणे वर्णितस्य पञ्च भेदात्म-

---

१. काव्यालङ्कार (भामह) १।९॥
२. काव्यालङ्कार (रुद्रट) १६।२–४॥
३. काव्यमीमांसा पृ० ३५।
४. काव्यादर्श १।२३॥
५. काव्यालङ्कार १।१६॥
६. काव्यालङ्कारसूत्रवृत्ति १।३।२१॥
७. काव्यालङ्कारसूत्रवृत्ति १।२।२२–२५॥
८. काव्यादर्श १।२३॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

कस्य गद्यस्य आख्यायिकाकाव्ययोरेव वर्णनं भामहेन कृतम्।[1] दण्डि-रुद्रटाभ्यामपि एतयोरेव वर्णनं कृतम्।

अग्निपुराणे वर्णिता आख्यायिकैव भामहदण्डिनोराधारभूता। एतेषां वर्णनानां समीक्षया इदं रहस्यमतितरां स्पष्टीभवति यत् मताद्वयं पुराणेन प्रभावितम्। अग्निपुराणोक्ता कथापरिभाषा दण्डि-रुद्रटयोः परिभाषयोः क्रोडीकृता। रुद्रटेन तु साग्नेयी आनुपूर्वी समुद्धृता यस्यामुक्तं यत् कथायां कविरात्मीयां वंशपरम्परां वर्णयेत्।[2] अन्यच्च मूलकथा-वर्णनात्प्राक् :काचिदुपकथापि वर्णनीया। दण्डी तदा अग्निपुराणमनु-वर्तते यदा स वक्ति यत् कथाविभाजनमध्यायेषु क्रियते, 'ये लम्भकाः कथ्यन्ते', येषु च पद्यान्यप्यारच्यन्ते।[3]

अग्निपुराणस्य खण्डकथाप्रकरणं किञ्चिद्व्यत्यासेन रुद्रटेनापि वर्णितम्। यद्यपि अन्येषां प्रकाराणां परिकथा, प्रभृतीनां विवरणं काव्या-लङ्कारादिषुनोपलभ्यते तथापि तत्सर्वमेभिरालङ्कारिकै आख्यायिकाया-मेवान्तर्भावितम्। अस्मादेवकारणाद्दण्डिनः प्रसङ्गे कथाख्यायिका-न्तर्गतमेवाख्यानस्यान्तर्भावो विवृतो विश्वनाथेनः—

"आख्यानादयश्च कथाख्यायिकयोरेवान्तर्भावान्न पृथगुक्ताः।"

यदुक्तं दण्डिनैव—

"अत्रैवान्तर्भविष्यन्ति शेषाश्चाख्यानजातयः।"[4]

किन्तु आनन्दवर्धनाचार्येणाग्निपुराणमनुसरता परिकथा-खण्ड-कथाख्यायिकाकथानां च विवरणानि कृतानि,[5] लोचनकृता तासां सर्वासांमपि लक्षणादीनि सक्षिप्तं वर्णितानि। तानि सर्वाण्यपि स्पष्टमेवाग्नि-पुराणानुमतान्येव[6] केवलमभिनवगुप्तोक्ता परिकथा-परिभाषैवाग्निपुराणा-द्भिन्नेति प्रतीयते। परिकथा च पुरुषार्थविशेषोद्देश्येन विविधैः प्रकारै-

१. काव्यालङ्कार १।१८, २९–२७॥
२. काव्यालङ्कार (रुद्रट) १६।३३–३४।
३. काव्यादर्श १।२३–३०।
४. साहित्यदर्पण पृ० ४६७।
५. ध्वन्यालोक पृ० ३५३।
६. ध्वन्यालोकलोचन पृ० ३५३–३५४।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderab

रन्तर्वृत्तान्तप्रकारेति लक्षणम्। शृङ्गारप्रकाशे भोजेन श्रव्यकाव्य-भेदान्तर्गतमाख्यायिका कथा—परिकथा-खण्डकथादीनां निरूपणमग्नि-पुराणानुसारेणैव कृतम्।[1] परन्तु केनाप्यन्यालङ्कारिकेण कथानिका नोपवर्णिता। कथानिकायाः परम्पराग्निपुराणादन्यत्र विकासं नोपगता।

आग्नेयी पद्यपरिभाषा 'पद्यं चतुष्पदी तत्रवृत्तं जातिरितिद्विधा' इति दण्डिना तथैव संगृहीता। पुराणस्येयं परिभाषा काश्यपेनोक्ता। पाणिनि[2]-पिङ्गलाभ्यां[3] काश्यपस्य स्मरणं क्रियते। आधुनिकानां धारणा यत् अग्निपुराणे दण्डिनोऽनुकरणमस्तीति वितथम्। प्राचीन-तरा काश्यपोक्ता परिभाषा पुराणस्रोतसा दण्डिना लब्धेत्येव वरम्। एते-नैवाग्निपुराणस्य दण्डिपूर्वभाविताऽपि स्पष्टीभवति।

वृत्तस्य पुराणोक्ताः समार्धसमविषयभेदा अपिङ्गलानुसारिण एव। तन्निर्देशोऽपि यथास्थानं पुराणे प्राप्यते। दण्डी पुराणस्योपमां-काव्य-समुद्रतितीर्षूणां कृते छन्दोविद्यां नावमिवोपमिनोति इति मतमुपन्यति।[4] पद्यानां सप्त भेदाः महाकाव्य-कलापपर्यायबन्धविशेषकादयः पुराणे उक्ताः भामह[5]-दण्डि[6] रुद्रटैः[7]-महाकाव्यानां सर्गबन्धत्वं तत एव गृहीतम्। परन्तु पुराणस्य 'महाकाव्यानां प्रारम्भः संस्कृते अथवा विशुद्धे तत्समे कार्यः[8] इति कथनं केनाप्यालङ्कारिकेण न गृहीतम्। एतेन महाकाव्यस्य पुराणलक्षणं निर्विवादमिति तस्य पुनरुद्धरणं पिष्ठपेषण-मेवेति नोद्धृतम्। भामहदण्डि-प्रभृतिभिरुक्तं यन्महाकाव्येषु मन्त्रदूत-प्रयाणाजिनायकाभ्युदया वर्णनीयाः। तदपि पुराणानुगमेव। पुराणे महाकाव्येषु स्वीकृतं समच्छन्दोविवरणं भामहेननोक्तं दण्डिना तूक्तं यत्

---

१. शृङ्गारप्रकाश पृ० २७–२८।
२. अष्टाध्यायी ८।४।६७।
३. छन्दःसूत्र ३।३६,७।९।
४. काव्यादर्श १।१२।
५. काव्यलङ्कार (भामह) १।१८–२३।
६. काव्यादर्श १।१४–२२।
७. काव्यालङ्कार (रुद्रट) १६।७–९।
८. काव्यानुशासन (हेमचन्द्र) पृ० ३३०।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

प्रसिद्धानां छन्दसामेव प्रयोगः कर्तव्यः। हेमचन्द्र[१]-वाग्भट[२]-विश्वनाथै-रग्निपुराणस्यैवभावानां[३] विस्तारोऽकारि।

अग्निपुराणे महाकाव्यानां बहूनां वैशिष्टयानां चर्चा कृता। तत्र वृत्तिभावरीति रसगुणालङ्काराणां उपयोगस्य निर्देशोऽस्ति। वृत्तिनिर्देश-स्यप्रेरणा पुराणे नाटयशास्त्रादेव लब्धेतिप्रतीयते।[४] पुराणप्रेरणयैत्र भामहेन रसानामलङ्काराणां चर्चापि कृता। परं दण्डिना रसाभावयो-महत्त्वं स्वीकृतम्। अग्निपुराणस्येदमस्ति वैशिष्टयं यन्महाकाव्यलक्षण-वर्णनक्रम एवोक्तं यद् वाग्वैदग्ध्यप्राधान्येऽपि रस एवात्र जीवितम्। अन-यैवावधारणया सम्भवतः राजशेखर[५] भोजराजौ[६] प्रभावितौ। पुराणे महाकाव्यानां रसात्मकत्वोक्तिर्नूनमेव भरतमताश्रिता। यतो हि बहुत्र नाटयशास्त्रे रसस्य महत्त्वं व्यक्तीकृतम्। यथा—

एवमेता बुधैर्ज्ञेया वृत्तयो नाट्यसंश्रयाः।
रसप्रयोगमासां च कीर्त्यमानं निबोधत॥

॥ ना० शा० २२।६४॥

तस्माद्रस एव महाकाव्यस्यात्मेति स्थितम्।

श्रीसुरेशमोहनभट्टाचार्यस्य मतमस्ति यत्—अग्निपुराणं प्रथमोऽस्ति ज्ञातो ग्रन्थो यत्र सुस्पष्टरीत्या रसस्य महाकाव्यात्मत्वप्रतिपादनेन भरत-मुनेरेवधारणा दृढीकृता।[७] परवर्तिभिर्भट्टनायक[८]—प्रतीहारेन्दु-

---

१. काव्यानुशासन (वाग्भट) पृ० १५।
२. साहित्यदर्पण ६।६१।
३ नाटयशास्त्र अ०—१४।
४. कर्पूरमञ्जरी पृ० ३,११,२३।
५. सरस्वतीकण्ठाभरणम् पृ० २६। शृङ्गारप्रकाश पृ० ११५।
६. सुरेशमोहनभट्टाचार्यः पूर्वोद्धृतम् पृ० १३।
७. ध्वन्यालोकलोचने उद्धृतम् पृ० ५१।
८. उद्भटालङ्कारसार संग्रहवृत्ति पृ० ९०।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderab

राजाभिनवगुप्तम[1]हिम[2]भट्टभोज[3]मम्मट[4]हेमचन्द्र[5]वाग्भट[6]वामभट — द्वितीय[7] विद्यानाथ[8]विश्वनाथ[9]केशवमिश्रैः[10] पुराणानुकूलमेव रस एव महाकाव्यात्मेति वर्णितम् । एवमेव महाकाव्यानां चतुर्वर्गफलप्राप्तिकथनमपि परवर्तिनां कृते आधारभूतमभूत् ।

पुराणस्य कलापविशेषकसम्बन्धिविवरणं ध्वन्यालोककृतामप्याधारभूतम् । तेन कलापविशेषकपर्यायिबन्धकुलकादीनां चर्चा कृता । अभिनवगुप्तेन ध्वन्यालोकलोचने विशेषक कलापकयोः परिभाषा प्रसङ्गादुक्तं यद् व्याकरणदृष्ट्या त्रीणि सम्पृक्तानि पदानि विशेषकम्, चत्वारि पदानि-कलापकम्, पञ्चानां पदानां कुलकम्—इति ।[11]

यद्यपि सर्वमिदं पुराणानुरूपमेव तथापि पुराणे प्रोक्तमस्ति यत् प्रवासरचनाकलापकम्, प्रासादिलक्षणं च विशेषकम् । कुलक-मुक्तक–कोषाणां लक्षणानि [पुराणोक्तानि प्रायस्तथैव केनापि ग्निपुराणवत् कुलकेन सह सन्दानिकतं न वर्णितम् । आनन्दवर्धनस्यापि विवरणं पुराणाद् भिन्नमिव प्रतीयते । अग्निपुराणे तु सन्दानितककुलकयोरैक्यमप्युक्तम् । परमानन्दवर्धनाचार्येण, तदुत्तरवर्तिभिश्च तयोः पार्थक्यमेवोक्तम् ।

---

१. व्यक्तिविवेक पृ० १०५।४२२ ।

२. सरस्वतीकण्ठाभरण ५।८, शृङ्गारप्रकाश पृ० ६९ ।

३. काव्यप्रकाश ८।८७ ।

४. काव्यानुशासन (हेमचन्द्र) पृ० १६ ।

५. वाग्भटालङ्कार ६।१।१६ ।

६. काव्यानुशासन (वाग्भट द्वितीय) पृ० ५३ ।

७. प्रतापरुद्रयशोभूषण १।४।

८. साहित्यदर्पण १।३ ।

९. अलङ्कारशेखर १।२।२ ।

१०. ध्वन्यालोकलोचन पृ० ३५३ ।

११. ध्वन्यालोकलोचन पृ० ३५४ ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

प्राच्यभारतीयं मधुपर्कार्हणम्

डॉ० श्रीकिशोरमिश्रः, वेदाचार्यः,

भारतीयपरम्परायां केषांचन विशिष्टानामामभ्यर्हितानां पुरुषाणां विशिष्टासु स्थितिषु शास्त्रबोधितविधया सम्माननायार्चनं क्रियते। सो यमर्चनविधिः मधुपर्कनाम्ना सर्वेष्वपि गृह्यसूत्रेषु वर्णितोऽस्ति। यद्यपि स्मार्तसूत्रप्रतिपादितमिदं कर्म, तथापि श्रौतेषु सोमयागादिषु याज्ञिकाः सूत्रकाराश्चास्यानिवार्यतां घोषयन्ति। तथा हि, "कृताध्यां एवैनं याज-येयुर्नाकृताध्यं इति श्रुतेः" इति पारस्करसूत्रे श्रुतिवचनमुद्धृतम्[1]। "यद्यप्यसकृत् संवत्सरस्य सोमेन यजेत" इति[2] वचनाच्छ्रौतस्य सोमया-गादेः कर्मांगत्वमिव मधुपर्कस्य प्रकाश्यते आचार्यैः।

मधुपर्कशब्दार्थः

मधुपर्क इति कर्मणो नामधेयम्। पृची सम्पर्के धातोः[3] पर्कशब्द-सिद्धिः। मधुना पर्कः सम्पर्को यस्मिन् कर्मणि स मधुपर्क इत्यर्क निर्व-चनम्। मधोः पर्कः सम्पर्को येन इति द्वितीयं निर्वचनम्। प्रथमे निर्वचने मधुशब्दो मक्षिकासंगृहीतपुष्परसवाची, न मद्यपरः। मद्योपयोगे यज्ञानुष्ठानादिषु सुरापानादेर्विगर्हितत्वाच्च। क्षुद्राभिर्मक्षिकाभिः सम्पाद्यमानत्वादेतस्य मधुनः क्षौद्र[4] इति नामान्तरम्। मधुशब्दश्च कोशटीकाकृद्भिः उणादौ मन् धातोर्निष्पाद्यते। मन्यते इति मधुः। मन् ज्ञाने धातुः, दिवादेरात्मनेपदिकान्मनेः "फलपाटिनभिमनिजरां गुटूप-टिनाकिधतश्च" इति[5] सूत्राद् उ प्रत्ययो धकारागमश्च। धकारे परे "अनुदात्तोपदेशः" इत्यादिसूत्रेणानुनासिकस्य नकारस्य लोपस्तेन च मधु इति सिद्धयति। मधुशब्दः पुंसि क्लीबे च वर्तते,

मकरन्दस्य भथस्य माक्षिकस्यापि वाचकः।
अर्धर्चादिगणे पाठात् पुंनपुंसकयोर्मधु॥

अतएव "यन्मधुनो मघव्यम्" इत्यत्र क्लीबे[6] प्रयोगः, "मधो-र्धतस्य च याः "इति पुंसि प्रयोगो दृश्यते। वेदे नुमागमस्य घिसंज्ञा-

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderab

कार्यस्य च सामान्यछान्दसशास्त्रेण विकल्पितत्वात् मध्व[७] इत्यादिषु यण् सहितः प्रयोगः। यद्यपि मधुशब्दस्य अनेकेऽर्थाः कोशेषु दृश्यन्ते, यथा—

मधु क्षौद्रे जले क्षीरे मद्ये पुष्परसे मधु।
दैत्ये चैत्रे वसन्ते च जीवाशोके मधुद्रुमे॥ इति विश्वः[८]।

तथाप्यत्र सर्वगृह्यस्वारस्यात् क्षौद्रस्यैव मधुनो मुख्यतया ग्रहणम्।

मधुशब्देन मधुररसोऽपि तत्र तत्र बोध्यते। यथा मधुमतीर्न इषस्कृधि इत्यादौ[९]। अत्र हि सितावन्मधुररसो नावगम्यते, किन्तु उपभोगसवारस्ये गौणो मधुशब्दः[१०]। अतएव मधुमान्नो वनस्पतिः[११], मधुनक्तम्[१२], इत्यादौ उपयोगिसरसतायां मधुशब्दः प्रयुज्यते। क्वचिदव्यक्तस्य मधुर-रसस्यापि द्योतनाय मधुशब्दः प्रयोज्यते, यथा सोमविशेषणत्वेनाज्यविशे-षणत्वेन च। अतएव ऐतरेयब्राह्मणे—"एतद् वै मधुदैव्यं यदाज्यम्" इति[१३] वाक्येनाज्यस्य दैव्यं मधुत्वमुक्तम्। एवं च मधुपर्क-भेदेषु बहुत्र क्षौद्रमधोः सम्पर्काभावेऽप्याज्यस्य मधोः सम्पर्को युक्तरूप एव। कुत्रचिदु-दकस्य मधुपर्के संयोगः साक्षात् परम्परया वा दृश्यते, सोऽपि कोश-प्रामाण्याद् युक्तरूपः।

मुकुन्दझाबख्शीमहोदयेन तु मन्यतेऽतिशयेन जनैरिति मधु इति[१४] व्युत्पादयता औषधानुपानेऽतिशयेन मधुनी व्यवहारात् मधुशब्दव्याख्यान-मारचितम्। तत्रैव मननीयमिति भट्टभास्करकृता व्युत्पत्तिरुपात्ता। स्कन्दस्वामी दुर्गाचार्यश्च दैवादिकात् परस्मैपदान् मद् धातोर्मधुशब्दं निब्रू॑तः। अत्र हि बाहुलकाद् उ प्रत्ययः[१५], दकारस्य धकारादेशश्च निपात्यते। निरुक्तकारो यास्काचार्योऽपि मदेरन्तव्यापत्तिं कृत्वा मधुशब्दं निब्रू॑ते। तथा हि,

अथाप्यन्तव्यापत्तिर्भवति ओघो मेघो नाघो गाधो वधूर्मध्विति।[१६] दैवादिकः मदी हर्षे इति पाणिनिः। बख्शी दैवादिकं तृप्त्यर्थं लिखति। वस्तुतस्तु मद् तृप्तिसंयोगे इति चुरादिगणे धातुः। निर्वचनं तु दैवादिका-च्चौरादिकादित्युभयोरपि संभवति। माद्यति हर्षयतीति मधुः। हर्षस्य पूज्ये वैवाह्यादौ आदरातिशयप्राप्त्या संभवेनार्छन्वर्थत्वम्। हर्षस्य सम्प-र्ककारित्वाच्च मधुपर्कमित्यन्वर्थं कर्म। तृप्तिसंयोगार्थकाच्चौरादिकान् मदेस्तु मादयते तर्पयतीति मधुः। तृप्तेः सम्पर्को येन कर्मणाऽसौ मधु-पर्कः। तृप्तिश्चात्र न क्षुत्पिपासाशान्तिरूपा, किन्तु सश्रद्धं वैधपूजनेनार्च्ये

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

भावात्मिका या तृप्तिः सन्तोषरूपा सोऽत्र गृह्यते। मधुपर्कभक्षणे विनियुक्तमन्त्रेणापि भावोऽयमवगम्यते, यन्मधुनी मधव्यं परमं रूपमन्नाद्यम् इति।[१७] तृप्तेः प्रतीकरूपस्य क्षौद्रस्य मधुनी यन्मधव्यं सन्तोषावर्त्तं तृप्तिजनकं तत्त्वमर्च्यत्वात् परमं रूपं भोग्यसाधनत्वादन्नाद्यमस्ति, तेन तत्त्वेनाहं परमः उत्कृष्टः अन्नादो भोग्यशक्तिसम्पन्नश्च भूयासमिति मन्त्रार्थः।

निरुक्ते दैवतकाण्डे मधुशब्दो भिन्नतया निरुक्तः। तत्र हि मधु धमतेर्विपरीतस्य इति उक्तम्।[१८] अत्र हि धमतिर्धातुर्नैघंटुकः।[१९] पाणिनीयधातुपाठे धातुरयं नास्ति। गतिशीलत्वाच्च मधु इति जलनामधेयम्। तत्तु कोषेभ्योऽभि संवदति, मधु क्षौद्रे जले क्षीरे-इत्युक्तेः। निरुक्त प्रक्रियया हि वर्णविपर्ययनियमात् प्रथमस्थानीयस्य धकारस्य द्वितीयस्थाने स्थितिः, द्वितीयस्य मकारस्य च प्रथमस्थाने स्थितिः। स्वरस्तु यथास्थित एव। तत उणादित्वादु प्रत्यये मधुशब्दः। एवं च धमति गच्छति स्वभाववशादन्तरिक्षे पृथिव्यां वेति मधु जलम्। व्युत्पत्तिरियं क्षौद्रेऽपि समन्वेति। आयुर्वेदज्ञा हि स्वस्यौषधं रोगिणोऽङ्गेषु झटिति व्यापयितुं क्षौद्रस्य मधुनः संयोगं कुर्वन्ति। मधुपर्कार्हणेऽपि मधुनः सम्पर्केण दृष्टादृष्टफलस्य गतिमत्वं वक्तुं शक्यते।

मधुपर्कार्हणस्य दृष्टादृष्टफलकत्वम्

मन्यते इति मधुः इति व्युत्पत्त्या ज्ञानमपि मधुपदवाच्यं भवति। मधुपर्काख्ये कर्मणि द्रव्यात्मकस्य क्षौद्रस्य मधुनो विनियोगेऽपि किमर्थमिदं दीयते इति जिज्ञासां व्युत्पत्तिः समाधत्ते। मधु ज्ञानम्, तस्य सम्पर्कस्तद्रूपताबोधो येन स मधुपर्क इत्यन्वर्थं कर्मणो नामधेयम्। पारस्करोक्ता तां षण्णां मधुपर्केणार्हणीयाणां विधानेन पूजने वैवाह्यत्व-ऋत्विक्त्व-राजत्वाचार्यत्व-प्रियत्व-स्नातकत्वादिबोधः स्वस्मिन् येन कर्मणा भवति सोऽसो मधुपर्क इति विशेषः। आत्मनि तादृक्त्वबोधश्च स्वधर्मपालनदार्ढ्याय उपयुज्यते एवेति नार्हणस्य वैयर्थ्यम्। एवं च मधुपर्ककर्मणा अर्चनीये स्वात्मबोधो दृष्टं फलम्, ऋत्विजादिष्वाशीर्वादिनिवृत्तिश्चादृष्टं फलमिति दृष्टादृष्टफलं मधुपर्कार्हणास्तीति सुवचम्।

कौषीतकिब्राह्मणे[२०] मधुपर्कः आरण्यानां रस उक्तः। रसो हि शरीरे तादृग् गुणसंचारायालं न भवति। एवं हि त्वारण्यानां मुनीनां तद्वद्गुण-

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderab

संचाराय मधुपर्कः क्रियते। आरण्याश्च मुनयो लोकव्यवहारोपरताः स्वजीवनमेकनिष्ठतया कर्तव्ये कर्मणि निर्वहन्तीति तेषां जीवनमालक्ष्य-कृतमधुपर्कस्य व्यक्तेः सूतकाशौचादिलोकव्यवहारातीतमार्षे जन्म यावत् कर्म उपैतीति मधुपर्कस्यादृष्टफलकत्वं श्रुत्यापि ज्ञाप्यते।

मधुपर्ककालः

कौशिकगृह्ये मधुपर्केणार्हणीयाणामर्हणकालविषये चर्चा न दृश्यते। मधुपर्कप्रकरणं द्वादशाध्याये कोशिकेनोपनिबद्धम्। ततः पूर्वे बहूनां कर्मणां प्रतिपादनमेकादशस्वध्यायेषु अस्ति। क्रमेणानेन कल्पयितुं शक्यते, यद् ये वैवाह्यर्त्विगादयः कर्मसु विनियुक्तास्तेषामर्हणं कर्मान्ते कर्तव्यं मधुपर्काध्यायस्यान्ते निबद्धत्वात्। परमेतन्न युक्तिसहम्।" स यावतो मन्येत तावत उपादाय विविच्य संपर्याप्य मूलानि च प्रान्तानि च यथा-विस्तीर्णं इव स्थादित्युपोत्कृष्य मध्यदेशेऽभिसंनह्यति" इत्यासनविधान-स्यादृष्टार्थत्वापत्तेः।[२१] पाद्यार्घ्ययोरपि कर्मान्ते क्रियमाणत्वे दृष्टमेव वक्तव्यं स्यात्। तस्मात् कर्मण आदावेव पूजनमर्थात् सिद्ध्यति। शिष्ट-समाचारोऽप्येवम्। अतएव काठकगृह्ये आदित्यदर्शनाचार्यः कर्मान्तार्हण-पक्षं समुपस्थापयन् दूषयति,

केचिद् विवाहस्योपरिष्टान्मधुपर्कविधिः पठ्यत इति तत्रैव कर्मान्ते मधुपर्कं ददाति, तदैव कन्यादाने निवृत्तेऽसौ वैवाह्य इति वदन्तः।[२२] सर्वदेशसमाचारस्तु विवाहात् पूर्वं मधुपर्कदानम्। अतस्तदेव साधीयः। इति।[२३] देवपालेऽपि "आदि च कर्मणः" इति[२४] सूत्रव्याख्याने कर्मा-दिपक्षमेव समर्थयति,

विवाहोत्तरकालमर्हणं विहितमिति यथाचोदितमानुपूर्व्यमिति नयेन विवाहादूर्ध्वमेव मधुपर्कादिदानमिति केचिदाहुः। अतएव च विवाहोत्तर-काल एवेदमपकृष्य व्याचक्षते। तन्निरासायेदं कर्मण आदावेव पूजनं कर्तव्यम्। इति। पारस्करोऽपि विवाहात् पूर्वमेव मधुपर्कविधिं संग्रथयन् कर्मण आदावेव करणीयत्वं ज्ञापयति। "कृतार्घ्या एवैनं याजयेयुः" इति[२५] सूत्रमपि पक्षममुं समर्थयति।

कर्मण्यविनियुक्तानामाचार्यादीनां पूजनं तु गृहागतानामेव भवति। आचार्ये गृहागते इदं कर्म कुर्वीतेति अथर्वपद्धतौ स्पष्टमुक्तेः। समानन्यायात्

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

संयुक्तातिथ्योरपि गृहागतयोरेवार्चनम्। गृहागतानामप्येषामाचार्यादीनां प्रत्यागमनं नैव पूजनम्। किन्तु प्रतिसंवत्सरानर्हयेयुः इति पारस्करसूत्रादिषूक्तेः[२६] अतीते संवत्सरे एवार्हणम्। प्रतिसंवत्सरानित्यत्र, प्रतिरत्र अत्यर्थे, अति संवत्सरानित्यर्थः। तेन संवत्सरोपर्यागतानाचार्यादीनप्यर्हयेयुः अर्घदानेन पूजयेयुः, न त्वर्वाक् संवत्सरादागतान्। इति जयरामादिव्याख्यानात् अतीते संवत्सरे एवागतानां पूजनम्। संवत्सरशब्दोऽत्र न चान्द्रसौरादिसंवत्सरपरः। तथा सति संवत्सरसमाप्तेः अर्वागागतेभ्यः पुनश्च संवत्सरप्रवृत्यनन्तरं झटित्यागतेभ्य। पूजनं प्रसज्येत। अतएवापस्तम्बीयानाकुलायां स्पष्टमेवोक्तम्[२७], तेभ्यश्चतुर्भ्यः आचार्यायर्त्विजे श्वशुराय राज्ञे परिसंवत्सरं विप्रोष्योपतिष्ठद्भ्यः गृहमातिथ्येनागतेभ्यः एतदपचितिकर्म कूर्चादिभोजनान्तं कर्तव्यम्, केन गृहस्थेनेति॥

आपस्तम्बगृह्ये परिसंवत्सरार्हणविधानार्थमस्ति सूत्रम् आचार्यार्त्विजे श्वशुराय राज्ञ इति परिसंवत्सरादुपतिष्ठद्भ्य एतत्कार्यम्। इति। अत्र हरदत्तेनानाकुलायां द्वितीयं भावं द्योतयितुं द्वेधा सूत्रस्य विभागः कृतः। तथैव च तात्पर्यदर्शने।

आचार्यादिभ्यश्चतुर्भ्य एतत् कार्यमित्येको योगः।....! तथा परिसंवत्सरादुपतिष्ठद्भ्यः पुनः पुनः, इत्यन्यो योगः। इति।[२८]

योगविभागेन हि स हरदत्तो विशिष्टं व्याख्यानमारचयति यत् स्नातको भूत्वा आचार्यम्, अग्निहोत्रादिषु स्वप्रातिनिध्येनोररी कृतमध्वर्य्वादृत्विजम्, विवाहानन्तरं श्वशुरम्, अभिषेकानन्तरं राजानं च निमन्त्र्य गृहमानयित्वा पूजनमिति प्रथमविभागस्वारस्यम्। अथ तेभ्य एव चतुर्भ्यः विप्रोष्य संवत्सरानन्तरमुपतिष्ठद्भ्यः पुनः पुनः मधुपर्कार्हणं कर्तव्यमिति च द्वितीय विभागस्य स्वारस्यम्। तथा हि तत्रस्था पंक्तिः।

अत्र केचिदाहुः आचार्यायर्त्विजे श्वशुराय राज्ञ इत्येतत् कार्यमित्येको योगः। अथ परिसंवत्सरादुपतिष्ठद्भ्यश्चायं कार्य इति। तेन विवाहादनन्तरमाचार्यश्वशुराभ्यां निमन्त्र्यापचितिः कर्तव्या। ऋत्विजे च कर्मणि राज्ञे चाभिषेकानन्तरम्। अथ तेभ्य एव संवत्सरं विप्रोष्योपगतेभ्यश्च कर्तव्यमिति।[२९]

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderab

आपस्तम्बीयसूत्रस्य द्वितीयविभागमालक्ष्य संवत्सरमध्येऽपि क्रियमाणे सोमयागे प्रतिसंवत्सरानि[१०]त्युपदेशादनर्हणप्राप्तो पारस्करः सूत्रयति, यद्यप्यसकृत् संवत्सरस्य सोमेन यजेत कृतार्घ्या एवैनं याजयेयुर्नाकृतार्घ्या इति श्रुतेः।[११] सोमेनेति सर्वयज्ञोपलक्षणम्। सोऽयं प्रतिसंवत्सरानित्यस्य सोमयाग एवापवादः, न तु यक्ष्यमाणास्त्विवत्वृज इत्यस्य। अतः स्मार्तेऽपि कर्मणि संवत्सरे असकृदावृत्ते शतचंड्याद्यनुष्ठाने प्रतिप्रयोगवृत्विजां मधुपर्केणार्हणम्।

अतश्च संवत्सरपूज्येषु सावनः संवत्सरोऽत्र ग्राह्यः। स च षष्ठ्युत्तरशतत्रयदिवसात्मकः। स्नातकस्य तु पूजनमाचार्यंकर्तृकं वेदाध्ययनस्नानाव्यवहितकाले जीवने सकृदेव भवति।[१२] वैवाह्यस्य विवाहगुणसम्बन्धात् विवाहकाले एव, न त्वन्यदेति स्पष्टम्। ऋत्विजां मधुपर्कार्हणमतीते संवत्सरे एवेति न नियमः। ऋत्विक्त्वस्य कर्मानुगुणत्वात् कर्मणश्चावसाने ऋत्विक्त्वाभावात्। अतएव पारस्करेण स्पष्टमेवोक्तम्-यक्ष्यमाणास्त्विवत्वृजः इति।[१३]

मधुपर्कार्हणीयाः

आश्वलायनगृह्यसूत्रे मधुपर्केणार्हणं सप्तानामुपदिष्टम्।[१४] तत्र प्रथमो वर्तते ऋत्विग् द्वितीयो वैवाह्यो वरः। स चाश्वलायनेन उपस्थितस्नतकशब्देनोक्तः। उपस्थित इति विशेषणात् वैवाह्यत्वनिश्चये सति तदैव न मधुपर्कार्हणम्, किन्तु कन्याप्रतिग्रहार्थं द्वारि आगतस्यैव वरस्यार्हणं विधेयमिति सूच्यते। पारस्करगृह्यसूत्रमिव स्नातकशब्दोऽत्र ब्रह्मचर्यान्निवृत्तस्यावैवाह्यवस्य स्नातकस्य तात्पर्यत्वेन नास्ति। आश्वलायनगृह्ये हि गृहस्थाश्रमोन्मुख एव स्नातकोऽभिप्रेतः, महद् वै भूतं स्नातको भवतीति विज्ञायते इत्युक्तेः। अत्र गार्ग्यनारायणः[१५]—

कथं पुनः स्नातकस्य महत्वम्, उच्यते,

देवैश्चापि मनुष्यैश्च तिर्यत्तृयोनिभिरेव च।
गृहस्थः सेव्यते यस्मात्तस्मात् श्रेष्ठो गृहाश्रमी॥

इतिस्मृतेः, इति गृहस्थप्रशंसाविलेखनात् बह्वृचसूत्रे स्नातको वैवाह्य एवेति।

तृतीयोऽर्हणीयो राजा। स च उपस्थित इति पूर्वानुवृत्तेर्द्वार्यागत एव। आचार्यश्चतुर्थः श्वशुरः पंचमः षष्ठो मातुलश्च सप्तमः। आचार्यायोऽप्यु-

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

पस्थिता एवार्हणीयाः पूर्वसूत्रानुवृत्तेः। तत्र श्वशुरपितृव्यमातुलानां सम्बन्धित्वेनैकत्वम्। व्यक्तिबहुत्वे तु सर्वेषामुपस्थितानां पूजनम्।

पारस्करगृह्यसूत्रे षण्णां मधुपर्केणार्हणीयत्वमुपदिष्टम्।[२१] ते च षट्, आचार्यः ऋत्विग् वैवाह्यके राजा प्रियः स्नातक इति। अत्र विश्वनाथ-भाष्यकारेण आचार्यादिशब्दा न जातिवाचकाः किन्तु उपाधिरूपा इति संरम्भेण सिद्धान्तितम्। तथा हि,

ननु आचार्यत्वादयो धर्माः जातय एव किं न स्युः, न स्युः, जाति-संकरप्रसंगात्। तथा हि

आचार्यत्वपरिहारेणान्यत्र ऋत्विक्त्वम्, ऋत्विक्त्वपरिहारेणान्यत्रा-चार्यत्वम्। एकत्रोभयं संकीर्णं तस्मादुपाधय एते। इति।

अयं भावः, कुम्भकारस्वर्णकारलौहकारादिजातिशब्दाः क्रियाविशेष-कर्तृत्वेन रूढाः सन्ति। एवमेव आचार्यादयः षडपि शब्दाः अध्यापनादि-क्रियाकर्तृत्वेन जातिरूपाः स्युरिति पूर्वः पक्षः। सिद्धान्ते तु अधीतवेद-त्वादाचार्यः प्रियःस्नातकादिर्वा कदाचित् कस्मिंश्चित् कर्मणि ऋत्वि-क्त्वेन अपि वरीतुं शक्यते। जातिवाचित्वे हि आचार्यादेः ऋत्विक्त्वे जातिसांकर्यं प्रसज्येत। न च जातौ सांकर्यं प्रशस्तम्। न वा एवं विधा-नामाचार्यादीनां जातीनामस्ति जातित्वेन कुत्राप्युल्लेखः। तस्मादा-चार्यादयः शब्दाः न जातिवाचकाः किन्तु उपाधय एव। उपाधिश्च कालक्रमेण स्थितिक्रमेण वा उत्पद्यते विनश्यत्यपि। क्वचन आचार्यप्रिया-द्युपाधिः यावज्जन्म तिष्ठन्नपि न विरुणद्धि। वैवाह्यः स्नातकः इत्येता-दुपाधी सकृदेव प्रवर्तेते। द्वितीयादि विवाहेषु तु वैवाह्यत्वं पुनरप्यावृत्तं भवति। ऋत्विगुपाधिस्तु यजमानैकत्वे विभिन्नकालिकक्रियामाणानुष्ठा-नेषु पुनः पुनरावर्तते।

राजा नाम अभिषेकादिगुणवान् प्रजापालनेऽधिकृतः क्षत्रियः इति हरिहरः। गदाधरस्तु अभिषेकं क्षत्रियत्वं चोपेक्ष्य, राजा दण्डपूर्वकं परिपालनकर्तेत्युक्त्वा क्षत्रियेतरानपि प्रजापालनकर्तॄन् संगृह्णाति। विश्वनाथस्तु, राजसूयान्तर्गताभिषेकाभिषिक्तत्वे सति प्रजापालनाधि-कृतत्वाश्रयो राजा इति वदन् राजसूयाख्यश्रौतयज्ञकाणानन्तरमेव मधुपर्कार्हतां राज्ञः साधयति। न ततः पूर्वम्। पूर्वमीमांसायां तु, न राजयोगाद् राजत्वं क्षत्रियत्वं तु तत्वतः, इति[२७] प्रसाध्य क्षत्रियस्यैव

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderab

राजत्वं व्यवस्थापितम्, न तु क्षत्रियेतरस्य राजयोगाद् राजत्वं निर्णीयते। मन्ये अमुमेव जैमिनीयं सिद्धान्तं दृष्ट्वा विप्रतिपन्नः आपस्तम्बो महर्षिः मधुपर्केणार्हणीयेषु राज्ञा सह स्थपतिमपि पठति। स्थपतिर्नाम देशस्य जातेश्च पालनेऽधिकृतो व्यक्तिरिति निषादस्थपत्याधिकरणे स्पष्टम्।[३८] उभयथापि वंशानुक्रमप्राप्तमेव राजत्वं स्थपतित्वं च मधुपर्कार्ह्यत्वं साधयति। तेन साम्प्रतिकानां निर्वाचनेनागतानां प्रजापालनेऽधिकृतानां मन्त्र्यादीनां दंडपूर्वकं परिपालनकर्तृणामधिकारिणां वा राजत्वेन स्थपतित्वेन वा नार्हणीयत्वम्।

स्नातको हि विश्वनाथेन, विद्याव्रतोभयस्नातकत्वाद्यन्यतमोपाध्यवच्छिन्न इति च लक्षितः। स च वेदमधीत्य ब्रह्मचर्यात् समावृत्त एव भवति। स्नातको हि आचर्येणैव स्नानाव्यवहितकाले समर्चनीयो न त्वन्येन। तथा हि मनुः[३९],

तं प्रतीतं स्वधर्मेण ब्रह्मदायहरं पितुः।
स्रग्विणं तल्प आसीनमर्हयेत् प्रथमं गवा॥ इति।

अत्र गोशब्दः मधुपर्कार्हणोपलक्षक इति सर्वेऽपि भाष्यकृतः। आश्वलायने स्नातकशब्दो वैवाह्यपर इति पूर्वमुक्तम्। तेन आश्वलायनीयानांमाचार्यकर्तृकं स्नातकार्हणं न भवतीति प्रतीमः। बह्वृचं पूजनाभावशिष्टचारोऽपि दृश्यते।

आपस्तम्बगृह्ये राजा स्थपतिः आचार्यः ऋत्विक् श्वशुरः इत्येते अर्हणीयाः प्रतिपदमुक्ताः[४०] प्रवक्त्रे चित्राय च सकृदर्हणमुक्तम्।[४१] बौधायनगृह्यसूत्रे ऋत्विजामर्हणीयत्वेन मधुपर्कविधानमुक्तम्। आचार्यादीनामन्येषामर्हणीयानामुल्लेखस्तत्र न दृश्यते। लौगाक्षि-काठक-वाराह-गोभिल-द्राह्यायण-खादिर-छन्दोगसूत्रेषु पारस्करगृह्योक्ता एव षडर्घ्याः। गोभिले प्रियशब्दः अतिथिविशेषणत्वेनोपात्तः। ततश्च प्रियोऽतिथिर्मधुपर्केणार्हणीय इति स्पष्टीभवति।

कौशिकगृह्यसूत्रे पंचानां मधुपर्कार्हणाय सूत्रितम्, एष आचार्यकल्प एष ऋत्विक्कल्प एष संयुक्तकल्प एष विवाहकल्प एषोऽतिथिकल्पः, इति।[४२] ते च पंच आचार्य; ऋत्विक्, संयुक्तः, वैवाह्यः अतिथिश्चेति। अत्र कल्पशब्दो मधुपर्कार्हणविधिपरः। आचार्यो नाम उपनयनपूर्वकं वेदाध्यापयिता। तथा च याज्ञवल्क्यः,[४३] उपनीय ददद् वेदमाचार्यः स

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

उदाहृतः इति। निरुक्ते यास्केन आचार्यशब्दस्य निर्वचनानि त्रीणि कृतानि।[४४] तेषु आचारं ग्राह्यतीत्येकम्। उपनयनानन्तरं शौचाचार-शिक्षणस्य प्रथमत्वात् तमेव शिक्षणमालक्ष्य आचारं ग्राह्यतीति निर्वचनम्। आचिनोति अर्थानीति द्वितीयं निर्वचनम्। अर्थशब्दोऽत्र शास्त्रीयपदार्थ-परः। शास्त्रीयपदार्थश्च वेदाक्षरग्रहणरूपः, वेदार्थज्ञानरूपः, वैदिकप्रयोग-रूपः, वेदविचाररूपश्चेति बहुधा भवितुमर्हति। सर्वेऽप्यमी पदार्थाः शिष्यमेधामालक्ष्य आचार्येण स्वविवेकसन्दृब्धरीत्या शिष्यबुद्धावाचीयन्त इति अर्थानामाचयनकर्तृत्वादाचार्य उच्यते। आचिनोति बुद्धिमिति वेति तृतीयं निर्वचनम्। शिष्यस्य बुद्धिमितस्ततो विप्रकीर्णामपि आचार्यः स्वपाठनकौशलेन संगृह्णाति इति बुद्धेराचयन कर्तृत्वादाचार्यत्वम्। त्रीण्यपि निर्वचनानि परस्परमविरुद्धानि वेदाध्यापयितरि समन्वयन्ति।

ऋत्विग् लक्षणं हरिहरेण श्रौतस्मार्तादिकर्मार्थं वृतो ब्रह्मादिरित्युक्तम्। गदाधरस्तु यो दक्षिणापरिक्रीतः कर्माणि करोतीति विशिष्टव्याख्यानमाह। ऋतीऋती याजयतीति ऋत्विक् शब्दस्य व्युत्पत्तिः। ऋतुशब्दस्य वीप्सा यजमानस्य कर्तव्यक्रियायाः कालवाचिका। यः ऋतुः कालो जायानाम्- इत्यत्र ऋतुशब्दस्य कालवाचित्वेन निरुक्ते उल्लेखात्।[४५] न तु वसन्ता-द्यृतुवाची ऋतुशब्दः, षट्सु ऋतुषु कस्या अपि विशेषक्रियायाः विध्यभावात्।

श्रौतस्मार्ताद्यनुष्ठेयकर्मसु दक्षिणया परिक्रीतस्य क्रियाकुशलस्याधीत-वेदस्य ब्राह्मणस्य ऋत्विक्त्वं भवितुमर्हति। वैतानाग्निपक्वस्य भक्षप्रति-षेधहेतुना ब्राह्मणानामेवर्त्विक्त्वं, ब्राह्मणा ऋत्विजो भक्षप्रतिषेधादितरयोः इति कात्यायनेन स्वसूत्रे साधितम्।[४६] स्मार्तकर्मणि ऋत्विजां गृह्याग्नि-पक्वस्य लौकिकाग्निपक्वस्य वा जातिं पुरस्कृत्य भक्षणं न निषिध्यते। अथापि याजनस्य ब्राह्मणकर्मसु एवोपदेशाद् भूदेवत्वेन ब्राह्मणानामेव यज्ञे भागित्व-श्रुतेः ब्राह्मणानामेवार्त्विज्येऽधिकारः। पौराणेषु तान्त्रिककर्मस्वपि ब्राह्म-णानामेवार्त्विज्येऽधिकारः श्रौतस्मार्तवदेव सिद्धं स्वीक्रियते। ब्राह्मण-वर्णत्वेनार्त्विज्याधिकारे विहितेऽपि स्त्रीणामार्त्विज्यं न शास्त्रसम्मतम्। ऋत्विग्विशेषणत्वेन पुंस्त्वस्य विवक्षितत्वात्। तेन साम्प्रतिके युगे स्त्रीणां भूसुरेतराणां च ऋत्विक्कर्मणि नियुक्तिरज्ञानमूलिकैव। सा च कर्मवैगुण्येन साकं कर्तृकारकयोरप्युभयोरनिष्टोत्पादनायाल भवति।

संयुक्त इत्यस्य कल्पान्तरोक्तः प्रियोऽर्थः। युजिर् योगे धातुः। सम्यक्

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderab

योगो यस्य स संयुक्तः। स च सौमनस्येन भवितुमर्हति। प्रियशब्दश्च योनिना असम्बद्धस्यैवाभिधाने न संकुचितः। श्वशुरमातुलादीनामपि साहजिकप्रियत्वात्। एवं च गृह्यान्तरोक्ताः[४७] श्वशुरपितृव्य मातुला अपि प्रियत्वेनानुगृह्यन्ते। कौशिकोक्तः संयुक्तशब्दस्तु प्रियादपि व्यापकः। यदि हि पितृव्यश्वशुरमातुलादयः स्वस्वभाववशात् तत्स्वभाववशाद् वा प्रियत्वेन नानुमन्यन्ते, तथापि योनिसंयुक्तत्वात् तेषां मधुपर्कापचितिः कर्तव्यैवेति कौशिकाचार्यस्य विशेष आशयः प्रतिभाति संयुक्तशब्देन। तत्पूर्वं श्वशुरादीनां प्रियत्वे संयुक्तत्वेऽपि विवाहात् परमेव तेषामर्चनम्। तत्पूर्वं तु वैवाह्यत्वात् श्वशुर एव वरं सक्रमर्चयति विशेषोक्तेः।[४८] समानजातीय उत्कृष्टजातीयो वा प्रिय एव मधुपर्केणार्हणीय इति पारस्करसूत्रभाष्य-कर्तृणां मतम्। काठकगृह्ये तु देवपालः यो यस्य प्रियो गुणोत्कर्षेण इति प्रियशब्दं व्याचख्यौ इति[४९] दिक्।

एष विवाहकल्प इत्यस्य विवाहे मधुपर्कविधिः करणीय इत्यक्षरार्थः। विवाहे वरेण सहागतानां न सर्वेषां वारयात्रिकाणां मधुपर्केणार्हणम्, किन्तु विवाहात् पूर्वं कन्याग्रहीतुर्वरस्यैव पूजनम्। सूत्रान्तरेषु वैवाह्यस्यैव पूजनविधानैकवाक्यत्वात् शिष्टाचारानुग्रहाच्च।

अतिथिस्तु न विद्यते आगमनतिथिर्यस्येति व्युत्पत्त्यार्थापयितव्यः, स च स्ववर्णावरो न भवति चेत्तदा पूज्यः। ऐतरेयब्राह्मणेऽतिथिशब्दस्य महनीयार्थत्वे सिद्धान्तितत्वात्। एवं चात्र अतिथिशब्दो योगरूढ इति ज्ञेयम्।

मधुपर्कभेदाः

विभिन्नेषु गृह्यधर्मसूत्रेषु मधुपर्कद्रव्याणां भेदेन सविशेषं संज्ञाभेदो नावलोक्यते। कौशिकगृह्यसूत्रे तु द्रव्यभेदेन मधुपर्कस्य संज्ञाः काश्चन विशिष्यन्ते। एताश्चात्र संज्ञाः नव। प्रतिसंज्ञं च द्रव्यभेदः। पारस्कर-गृह्यसूत्रे मधुपर्के दधि मधु घृतं चेति त्रीणि द्रव्याणि[५०] सन्ति। परं कौशिकगृह्यसूत्रे नवविधेष्वपि मधुपर्केषु प्रत्येकत्र द्रव्यद्वयमेव दृश्यते। द्रव्यद्वयत्वादेतेषां बौधायनदिशा द्विवृत्त्वं भवति। अन्यगृह्येष्वपि द्रव्य-द्वयात्मको मधुपर्को दृश्यते। अस्माभिः स्पष्टप्रतिपत्तये मधुपर्कीयद्रव्य-संख्यामादाय बौधायनापस्तम्बसूत्रोक्तदिशा एकवृद्-द्विवृत्-त्रिवृत्-चतुर्वृत्-पांक्तविशेषणान्युपादाय मधुपर्कभेदा उपस्थाप्यन्ते।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

१. एकवृन्मधुपर्कः—बौधायनेन मधुनः एकस्यैव द्रव्यस्य मधुपर्कं उक्तः। तत्र केवलमेष विशेषो यत् पवित्रेण मधु पावयित्वा देयमिति। पवित्रं हि कुशपर्णात्मकं द्विदलं वा भवति। एकदृश्यं मधुपर्कः अर्हणीयानुक्तत्वात् सर्वत्र प्रयोक्तुं शक्यते। अयमेकवृन्मधुपर्क बौधायनातिरिक्तसूत्रेषु न दृश्यते। एकविध एव च समुपलभ्यते।

२. द्विवृन्मधुपर्काः—यत्र द्रव्यद्वयं मधुपर्के भवति स द्विवृन्मधुपर्कः। कौशिकगृह्ये नवविधा अपि मधुपर्काः द्विवृत एव। एतदतिरिक्ताः केचन द्विवृती मघुपर्काः सूत्रान्तरेषु दृश्यन्ते। आपस्तम्बगृह्ये दधि सर्पिश्चेति द्रव्यद्वयेनापि मधुपर्क उक्तः। तत्र मध्वलाभे सर्पिषः प्रयोगो विहितः। गोभिलपुत्रेण बौधायनेन च मधुना पयसा चेति द्रव्यद्वयेनापि द्विवृन्मधुपर्कः उपदिष्टः। एवं हि संहत्य द्वादश द्विवृतो मधुपर्का भवन्ति। बौधायने आपस्तम्बे च द्विवृन्मधुपर्के अर्हणीयस्य कर्मणः व्यक्तेर्जातेर्वा विशेषानुक्तेः सर्वत्र प्रयोक्तुं शक्यते। गोभिलपुत्रेण कृतान्नं मधु चेति द्रव्यद्वयेन अन्यत्रानुक्तो द्विवृन्मधुपर्कं उक्तः। पारिव्राजके मधुपर्के पिण्डपदेन कृतान्नं ग्रहीतव्यम्। तथापि तत्र कौशिकेन तैलग्रहणादयं तस्माद् भिन्नः।

३. त्रिवृन्मधुपर्को—बौधायनापस्तम्बकात्यायनगोभिलपुत्रादयः दधि मधु आज्यं चेति द्रव्यत्रयेण त्रिवृतं मधुपर्कमुपदिशन्ति। सम्प्रति मघुपर्कार्हणे दधिमध्वाज्यद्रव्यैः त्रिवृदेव मधुपर्कःश्रौतस्मार्तकर्मसु प्रयुज्यते। बौधायनेन द्विवृति मधुपर्के पयसो द्रव्यस्य विधानात् तदनुसृत्य घृतस्य तृतीयस्य द्रव्यस्य निर्देशाद् दधि पयः घृतं चेति द्रव्यत्रयात्मकस्य मधुपर्कस्यापित्रिवृत्वम्। अयं द्वितीयस्त्रिवृतो भेदः।

४. चतुर्वृन्मधुपर्कः—चतुर्वृतो मधुपर्कस्य बौधायनातिरिक्तसूत्रग्रन्थेषु नोपदेशो दृश्यते। बौधायनेन द्विवृति मधुपर्के दधि पयो वा विकल्पितमस्ति। तदेतद् द्रव्यद्वयमपरिहार्यत्वेन गृह्यते चेत् चतुर्वृन्मधुपर्को भवति। अर्थान्मधु दधि पयः आज्यमिति चत्वारि द्रव्याणि चतुर्वृन्मघुपर्के भवन्ति।

५. पांक्तो मधुपर्को—आपस्तम्बेन, दधि मधु घृतं धानाः सक्तवः इति पंचानां द्रव्याणां मधुपर्कार्हणयोगे पांक्तमधुपर्कत्वमुक्तम्। वैदिके साहित्ये पंक्तिशब्दः पंचसंख्यानां व्यवह्रियते। छन्दःशास्त्रे, अक्षरपंक्तिः पंचकाश्चत्वारः—इत्यत्र पंक्तिच्छन्दसि पंचाक्षरसंख्या ग्राह्यत्वेनोपदिष्ठेति

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderab

पंक्तिशब्देन पंचसंख्याबोधः अष्टौ वसव इति सूत्रन्यायमनुसृत्य बोध्यः। बौधायनस्तु अपरमपि पांक्तं मधुपर्कमाह। तत्र मधु दधि पयः घृतम् आपः इति पंचद्रव्याणि। अर्हणीयविशेषानुक्तेरयमपि सर्वत्र कर्तुं शक्यते। आचारेन्दी तृतीयविधोऽपि पांक्तो मधुपर्को दृश्यते। तथा हि—

दधिसर्पिर्जलं क्षौद्रं सितेत्येभिस्तु पंचभिः।
प्रोच्यते मधुपर्कोऽयं सर्वदेवौघतुष्टिदः॥

अत्र बौधायनोक्त पांक्तमधुपर्कस्य पयसः स्थाने सिता गृहीता वर्तते। तेन दधि मधु घृतं सिता उदकं चेति पंचद्रव्याणि भवन्ति। सर्वदेवतुष्टिदः इति वचनात् देवपूजायामस्य विनियोग इति स्पष्टं निश्चयः। रत्नकोशे जलस्य स्थाने पयसः समुपादानेन तुरीयविधः पांक्तो मधुपर्क उक्तः। तथा हि—

इक्षुर्मधु घृतं चैव पयो दपध सहैव तु।
प्रस्थप्रमाणं वा ग्राह्यं मधुपर्कमिहोच्यते॥

अत्र इक्षुशब्देन इक्षुविकृतिर्ग्राह्या सिता। पूर्ववचनसमन्वयात् इक्षोः साक्षात् सम्मिश्रणासम्भवाच्च। केचन अत्र रत्नकोशोक्तो पयः शब्दो न दुग्धवाची किन्तु जलवाच्येव, आचारेन्दी मानविकल्पे एवैतस्य वचनस्योपन्यासात् इति युक्ते। तदेतच्चिन्त्यम्। आचारेन्दी पांक्तमधुपर्कस्य पंचसु द्रव्येषु मानषैभ्यमपि उक्तम् यथा—

जलं तु सर्वतः स्वल्पं सितादधिघृतं समम्।
सर्वेषामधिकं क्षौद्रं मधुपर्के प्रयोजयेत्॥

अत्र यथाकथंचित् प्राप्त्यनुसारं पंचानां वैषम्येण साम्येन वा प्रस्थप्रमाणत्वं सम्पादनीयमिति सहैव इत्यनेन ज्ञाप्यते।

व्याख्याता, संस्कृत-विश्वविद्यालये,
वाराणसी

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

सन्दर्भबोधनम्

१. पा० गृ० १।३।३१
२. पा० गृ० १।३।३१
३. पा० १।४६३
४. अ० को० २।९।१०७ रा. भाष्ये
५. उणादि १।१८
६. पा० गृ० १।३।२०
७. मा० सं० ९।१८
८. अ० को० ३।३।१०३ रा० भाष्ये
९. मा० सं० ७।२
१०. श० ब्रा० ६।४।३।२
११. मा० सं० १३।२९
१२. मा० सं० १३।२८
१३. ऐ० ब्रा० २।२
१४. नि० पृ० ५८
१५. पा० ३।४।१
१६. नि० २।२।१
१७. पा० गृ० १।३।२०
१८. नि० १०।३१
१९. निघंटु २।१४
२०. कौ० ब्रा० ४।१२
२१. द्र० कौ० ९०।४
२२. द्र० आप० गृ० १३।१९ तात्पर्यदर्शनभाष्ये
२३. का० गृ० २४।१ भाष्ये
२४. का० गृ० २४।३
२५. पा० गृ० १।३।३१
२६. पा० गृ० १।३।२
२७. आप० गृ० १३।१९ भाष्ये
२८. आ० गृ० १३।२० भाष्ये
२९. आप० गृ० १३।१९ भाष्ये
३०. पा० गृ० १।३।२
३१. पा० गृ० १।३।३१
३२. आप० गृ० १३।१९ भाष्ये
३३. पा० गृ० १।३।३
३४. आ० गृ० १।२४।१.४
३५. आ० गृ० ३।९।८
३६. पा० गृ० १।३।१
३७. जै० न्या० मा० २।३।२
३८. का० श्रौ १।१।१२
३९. म० स्मृ० ३।३
४०. आप० गृ० १३।१९
४१. आप० गृ० १३।२०
४२. कौ० ९२।३२
४३. या० स्मृ० १।३४
४४. नि० १।४।१२
४५. नि० १२।४६
४६. का० श्रौ० १।२।८
४७. आ० गृ० १।२४।४
४८. तु० का० गृ० २४।१ देवपालभाष्ये
४९. का० गृ० २४।१ भाष्ये
५०. पा० गृ० १।३।५

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderab

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

तिङर्थविमर्शः

डा० श्रीबाल-शास्त्री

प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधस्वीकर्तॄणां नैयायिकानां राद्धान्ते स्थानिनो लादय एव वाचका, न तिबादय इति कृतिः संख्या काल इति त्रयोऽपि लकारस्यैवार्था न तिङामिति शक्ततावच्छेदकं दशलकारसाधारणं लत्वमेव, लाघवात् न तु तिप्त्वादिकम्। गच्छतीत्यादौ च आदेशेन तिङा आदेशिनो लकारस्य स्मरणादेव कृतिसंख्याकालानामन्वयबोधः। यत्र चादेशेनादेशिनो लकारादे न स्मरणं तत्र आदेशे तिबादो शक्तिभ्रमादेव बोधो न तु तत्र शक्तिः, गौरवापत्तेः।

तत्र व्यापारमात्रं धात्वार्थं इति वादिनां प्राचीन-नैयायिकानां मते १. देवदत्तो ग्रामं गच्छतीति कर्तृप्रत्ययस्थले तिङा आदेशिलकारस्मरणद्वारा कृतिसंख्याकालरूपार्था बोध्यन्ते। (संयोगानुकूलो) व्यापारो धात्वर्थः, संयोगरूपं फलं द्वितीयार्थः, तत्र द्वितीयार्थं संयोगरूपे फले प्रकृत्यर्थस्य ग्रामस्य निष्ठत्वसम्बन्धेनान्वयः। संयोगस्य चानुकूलत्वसम्बन्धेन धात्वर्थे व्यापारे, व्यापारस्य चानुकूलत्वसम्बन्धेन तिङोपस्थापितकृतो, तत्र चावच्छेद्यत्वसम्बन्धेन कालस्य, संख्यायास्तु प्रथमान्तार्थे देवदत्तादो [1]समवायेनपर्य्याप्त्यावान्वयः। तथा च ग्रामनिष्ठसंयोगानुकूलव्यापारानुकूलवर्त्तमानकालावच्छिन्नकृतिमानेकत्वविशिष्टो देवदत्त इति शाब्दबोधः।

२. देवदत्तेन गम्यते ग्रामः इति कर्मप्रत्ययस्थले फल-संख्या-कालास्तिङा बोध्याः। देवदत्तपदोत्तरतृतीयार्थः कर्तृत्वं, तच्च कृतिरूपमेव, तत्र प्रकृत्यर्थस्य देवदत्तस्य समवायसम्बन्धावच्छिन्नवृत्तित्वसम्बन्धेन, कालस्य च परिच्छेद्यत्वसम्बन्धेन, कृतेश्चाजन्यत्वसम्बन्धेन धात्वर्थव्यापारे, व्यापारस्य च तिङोपस्थिते फले संयोगरूपे, जन्यत्वसम्बन्धेन, फलस्य संख्यायाश्च समवायेन प्रथमान्तार्थे ग्रामेऽन्वयः। तथा च देवदत्त-

१. एकत्व संख्यायाः समवायेन, द्वित्वादीनां पर्य्याप्त्याऽन्वय इति विवेकः।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderab

निष्ठा या वर्त्तमानकालावच्छिन्ना कृतिः तज्जन्यो यो व्यापारः, तज्जन्यं यत्संयोगरूपं फलं, तदाश्रय एकत्वविशिष्टो ग्रामः इति शाब्दबोधः।

नव्यनैयायिकमते तु कर्तृप्रत्ययस्थले फलावच्छिन्नो व्यापारो धात्वर्थः, कृतिसंख्याकालास्तिङा बोध्याः। कर्मप्रत्ययस्थले च व्यापारावच्छिन्नं फलं धात्वर्थः, तिङ्बोध्याश्च फलसंख्याकालाः। तथा च १ देवदत्तो गच्छति ग्रामम् इत्यत्र द्वितीयार्थ आधेयत्वं, तच्च धात्वर्थैकदेशे फले स्वरूपसम्बन्धेन, फलावच्छिन्नव्यापारश्च परिच्छेद्यत्वसम्बन्धेन कालान्वितायां कृतौ जनकत्वसम्बन्धेन, कृतिः संख्या च प्रथमान्तार्थे देवदत्ते समवायेन, द्वितीयार्थाधेयतायां प्रकृत्यर्थभूतो ग्रामश्च निरूपितत्वसम्बन्धेनान्वेति। एवं च ग्रामनिरूपिताधेयतावान् यः संयोगः, तदनुकूलो यो व्यापारः, तज्जनिका वर्त्तमानकालावच्छिन्ना या कृतिः तद्वानेकत्वसंख्याविशिष्टो देवदत्त इति जायते शाब्दबुद्धिः।

२. देवदत्तेन गम्यते ग्रामः इति कर्मप्रत्ययस्थले च तृतीयार्थः कर्तृत्वं, तच्च कृतिरूपम्, तत्र प्रकृत्यर्थस्य देवदत्तादेः समवायसम्बन्धावच्छिन्नवृत्तित्वसम्बन्धेन, कालस्य च परिछेद्यत्वसम्बन्धेन, कृतेश्च धात्वर्थैकदेशे व्यापारे जन्यत्वसम्बन्धेन, धात्वर्थस्य व्यापारावच्छिन्नसंयोगरूपफलस्य संख्यायाश्च समवायेन प्रथमान्तार्थग्रामादावन्वयः। एवं च देवदत्तवृत्तिवर्त्तमानकालावच्छिन्नकृतिजन्यव्यापारावच्छिन्नसंयोगरूपफलाश्रय एकत्वविशिष्टो ग्रामः इति बोधः।

भाट्टमते भावना-संख्या-कालास्तिङर्थाः। फलमात्रं धात्वर्थः, तस्य च करणत्वेन भावनायामन्वयः। कर्तृप्रत्ययस्थले प्रथमार्थः कर्त्तृत्वं, कर्मप्रत्ययस्थले च तृतीयार्थः कर्त्तृत्वं, तच्च कृतिरूपमेव। तथा च कर्तृप्रत्ययस्थले, कर्मप्रत्ययस्थले चैकविध एव शाब्दबोधः। तथा हि चैत्रेण पच्यते तण्डुलः, चैत्रस्तण्डुलं पचतीत्यादौ प्रकृत्यर्थस्य देवदत्तादेस्तृतीयार्थ-प्रथमार्थ-कर्तृत्वे कृतिरूपे निष्ठत्वसम्बन्धेन, कर्तृत्वस्य च विक्लित्तिरूपे फले जन्यत्वसम्बन्धेन, अवच्छेद्यत्वसम्बन्धेनकालान्वितायां भावनायां फलस्य च करणत्वसम्बन्धेन, संख्यायाश्च प्रथमान्तार्थे चैत्र-तण्डुलादौ समवायेनान्वयः। तण्डुलपदोत्तरद्वितीयार्थः कर्मत्वं, तत्र निष्ठत्वसम्बन्धेन प्रकृत्यर्थ-तण्डुलस्य, कर्मत्वस्य च निरूपकत्वसम्बन्धेन भावनायामन्वयः। तथा च एकत्वविशिष्टचैत्रनिष्ठकृतिजन्यविक्लित्तिकरणिका वर्त्तमानकाला-

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

वच्छिन्ना ओदननिष्ठकर्मतानिरूपिका भावना इति प्रत्ययार्थभावनामुख्यविशेष्यको बोधः।

भावप्रधानमाख्यातम् इति यास्कवचनानुसारं धात्वर्थभावनामुख्यविशेष्यकबोधवादिनां वैयाकरणानां सिद्धान्ते तु संख्याविशेषः, कालविशेषः, कारकविशेषश्च तिङर्थः। तदुक्तं कौण्डभट्टेन 'तिङर्थस्तु विशेषणम्' इति कारिकांशव्याख्यावसरे 'तिङर्थः कर्तृकर्मसंख्याकालाः' इति। तत्र 'वर्त्तमाने लट्', 'लः कर्मणि च भावे' इत्यादिसूत्रे यद्यपि लकारार्थत्वेनैव कर्तृ-कर्मभावकालाः बोध्यन्ते तथापि उच्चारित एव शब्दः प्रत्यायको भवति नानुच्चारित इति भाष्यादनुभवबलाच्च आदेशार्थस्यैव स्थानिन्यारोप्य तत्तदर्थेषु उकारा विधीयन्ते। तथा चाभिहितं भूषणसारे 'बोधकथारूपां तिबादिनिष्ठां शक्ति तत्तत्स्थानित्वेन कल्पिते लकारे प्रकल्प्य कर्मणि कर्त्तरि च 'लः कर्मणी'ति सूत्रेण लकाराः विधीयन्ते, नकार-विसर्गादिनिष्ठां कर्म-करणादिबोधकताशक्तिमादाय शसादिविधानवत्' इति। लघुमञ्जूषायामपि :—'तत्र स्थानिनामर्था ऋषिभिः कण्ठत उक्ताः, आदेशानां च स्थान्यर्थाभिधानसमर्थस्यैवादेशता इति न्यायेन' इति।

तथा च फलं व्यापारश्च धात्वर्थ इति वादिनः प्राचीनवैयाकरणस्य मते १. चैत्रो ग्रामं गच्छति इति कर्तृप्रत्ययस्थले समवायेनैकत्वसंख्यान्विते तिङर्थभूते व्यापाराश्रये प्रथमान्तार्थस्य चैत्रादेरभेदेनान्वयः, तस्य (व्यापाराश्रयस्य) च निष्ठत्वसम्बन्धेन धात्वर्थभावनायामन्वयः। ग्रामपदोत्तरद्वितीयार्थः कर्मत्वं, तत्र प्रकृत्यर्थस्य ग्रामस्य वृत्तित्वसम्बन्धेनान्वयः। कर्मत्वस्य निरूपकत्वसम्बन्धेन धात्वर्थे फले, फलस्य च अवच्छेद्यत्वसम्बन्धेकालान्वितायां भावनायां धात्वर्थभूतायामनुकूलत्वसम्बन्धेनान्वयः। तथा च देवदत्ताभिन्नैकाश्रयवृत्तिः ग्रामनिष्ठकर्मतानिरूपकसंयोगानुकूला वर्त्तमानकालावच्छिन्ना भावना इति धात्वर्थभावनामुख्यविशेष्यको बोधः।

चैत्रेण गम्यते ग्रामः इति कर्मप्रत्ययस्थलेपि भावनामुख्यविशेष्यकबोधस्वीकारात्कर्तृप्रत्यस्थलसदृश एव शाब्दबोधः। भाव्यते अनेनासौ भावः=भावना=व्यापार इति करणव्युत्पत्या भावपदेन व्यापारस्यैव बोधात्। संख्यान्वयस्तु कर्तृप्रत्ययस्थले कर्त्तरि कर्मप्रत्ययस्थले कर्मणोति विवेकः।

कर्तृप्रत्ययस्थले फलावच्छिन्नो व्यापारो धात्वर्थः, कर्मप्रत्ययस्थले च

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderab

व्यापारावच्छिन्नं फलं स इति वादिनो नव्य-वैयाकरणास्तु भावप्रधान-माख्यातमिति'ति निरुक्ते भावपदं भाव्यतेऽनेनासौ भाव इति करण-व्युत्पत्या व्यापारबोधकं सदतपि भाव्यतेऽसौ भावः इति कर्मव्युत्पत्या फलपरमपीति स्वीकृत्य कर्तृ प्रत्ययस्थले व्यापारमुख्यविशेष्यकं, कर्म-प्रत्ययस्थले च फलमुख्यविशेष्यकं बोधं प्राहुः। तथा हि—

१. चौत्रो ग्रामं गच्छति इत्यत्र चैत्राभिन्नैकत्वाश्रयकर्तृको वर्त्तमान-कालावच्छिन्नो ग्रामनिष्ठकर्मतानिरूपकसंयोगानुकूलो व्यापार इति व्यापार-रूपभावर्विशेष्यकः, २. चैत्रेण ग्रामो गम्यत इति कर्मप्रत्ययस्थले च चैत्र-कर्तृक-वर्त्तमानकालावच्छिन्न-व्यापारजन्यः ग्रामाभिन्नैकत्वाश्रकर्मनिष्ठः संयोगे इति फलरूपभावविशेष्यकः शाब्दबोधस्तेषां मते। भट्टनागेशास्तु 'पञ्चकं धात्वर्थः' इति मतमाधित्य फलव्यापारयोरिव आश्रय-संख्या-कालानामपि धात्वर्थत्वमेव। व्युत्पत्तिवैचित्र्याच्चैकपदोपस्थापितानाम-प्यर्थानां परस्परमन्वयः। अन्तिमार्थात्रमस्य तिङ्क्षु एव द्योतकत्वमिति तदभावस्थले पाकः पक्त्वा इत्यादौ न तदर्थ वोधप्रसक्तिः। द्योत्यार्थस्य च सर्वत्र विशेषणत्वमेवेति सिद्धान्तादवशिष्टयोः फलव्यापाररूप धात्वर्थ-योरेवान्यतरस्यैव तत्र-तत्र (कर्मप्रत्ययस्थले कर्त्तृ प्रत्ययस्थले) विशेष्यत्व-मिति "भावप्रधानमाख्यातम्" इति यास्कवचनमनुवादकमेव, न विधाय-कम्। 'प्रकृतिप्रत्ययौ सहार्थं ब्रूतः, तयोः प्रत्ययार्थस्य प्राधान्यम्' इति वचनन्तु योऽर्थः प्रत्यये न शक्त्या वोध्यते तद्विषयकमेवनतु प्रत्ययेन द्योतितोऽपि योर्थः, तद्विषयकम्। अत एव 'अजा' इत्यत्र स्त्रीत्वविशिष्टोऽ-जपदार्थः इत्येवबोधो नत्वजगतं स्वीत्वमिति। स्वीत्वरूपार्थे द्योत्ये एव टापोविधानाट्टाव्रूपप्रत्यस्य स्त्रीत्वरूपार्थस्म विशेषणत्वस्यैवोचितत्वा दित्याहुः।

तिङर्थविषये तार्किक-वैयाकरणयोर्मतभेदविचारः

'फलव्यापारयोर्धातुराश्रये तु तिङःस्मृताः' इति कारिकानुसारं तिङः-फलाश्रयं कर्मणि, व्यापाराश्रये कर्त्तरि च शक्तिः। फलव्यापारयोर्धा-तुलभ्यत्वादाश्रयमात्रं तिङर्थः। ति अत्र तात्पर्यग्राहकं च 'लः कर्मणि च भावे चाकर्मकेभ्य' इति पाणिनीयसूत्रम् इति वैयाकरणाः। अत्र तार्किका इत्थं व्याहरन्तिः—

तिङः व्यापाराश्रये कर्त्तरि शक्तिस्वीकारे कृत्याश्रयत्वस्यैव कर्त्तृत्वेन

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

कर्तृत्वस्य च कृतिरूपतया, अनन्तानां कृतीनां शक्यतावच्छेदकत्व-स्वीकारे गौरवापत्त्या कृतावेव तिङां शक्तिरिति सिद्धान्त एव समीचीनः। अत्र मते सकलकृतिनिष्ठमेकमेव कृतित्वं शक्यतावच्छेदकमिति नास्ति-गौरवशंका।

रथो गच्छतीत्यत्र अचेतने रथादौ कृतेर्बाधात्तत्र तिङः व्यापारे लक्षणा, एवं घटं जानातीत्यत्र आश्रयत्वे, घटो नश्यतीत्यत्र प्रतियोगि-त्वेऽपि तिङः लक्षणा बोध्या। अत्र लक्ष्यतावच्छेदकानामनेकत्वाद् गौरवमप्रतिहतमिति तु न वाच्यम्। अतिरिक्तशक्तिकल्पनापेक्षया क्लृप्त-शक्यसम्बन्धरूपलक्षणायां लाघवात्।

अत्र च लट्त्वेन लकारो वर्त्तमानकालवाचकः, लत्वेन च व्यापारा-श्रायत्व-प्रतियोगित्वादिरूपार्थलक्षक इति शक्ततावच्छेदक-लक्षकतावच्छे-दकयोर्भेद उपगन्तव्यः। तेन च रथोगच्छतीत्यादौ लक्षणया व्यापार-रूपार्थस्योपस्थितावपि शक्त्या बोध्यस्य वर्त्तमानकालरूपार्थस्यानुपस्थित्या तदन्वयबोधो न स्याद्, युगपद्वृत्तिद्वयविरोधादिति शंकापि समाहिता।

नचैवं कृतौ शक्तिः व्यापारादौ लक्षणा इति स्वीकारे शक्तिज्ञानजन्य-कृत्युपस्थितिवल्लक्षणाज्ञानजन्यव्यापाराद्युपस्थितेरपि शाब्दबोधे पृथक्-पृथक् हेतुत्वकल्पनमावश्यकमिति महद्गौरवमिति तु नाशंकनीयम्। तत्पदजन्यतदर्थविषकशाब्दत्वावच्छिन्नं प्रति तत्पदनिष्ठवृत्तिज्ञानाधीन-तदर्थविषयिण्युपस्थितिर्हेतुरित्येकविधकार्यकारणभावेनैवेष्टसिद्धौ पृथक् हेतुत्वकल्पनाया अनावश्यकत्वात्। घटपदात्समवायसम्बन्धिन आकाशस्य स्मरणे तच्छाब्दबोधवारणाय वृत्तिज्ञानजन्येति विशेषणमावश्यकम्।

ननु वृत्तिज्ञानजन्योपस्थितस्यैव शाब्दबोधविषयत्वस्वीकारे आकांक्षा भास्यानां भेदाभेदादिपदार्थद्वयसंसर्गाणां शाब्दबोधविषयत्वं न स्यादिति महानुपप्लव इति चेन्न। पटादिपदात् पटत्वप्रकारक-पटविशेष्यकबोधस्येव पटप्रकारक-पटत्वविशेष्यकबोधवारणाय तत्पदजन्यतत्प्रकारकतद्विशेष्यक-शाब्दबुद्धित्वावच्छिन्नं प्रति तत्पदनिष्ठ-वृत्तिज्ञानाधीन-तत्प्रकारक-तद्वि-शेष्यकोपस्थितेः कारणत्वं वाच्यमेव। तथा च पदार्थद्वयसंसर्गनिष्ठ-शाब्द-बोधीयविषयतायाः किञ्चिन्निष्ठप्रकारतानिरूपितविशेष्यतानात्मकतया आकांक्षाभास्यपदार्थद्वयसंसर्गाणां वृत्तिज्ञानाधीनोपस्थित्यभावेपि शाब्द-बोविषयत्वे बाधकाभावात्। संसर्गविशेषबोधे च तात्पर्यज्ञानस्य नियामक-

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderab

त्वान्न यस्य कस्यापि संसर्गस्य यत्र कुत्र चिद्भानम् इति नाति प्रसक्तिदोषोऽपि।

अत्र वैयाकरणा इत्थं समादधते:—तिङः कर्त्तृवाचकत्वाभावे तण्डुलस्य कर्मणः कर्त्तृत्वविवक्षायां भावे प्रत्यये पच्यते तण्डुलेन इत्यादौ 'कर्मवत्कर्मणा तुल्यक्रिय' इति सूत्रेण कर्मवद्भावात्तण्डुलपदाद्द्वितीयापत्तिः स्यात्। वैयाकरणमते तु 'लकारवाच्य एव कर्त्ता कर्मवद्भवती'त्यर्थेन भावार्थकलकारेण कर्त्तृस्तण्डुलस्यानुक्तत्वान्नात्र द्वितीयाप्रसंगः। तदुक्तं सिद्धान्तकौमुद्यां 'ननु पच्यते ओदनेन इति भावे लकारे कर्त्तृर्द्वितीयास्यादस्मादतिदेशादिति चेन्न। लकारवाच्य एव कर्त्ता कर्मवत्। 'व्यत्ययो वहुलं ल्लिङ्याशिष्यङिति द्विलकाराल्ल इत्यनुवृत्तेः। भावे प्रत्यये च कर्त्तुर्लकारेणानुपस्थितेः। अत एव कृत्यक्तखलर्थाः कर्मकर्त्तरि न भवन्ति, किन्तु भावे एवेति। नैयायिकमते तु भेत्तव्यं कुसूलेनेत्यत्रापि कर्मवद्भावे प्राप्ते कुसूलेनेति अत्र द्वितीया पत्तिरप्रतिहतैव।

न च लकारवाच्या या कृतिः तदाश्रयः कर्त्ता कर्मवत्स्यादित्यर्थेन नैयायिकमते लकारस्य विक्लित्तिरूपफवाचकत्वेपि कृतिवाचकत्वाभावात्, स्तदाश्रयत्वस्याप्यसंभवाच्च। न च लकारार्थसंख्याश्रयः कर्मकर्त्ता कर्मवदित्यर्थः, तिङः संख्यार्थकत्वेपि लकारस्य संख्यावाचकत्वाभावात्। पच्यमानस्तण्डुल इत्यत्र लकारेण संख्याया अनुपस्थानात्कर्मवद्भावानापत्तेश्च।

किं च लक्षणायाः शक्यानुसंधानपूर्वकत्वाल्लक्षणायां लाघवमपि निर्युक्तिकम्। अत एव निषादस्थपतिं याजयेद् इत्यत्र निषदश्चासौ स्थपतिश्चेति कर्मधारयो न तु निषादानां स्थपतिरिति तत्पुरुषः, पूर्वपदे लक्षणाप्रसंगादिति संगच्छते। अत एव राजपुरोहितो स्वाराज्यकामो यजेयाताम् इत्यत्र राजा च पुरोहितश्चेति द्वन्द्वो न तु राज्ञः पुरोहितो इति तत्पुरुषो लक्षणाप्रसंगादित्युक्तिराधत्ते बलम्। अत एव च उद्भिदा यजेत पशुकामः इत्यत्र उद्भिच्छब्दः कर्मनामधेयम्, उद्भिच्छब्देन खनित्रादिकं गृहीत्वा उद्भिद्वतायागेन इत्यर्थाश्रयणे तु मत्वर्थलक्षणापत्तिरिति उद्भिदधिकरणमपि संगच्छते।

कृत्याश्रये व्यापाराश्रये वा शक्तिस्वीकारे अनन्तकृतिव्यापाराणां शक्यतावच्छेदकत्वे गौरवात् कृतावेव शक्तिः, 'लः कर्मणि च' इति सूत्रे

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

कर्तृ-कर्मपदे कर्तृत्व-कर्मत्व परे, तथा च न मुनिवचनविरोध इति नैयायिकोक्तिरपि न विचारसहा। कर्तृ-कर्मनिष्ठस्याश्रयत्वस्य कृति-फलभिन्नस्य कृति-फलसमानाधिकरणस्यैकस्य जातिरूपस्याऽखण्डोपाधिरूपस्य वाऽतिरिक्तस्यैववैयाकरणमते स्वीकारेण शक्यतावच्छेदकानन्त्यदोषवारणात्।

न च आश्रयत्वस्य वैयाकरणाभिमतस्य व्यापार-फलनिरूप्यतया देवदत्ते व्यापारसत्वे तन्निरूपितमाश्रयत्वं, व्यापाराभावे आश्रयत्वाभाव इति आश्रयत्वस्य कादाचित्कत्वेन अनित्यत्वापत्तौ जातिरूपस्यतस्यातिरिक्तस्य कल्पना नैव सम्भवति, जातेश्च नित्यत्वादिति वाच्यम्। कौमाराद्यवस्थानां सकृदाख्यातनिर्ग्राह्यत्वे सति आकृतिग्रहणत्वाज्जातित्वमाश्रित्य कुमारीभार्य इत्यत्र 'जातेश्च' इति पुंवद्भावनिषेधं स्वीकुर्वतां भाष्यकृतां मते अनित्याया अपि जातेः स्वीकारात्। अत एव सिद्धान्तलक्षणे दीधितिकृतापि अधिकरणत्वादीनाम् अतिरिक्तत्वं स्वीकृतम्। अन्यथा तस्य अधिकरणस्वरूपत्वे आधेयरूपत्वे वा परस्परासंयुक्तघटभूतलदशायामपि भूतलं घटवद् इति प्रत्ययप्रसंगः। अथवा आश्रयत्वमपि नित्यमेवास्तु, तस्योत्पाद-विनाशप्रतीतिस्तु निरूपकाश्रयरूपोपाधिनिष्ठोत्पादविनाशजन्या, न वास्तविकीति आश्रयत्वस्यैकस्य शक्यतावच्छेदकत्वे गौरवाभावात्।

किं च कर्त्तरि कृत् इत्यतोनुवृत्ते कर्त्तरीति पदे भावप्रधाननिर्देशमाश्रित्य कर्त्तृत्वे अर्थात् कृतौ लकारविधाने पचमानं चैत्रं पश्येत्यादावपि शानचा कृतिरूपार्थबोधे पाककृत्यभिन्नं चैत्रं पश्येति बोधापत्तेः, नामार्थयोरभेदान्वयबोधनियमात्पाककृतेराश्रयत्वरूपभेदसम्बन्धनान्वयासंभवात्। न च शब्दाधिकारानुरोधात् 'कर्त्तरि कृद्' इति सूत्रे कर्त्तरीति पदं कृत्याश्रयपरमेव, तथा च शानजादीनां कृत्वेन तेषां कर्त्तृरूपार्थवाचकत्वमेतदनुशासनबलादक्षतमेवेति पाककृतिमदभिन्नं चैत्रं पश्येति बोधे न किमपि बाधकमिति वाच्यम्। नैयायिकमते स्थानिनामेव वाचकत्वेन कृतिरूपलकारस्थान्यर्थेन निराकांक्षतया शतृशानजादिलादेशविषये कर्त्तरिकृद् इत्यस्यानुपस्थितेः। अन्यथा पाकक्रियानिरूपितकर्मत्वाश्रयाभिन्नमोदनं पश्य इत्यन्वयबोधके पच्यमानमोदनं पश्य इत्यत्रापि कर्त्तरि कृद् इत्यस्य प्रवृत्यापत्तौ पाककर्त्रभिन्नमोदनं पश्येत्यनिष्टान्यवबोधापत्तेः। पचमानं

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderab

पचन्तमित्यादौ लकारस्य कर्त्तरि लक्षणेति ब्रूषे चेत्तर्हि पाकाश्रयाभिन्नो देवदत्तः इति बुबोधयिषया पाकपदस्य तु, अनुशासनाभावेपि यथेच्छं तद्वति लक्षणामाश्रित्य पाको देवदत्तः इत्यस्यापि प्रयोगापत्तेः।

किं च युष्मदिसमानाधिकरणे मध्यमः, यु अस्मदि समानाधिकरणे उत्तमः, इति मध्यमोत्तमादिपुरुषव्यवस्थासंपादनाय, अभिहिते कर्त्तरि प्रथमेति उक्तानुक्तत्वव्यवस्थासिद्धये च तिङः कर्त्तृवाचकत्वमावश्यकम्, अन्यथा देवदत्तो गच्छति ग्रामम्, त्वया गम्यते ग्रामः इत्यादौ इष्टपुरुष-प्रथमा-द्वितीया-तृतीयादिव्यवस्था न स्यात्। अनभिहिते इत्यस्य अनभिहितसंख्याके कर्त्तरि तृतीया इत्याद्यर्थाश्रयणेपि नेष्टसिद्धिः, पक्तव्यस्तण्डुलः, शत्योश्वः, प्राप्तोदको ग्रामः, इत्यादौ कृत्तद्धितसमासेषु संख्याभिधानाभावात्कर्मगतसंख्याया अनभिधानेकर्मणि द्वितीयेति द्वितीयापत्तेः। नच अस्तीत्यस्याध्याहारेण तिपा संख्याभिधानं संभवतीति वाच्यम्। नष्टः, गतः, स्थितः इत्याद्यध्याहारे संख्यानभिधानस्य स्थितत्वात्। वैयाकरणोयं चैत्रो न मीमांसकः, इत्यादौ पीतमिदं वस्त्रं न श्वेतम् इत्यादौ इव क्रियापदाध्याहारस्य अनावश्यकतया अत्र आख्यातेन, शाब्दिकः इत्यत्र 'शब्ददर्दुरं करोतीति' विहितेन ठक्प्रत्ययेन वा कर्त्तृगतसंख्याया अनभिधानात्तृतीयापत्तेश्च। तस्मादनभिहिते कर्त्तरि तृतीयेत्याद्यर्थस्यैव स्वीकरणीयत्वादुक्तानुक्तव्यवस्थार्थं तिङां सर्वत्र आश्रयवाचकत्वमावश्यकमिति वैयाकरणमतमेव युक्तसहमिति संक्षेपः।

संस्कृत प्रवक्ता, सागर, मध्यप्रदेशः

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

नाट्यसन्धिलक्षणम्

रेवाप्रसादद्विवेदी

प्रथितमेव हि नाट्यस्य पञ्चसन्धित्वं, तस्य मुखं, प्रतिमुखं, गर्भः, विमर्शः, निर्वहणमि' त्येतैः पञ्चभिः सन्धिभियु'क्तत्वात्। अत्र किं तावत् संधित्वमिति जिज्ञास्ये 'सन्धीयमानेतिवृत्तखण्डत्वमि'-ति भरत—भोजाभिनवगुप्तसागरनन्दिविश्वनाथाः,[1] तदिव 'संबन्धविशेषत्वमपि' तदिति धनञ्जयः 'अवस्थार्थप्रकृतियोगत्वमेव तदि'ति तु धनिक सिंह-भूपाल—विद्यानाथाः।

तत्र प्रथमे सम्बन्धत्वमेव प्रतियोगितायाअवच्छेदकम्, इतिवृत्तखण्डत्वं चानुयोगितायाः। ततश्च सम्बन्धविशेषत्वावच्छिन्नप्रतियोगिता—निरूपितेतिवृत्तखण्डत्वावच्छिन्नानुयोगिताकः संसर्गविशेषः सन्धिः, तत्त्वं च सन्धित्वमिति सन्धिलक्षणम्। अपरत्र च प्रतियोगितायाअप्यवच्छेदक-मर्थत्वम्। अर्थत्वं च प्रयोजनत्वम्। प्रयोजनानि च द्विविधानि मुख्या-न्यमुख्यानि च। तत्र गौणमुख्ययोर्मुख्यस्यैव प्राधान्यमिति मुख्यार्थत्वमे-वानुयोगितताया गौणार्थत्वमेव च प्रतियोगिताया अवच्छेदकतया नेयम्। एवं गते गौणार्थत्वावच्छिन्न–प्रतियोगिता–निरूपित–मुख्यार्थत्वावच्छिन्ना-नुयोगिताकः संसर्ग एव सन्धिः, तत्त्वं च सन्धित्वमिति निरूपणीयम्। अत्रापि मुख्यमेकं गौणानि पुनरनेकानीति गौणानामपि कल्पनीय एव प्रतियोग्यनुयोगिभावः परस्परम्। स चासौ पूर्वनिरूपितत्वं परस्येति नीत्या प्राप्तव्यवस्थः पूर्ववर्त्ति-गौणार्थत्वे प्रतियोगितावच्छेदकत्वमिवोत्तर-वर्तिगौणार्थत्वेऽनुयोगितावच्छेदकत्वमुन्नाययति। एवं च पूर्ववर्त्तिगौणा-र्थत्वावच्छिन्ना प्रतियोगिता, उत्तरवर्त्तिगौणार्थत्वावच्छिन्नानुयोगिता

१. इतिवृत्तं तु नाट्यस्य शरीरं परिकल्पितम्।
पञ्चभिः सन्धिभिस्तस्य विभागः संप्रकल्पितः॥ भरतः—ना० शा० १९.१
कथाशरीरभागानां मुखादयः पञ्च व्यपदेशाः। शृ० प्र० १२.
'सन्धय इतिवृत्तखण्डाः। ध्वन्या० लोचने ३.१४
विश्वनाथः—इतिवृत्तस्य भागाः स्युः पञ्च सन्धयः॥ साहित्यदर्पणे ६७४

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderab

चेत्येतदुभयाभिन्नप्रतियोगितानिरूपितत्वं मुख्यार्थगतायां संसर्गीयायामनुयोगितायामिति चातुरस्त्रीसुभगा निरूपणा। उक्तं चैतद्धनञ्जयेन—'अन्तरैकार्थसंबन्धः सन्धिरेकान्वये सती'—ति, धनिकेन चात्रावलोकमातन्वानेन—'एकेन प्रयोजनेनान्वितानां कथांशानामवान्तरैकप्रयोजनसंबन्धः सन्धिरि'—ति [दशरूपकस्य १.२३]। तत्र एकत्वं मुख्यत्वम् 'एके मुख्यान्यकेवला' इति प्रमाणात्। कथांशत्वं च कार्यरूपत्वं, कार्यं च प्रयोजनरूपमि'—ति धनिकस्याप्यविसंवादो धनञ्जयेन। सन्धीयमानत्वपक्षे पुनर्धनञ्जयस्यैवमुक्तिः—

आद्यन्तमेवं निश्चित्य खण्डशस्तद्विभज्य च।
खण्डशः सन्धिसंज्ञांश्च विभागानपि खण्डयेत्।
—[दशरूपके ३.२५–२६]

अस्ति चास्य पक्षद्वयस्याप्यभ्युपेयत्वं तत्त्वव्यवहाराभ्याम्।[१] तथाहि—तत्त्वदृशा सम्बन्ध एव सन्धिः व्यवहारदृशा पुनः सन्धीयमानम्। अस्ति च व्यवहारः 'सुश्लिष्टमिद पुण्डरीकम्, सुसंदृब्धैषा स्त्रक्, चर्चितचन्दनमिदमलिकम् इति। सम्बद्धानामेवात्र प्रशंसा, न तु संबन्धमात्रस्य तदविनाभूतस्य। तत्त्वदृशा पुनः प्रश्नः सन्धीयमानत्वमिति कोऽर्थः? सन्धिमत्त्वमिति चेत् तत्र प्रकारीभूतः सन्धिरेव भावप्रत्ययार्थः। कीदृशं नु सन्धीयमानत्वं सन्धिं विरहय्य। एवं च सन्धौ सत्येव कथांशानां सन्धीयमानत्वस्य प्रत्ययः, विशिष्टबुद्धौ विशेषणज्ञानस्य निमित्तत्वात्।

अथ प्रश्नः। यदि सन्धीयमानानां वृत्तखण्डानां तत्सन्धीनामेव वा प्रबन्धे घटकत्वं कथं सन्धिनाम्नैव नैषां व्यपदेशः काण्ड–पर्व–नाम्नेव रामायणमहाभारताद्यनुच्छेदानाम्, कथं चाभिषिच्यतेऽत्राङ्कशब्दः 'प्रथमोऽङ्क' इति 'द्वितीयोऽङ्क' इति 'तृतीय–चतुर्थ–पञ्चमाद्यङ्क' इत्यादिना क्रमेण। कथमत्र नोच्यते 'अयं मुखसन्धिः, अयं प्रतिमुखसन्धिरि'त्यादिकम्। अत्रोच्यते नियामकभेदोऽत्र हेतुर्भेदे। महाभारतादिषु घटनाक्रमः, नाट्ये पुनः कालावधिरेव नियामकोऽनुच्छेदानाम्। 'एकाहाचरितस्य' कथाभागस्याङ्कनाम्ना व्याहाराद् एकाहपरिमितस्य कथांशस्याङ्कपदेनैव प्रत्यायनमुचितं नाटकेषु। नास्ति चाङ्कनियामकत्वं सन्धिषु। वैपरीत्ये पुनर्न द्राघीयश्छिद्रम्। एवं च दशभिरप्यङ्कैः पञ्चैव प्रस्तूयन्ते प्रकरणादिषु सन्धयः, एकेनापि चाङ्केनैकाधिका भाणादिषु। नास्ति चात्राङ्कसन्ध्योः संख्यासंवाद–निर्वन्धः।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

त इमे सन्धीयमानाः कथांशा नायकयत्नमुखेन फलदशा-मुखेन च भूयोऽपि द्विधा विभज्यन्ते व्याहाराय 'अवस्था' इति 'अर्थप्रकृतिरि' ति च। अत्र फललाभाय नायकस्य यत्नोऽवस्थेत्युच्यते तेन च फले समुपजायमानः समुपलक्ष्यमाणो वा विपाकोऽर्थप्रकृतिरिति। यथेदं तदेतयोरङ्गनामभिरेव स्पष्टम्। तथाहि अवस्थाया 'आरम्भः, यत्नः, प्राप्त्याशा, नियताप्तिः, फलागम' इत्येतानि पञ्चाङ्गानि। यत्नस्यैवैतेषु प्राधान्यम्। यत्नश्च कृतिः। सा च द्विविधा मानसी शारीरी चेति। तत्र या मानसी तस्या आरम्भ इति व्याहारः, अन्यासां च यत्नादिक इति। एवमेव 'बीजम्, बिन्दुः, पताका, प्रकरी, कार्यमि'—ति पञ्चैवाङ्गान्यर्थप्रकृतेः। तत्र बीजमेव फलरूपेण परिणमति, भवति फलं बीजगर्भम्। मध्ये यस्तस्य परिणामः स एवाङ्कुरात्मना बिन्दुतां, काण्डात्मना पताकात्वं, पत्रपुष्पात्मना प्रकरीत्वं, फलात्मना च कार्यत्वं प्रतिपद्यते। सोऽयं विकासक्रमो बीजस्य। तत्रापि चारम्भो बीजमुपक्षिपति, यत्नो बिन्दुरूपेण तदङ्कुरयति, यत्नविशेषरूपैव प्राप्त्याशा पताकारूपेण शतशाखयति, तद्रूपैव निश्चिताप्तिः प्रकरीरूपेण पत्रपुष्पयति, फलागमश्च कार्यरूपेण फलयति। विज्ञानशुद्धश्चैष मार्गः। तथाहि पताका नाम दूरानुवर्त्ति प्रासङ्गिकं कथावस्तु, प्रकरी चैकदेशवर्त्ति तदिति सार्वभौमो राद्धान्तः। युक्तश्चैषः। न हि अध्यवसितेनापि नायकेनाधिगन्तुं शक्यते फलं विना सहायकजनप्रयत्नम्। सोऽयं पीठमर्दादिसहायकृदुपक्षेपोऽनिवार्य एव फलसिद्धौ। एष एव हि पताका-पदेन व्यवह्रियते। अनेकश्च भवति सहाकृत्। तत्र केषाञ्चिदेकदेशगतत्वमपि। तेषामेवैषां यत्नोऽत्र प्रकरीति व्यपदिश्येत। एवं च वस्तुमात्रस्य पताकाप्रकरीमिश्रितत्वमनिवार्यमेव। ते चेमे कथामध्य एव संभवतः, नादौ न वान्ते। अत एव गर्भविमर्शप्रयोजकत्वमाम्नायतेऽनयोर्दशरूपविचारदीक्षितैः प्रविचक्षणैर्महामतिभिः 'सुग्रीवादिवृत्तान्तः पताका शवर्यादिवृत्तान्तश्च प्रकरी'—ति या दृष्टान्तकल्पना धनिकादेः कृतमनया अप्रत्यासन्नसमग्रसामग्रीकया। अनयैव हि विपर्यस्यामहे भूतार्थधिगमे। अनुबन्धेन पणमादाय तत्सहितं प्रासङ्गिकं वस्तु पताका, तद्रहितं च प्रकरी—ति कल्पनापि भ्रामिक्येव। नहि सर्वत्र मुख्यसहाययोः पण आबध्यते 'ममत्वयेदं संपाद्यम्, तव च मयेदमिति। न हि सर्वमपि प्रासङ्गिकं वस्तु सुग्रीवकथामनुहरति, मकरन्दकथां वा। मकरन्दादिकथाविस्तरं पुना रसप्रत्यूहमामनामः, विन्ध्याटवीप्रभृतिवर्णनप्रविस्तर-

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderab

मिव । न च भासकालिदासादयो दशरूपदक्षा महामतयस्तत्र सज्जन्ते । ततश्च बीजाङ्कुरकाण्डपत्रपुष्पफलदृष्टान्त एवात्र पेशलतरः । आदृतश्चासौ शृङ्गारप्रकाशादौ सूक्ष्मदृशामग्रेसरैर्भोजराजादिभिश्च ।

एवं चावस्था एवैते उभे अपि यदुत अवस्था अर्थकृतिश्चेति । तत्र यत्नावस्थामवस्थापदेनोद्दिश्य फलावस्थामर्थप्रकृतिपदेनोद्दिशन्ति नाट्यविदः । यश्चैतयोः समाहारः, स एव सन्धिः, स एव चेतिवृत्तपदेन व्यपदिश्यते, तस्यैव काव्यबन्धः कथानाम्ना, प्रयोगश्च नाट्यनाम्नेति प्रविविक्त एवैषां विषयः । उक्तं चास्माभिः —

यत्नावस्था फलावस्था काव्यावस्था यथाक्रमम् ।
अवस्थेत्युच्यतामर्थप्रकृतिः सन्धिरेव च ।

इदमत्रापरं निध्येयं यदिदं फलं तत्र प्रकरी, या च प्रकरी तत्र पताका, या च पताका तत्र बिन्दुः, यश्च बिन्दुस्तत्र बीजं निगूढं तिष्ठति, अस्ति च पूर्वपूर्वगर्भत्वमुत्तरोत्तरस्य । एवमेवारम्भादीनामपि फलागमपार्यन्तिकानाम् । न हि नानुबध्यते फलागमे नियताप्तिः, न वा प्राप्त्याशा नियताप्तौ, नापि यत्नः प्राप्त्याशायां न चापि यत्न आरम्भः । एवमेव मुखस्य प्रतिमुखे, तस्य गर्भे, तस्य विमर्शे तस्य च निर्वहणे नास्ति न प्रवेशः । सोऽयं लब्धास्पदोऽत्र त्रितयत्रापि खारिद्रोणन्यायः, घटाकाशमहाकाशन्यायः, कदलीस्तम्भगर्भवृतिन्यायो वा ।

तत्त्वतस्तु तिस्र एवास्था, तिस्र एवार्थप्रकृतयः, त्रय एव च सन्धयः । ते च क्रमेण—१. आरम्भयत्नफलागमाः २. बीजबिन्दुफलानि ३. मुख—गर्भ—निर्वहणानि—इति ।

तिस्र एव त्ववस्थाः स्युः प्रमुखस्तदवदेव च ।
अर्थप्रकृतयस्तिस्रस्त्रय एव च सन्धयः ॥
परस्मिँल्लीयते पूर्वपूर्वमत्रेति चान्तिमे ।
समेषामेव संहारः प्रकृतौ विकृतेर्यथा ॥ नाटचवार्तिकम्

इदमपि त्रिकत्रितयं कथानाम्नि काव्यबन्धे दृष्टिभेदादेव भिन्नम् एकैव स्त्री पुत्रीति, पत्नीति, मातेति यथा । वागारम्भणमात्रमिदम् । अद्वैतमेव त्वत्र तात्त्विकमिति ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

वामनपुराणे विष्णोश्चरितम्

जा० प्र० द्विवेदः

विष्णुर्वेदेषु बहुधा गीयते। वेदोपबृंहणपरेषु पुराणेषु तस्य चरितं विस्तरेण दर्शितमस्ति। तत्रापि च महापुराणद्वयी (विष्णुपुराणम्, श्रीमद्भागवतं च) विष्णोश्चरितविशेषं निबध्नातीति नाविदितं पुराणविदाम्।

सम्प्रति समुपलभ्यमानासु तासु तासु पुराणविषयसूचीषु विष्णोश्चरितं संगृहीतमस्ति। परं तासां विषयसूचीनामतिसंक्षिप्तत्वात् प्रतिपुराणं विष्णोः कियत् किं च चरितं निबद्धमस्तीति धीमताऽपि प्रयत्ने कृतेऽप्यवगन्तुं न शक्यते।

मया वामनपुराणस्यानुशीलनेनावगतं यद् विष्णोश्चरितं वामनपुराणे विविधरूपेषु दर्शितम्। तदेव साङ्गोपाङ्गं चरितम् "विष्णोः शक्त्यादिविभूतयः, विष्णोर्वैभवम्, विष्णो रूपाण्यालयाश्च, विष्णुना कृतानि विशेषसामान्यकार्याणि, विष्णोः स्तुतिस्तोत्राणि, विष्णोर्ध्यानादिजनितं फलम्, विष्णुमुद्दिश्य विधेयानि, विष्णोराराधना, अस्मै कृता नमस्काराः, अनेनास्मै वा प्रदत्तं वरादिदयः, विष्णोः संवादाः, विष्णुविषयकाः प्रश्नाः, विष्णुसंबन्धि वृत्तान्तरम्" इत्येतेषु शीर्षकेषु निबद्धम्। अन्ते च अधिकत्रिशतनामान्यपि तदीयानि दर्शितानि।

सन्दर्भेऽस्मिन्निदमवश्यमवगन्तव्यं यद् वामन-कूर्म विष्णुप्रभृतीनामनेकेषां पुराणानां विषयानुक्रमण्यः 'पुराणम्' पत्रिकाया बहुष्वङ्केषु प्रकाशिताः सन्ति। तत्र च डॉ० रामशंकरभट्टाचार्येण सर्वेभ्यः पुराणेभ्यः संगृहीता विष्णुस्तोत्रसूची, श्रीमाधवाचार्येण च संगृहीता विष्णुपुराणसूची विशेषतो द्रष्टव्या वर्तते।

शक्त्यादिविभूतयः

अस्य शक्तिर्वैष्णवी दैत्यान् दग्धांश्चकार–३०।२१,६२ अस्य दिव्या

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

तनुर्ब्राह्मणाः–६८।८-९ अस्य भार्या लक्ष्मीः–१९।१ अस्य तेजो विश्वतेजो-नाम्ना प्रख्यातम्–२३ (४) १२ अस्य तेजो जिह्वा देवी सरस्वती, इमां राजा कुरुर्द्वैतवने ददर्श–२३।१३; २३ (११)।२३ अस्य कण्ठभूषणं श्रीवत्सः–१८।३३ अस्य माला वैजयन्ती–१८।३३ अस्य धनुः शाङ्र्गम्–४।४१; १८।३० अस्य शङ्खः पाञ्चजन्यः–१८।३१; २३।३५ अस्यायुधं चक्रम् सुदर्शनम् ३।१३; ४।४८,४९;–१२।४४; २३।३५; २३ (२५)।४३ इदं विष्णुः कुरुक्षेत्रे शिवमाराध्य प्राप्तवान्–६७।५,९,१५ अस्यायुधं गदा कौमोदकी–३।१३; १८।२७; २३।३५ अस्यायुधं मुसलम् शातनम् १८।२९–४।४७,४८ अस्यायुधं लाङ्गलम् सौनन्दं हलम् १८।२८ वीरभद्रोपरि प्रयोगोऽस्याभूत् अस्यास्त्रं नारायणम् १८।३० अस्यासनो वाहनं वा गरुडः १९।२ अस्य शय्या शेषः–११।३८ अस्य शयनस्थलं क्षीरसमुद्रः–११।३८ अस्य तपश्चर्यास्थलं क्षीरसमुद्रस्योत्तरं तटम्–२३ (४)।७ अस्याश्रमो वाराणस्याम्, यत्र लोलाख्यो रविरास्ते–३।४०; ३।४२ (पापमोक्षाय शंकरस्यात्रागमनम्) अस्य क्षेत्रं वाराणसी–१६।४८,५० (श्रेयः कामनया ऋषिभिरत्र निपतनाय सूर्यः संप्रेरितः)–१६।५१ (वाराणस्याः स्थितिर्योगशायिनमारभ्य केशवदर्शनपर्यन्तमुक्ता) अस्य नाम्ना प्रसिद्धं तीर्थं कुरुक्षेत्रे सरोरूपेण स्थितं विष्णुपदम्–२३ (१०)।८२; २३ (१५)।६६ अस्य स्थलमच्युतस्थलनाम्ना क्वचित् प्रसिद्धम्, अत्रोषित्वा पापदेशजा काचित् स्त्री सपुत्रा कुरुक्षेत्रे वस्तुमियेष–२३(१३)।४७ अस्य स्थानं सवननाम्ना कुरुक्षेत्रे स्थितम्, अत्र अदितिदर्शनान्तरं गच्छेत्–२३ (१३)।१४।

वैभवम्

अस्य पूजा देव-सिद्ध-मानवानां धर्मः–११।१५,१७,२४ अयं क्षीर-समुद्रे शेषपर्यङ्के प्रतिष्ठितः ११।३८ अयं तुलाराशिस्थे दिवाकरे प्रबुद्धो भवति–१७।२७ अस्य कोपेन वदनात् तेजो निःसृतम्–१९।६ अस्य तेजसा कात्यायन्या अष्टादश भुजाः समुद्भूताः–१९।९ सर्वासु रक्षासु विष्णुपञ्जराख्यं स्तोत्रमधिकप्रभावान्वितं वर्तते–२०।४४ अयं देवादीन् सर्वान् वेत्ति –२३(४)५ अयं योगं समास्थाय तपश्चरति–२३(६)६ । अयमतिसूक्ष्मत्वाज्जगतो न दृग्गोचरी भवति, अस्मिञ्जगत् स्थितम्–२३(६)२१ स्थूलत्वास्मिञ्जगत् स्थितम्–२३(६)२१ अयं पितॄणां सुराणां च परमः पतिरुच्यते–

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

२३(६)।२४ अयं वेदेषु गीयते–२३(६)।२९ अस्माद् विश्वं समुद्भवति, अस्मिल्लीयते, अस्मिन्नेव च प्रतिष्ठते–२३(६)।३० अयं (सूर्यनाम्ना) रात्रिजं तमो हन्ति–२३(६)।३३ अयं विश्वस्य आदिः, वामनरूपिणानेना सुराणां तेजः परीक्षीणम्–२३(८)।१७ अयं प्रभूणामपि प्रभुरुच्यते २३ (८) १८ अयं सप्तलोकगुरोर्ब्रह्मणोऽपि गुरुः–२३(८)।१८ अयं जगतः स्थापने समर्थः–२३(८)१८ अयं स्वयंप्रकाशो वर्तते–२३(८)।२५ अयमशेषसंसारतरोः कुठारः–२३(८)।२७ अस्यैकांशांश-कलातः सर्वे लोकाः समुद्भवन्ति–२३(८)।३८ अयं सर्वजगतां गुरुः–२३(८)।४४ भवार्णवेऽस्मादपरः कश्चित् परित्राणकर्ता नास्ति- २३(८)।४९ वामन—रूपिणोऽस्य मायया जगत् संपीडितं बभूव–२३(१०)।८ अस्य सर्वदेवमये रूपे जानुमूले चन्द्रादित्यौ स्थितावास्ताम्–२३(१०)।६४ अस्य (वामनस्य) माहात्म्यम्–२३(१०)८७ अस्य नाभेः पद्मं समुद्भूतम्–२३(२६)।३ अयं योगं वक्ष्यतीति पार्वती-कुमारं कार्त्तिकेयं प्रत्याह-३२।९ अस्मात् परतरोऽन्यः कश्चिन्नास्तीति शंकरवचनम्–३२।१० अस्य गुणाः पुलस्त्येन नारदं प्रति वर्णिताः–३४।२७ अयं यमं संयच्छति–३४।५७ अयं सर्वस्य जगतो हितसाधकः–५०।१०–११ अस्मिन् वामनाकृत्यादितिगर्भे स्थितेऽसुरा निस्तेजसोऽभूवन्–५१।१ इमं वामनाकृतिमदितिर्देवजननी मिथुनस्थे दिवाकरे सुषुवे–६२।३४ अस्य सकाशाद् बलेर्यज्ञो भयं संभावयामास–६४।२ अस्य दिव्यं रूपम्–६५।१८–३४ अस्य मुखाद् ब्राह्मणा बाहुभ्यां च क्षत्रियाः संभूताः–६६।११(३४) अस्य ऊरुयुग्माद् वैश्याश्चरणकमलाभ्यां च शूद्राः संभूताः–६६।११(३५) अस्य नाभ्या अन्तरिक्षं वक्त्रतश्च इन्द्राग्नी संभूतौ–६६।११(३६) अस्य प्रसादाद् ब्रह्मा, नेत्राद् भानुर्मनसश्च शशाङ्कः संभूतः–६६।११(३७) अस्य क्रोधात् त्र्यम्बकः प्राणाच्च मातरिश्वा संभूतः ६६।११(३८) अस्य शिरसो द्यौः, श्रोत्राद् दिशः, चरणाच्च पृथिवी समभूत्–६६।११(३९) अस्य तेजसो नक्षत्राणि श्रोत्राभ्यां च दिशः संभूताः–६६।११(४०) अस्मात् सर्वं मूर्तात्मकममूर्तात्मकं च जगत् संभूतम्–६६।११(४१) अयमेक एव नराणां शरणं भवति–६७।२८ अस्य पुरुषाणां (वैष्णवानाम्) प्रभुर्यमो नास्ति–६७।२९-३० अस्य 'नमो नारायणाय' इति मन्त्रः सर्वार्थसाधको भवति–६७।५८ अयं द्विजेन्द्रेषु पूजितेषु सत्सु पूजितः स्यात्–६८।७।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

रूपाणि आलयाश्च

अयं कुरुक्षेत्रस्थे स्वनाम्ना प्रसिद्धे स्थाने संनिहितः २३(१३)।१४ अयं कुरुक्षेत्रस्थे लोकोद्धार-तीर्थे नित्यं तिष्ठति–२३(१४)।२२ अयं शिवशरीरे वसति–२३(२६)।७० अयं श्वेतद्वीपे निवसति–३४।५७ अयं क्षीरसमुद्रे आस्ते–३४।५९ अयं मत्स्यवपुषा मानसतीर्थे स्थितोऽस्ति–५२।३ अयं कच्छपरूपेण कौशिकीनद्यां स्थितोऽस्ति–५२।५ अयं वाजिमुख-रूपेण देवह्रदे स्थितो वर्तते–५२।७ अयं शालग्रामतीर्थस्थेषु चरेषु स्थाव-रेषु च संनिहितः–५७।७२ अस्य मात्स्यं रूपं मानसे ह्रदे स्थितम्–६३।१ अस्य कौर्मं रूपं कौशिक्यां नद्यां संनिहितम्–६३।२ अस्य हयशीर्षरूपं कृष्णायां नद्यां संनिहितम्–६३।२ अस्य गोविन्दरूपं हस्तिनापुरे वर्तते–६३।२ अस्यत्रिविक्रमरूपं कालिन्द्याम्, भवरूपं लिङ्गभेदतीर्थे, माधवरूपं केदारे हृष्टमूर्धजरूपं च कुब्जाम्रतीर्थे वर्तते–६३।३ अस्य नारायणरूपं बदरीक्षेत्रे, गरुडासनरूपं वाराहतीर्थे, जयेश-रूपं भद्रकर्णतीर्थे, द्विजप्रियरूपं च विपाशानद्यां वर्तते–६३।४ अस्य रूपधाररूपमिरावत्याम्, कुरुध्वजरूपं कुरुक्षेत्रे, नृसिंहरूपं कृतशौच-क्षेत्रे, विश्वकर्मिरूपं च गोकर्णक्षेत्रे वर्तते–६३।५ अस्य कामपाल-रूपं प्राचीने, पुण्डरीकरूपं महाम्भसि, अजितरूपं विशाखयूपे, हंसरूपं च हंसपदे तीर्थे वर्तते–६३।६ अस्याखण्डरूपं पयोष्ण्यायाम्, कुमारिलरूपं वितस्तायाम्, शंभुरूपं मणिमत्पर्वते, प्रजापतिरूपं च ब्रह्मण्यक्षेत्रे वर्तते–६३।७ अस्य चक्रधररूपं मधुनद्याम्, शूलबाहुरूपं हिमालये, विष्णुरूपं च ओषधिसानुनि वर्तते–६३।८ अस्य सुवर्णाक्षरूपं भृगुतुङ्गे, पीतवासो रूपं नैमिषारण्ये, गदापाणिगोपतिरूपं च गयायां वर्तते–६३।९ अस्य कुशेशय-रूपं गोप्रतारे, अर्धनारीश्वररूपं च माहेन्द्रपर्वते वर्तते ६३।१० अस्य गोपालरूपमुत्तरे, सोमपीथिरूपं महेन्द्रपर्वते, वैकुण्ठरूपं सह्यपर्वते, अप-राजितरूपं च पारियात्रपर्वते वर्तते–६३।११ अस्य देवेशरूपं कशेरुदेशे, सौगन्धितरूपं मलयपर्वते, सदाशिवरूपं च विन्ध्यपादे वर्तते–६३।१२ अस्य विष्णुरूपमवन्तिविषये, अमरेशरूपं निषधेषु, पाञ्चालिकरूपं च-पाञ्चालेषु वर्तते–६३।१३ अस्य हयग्रीवरूपं महोदये, योगशायिरूपं प्रयागे, स्वयंभुरूपं मधुवने, अयोगन्धिरूपं च पुष्करे वर्तते–६३।१४ अस्य केशव-रूपम् अविमुक्तकरूपम्, लोलरूपं च वाराणस्यां वर्तते–६३।१५ अस्य

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

पद्मकिरणरूपं पद्मायाम्, वडवामुखरूपं समुद्रे, बाह्लीशकार्त्तिकेयरूपं च कुमारधारे वर्तते-६३।१६ अस्य शंभुरूपमजेशे, स्थाणुरूपं कुरुजाङ्गले वनमालि रूपं च किष्किन्धायां वर्तते-६३।१७ अस्य श्रीपतिरूपं नर्मदायाम्, त्रिनयन-हुताशनरूपे माहिष्मत्याम्, त्रिसौपर्णरूपमर्बुदपर्वते, क्ष्माधररूपं च सूकराचले वर्तते-६३।१८,१९ अस्य त्रिणाचिकेत-कपर्दि-शशिशेखररूपाणि प्रभासक्षेत्रे, शशिसूर्यध्रुवरूपाणि च उदयपर्वते स्थितानि-६३।२०,२१ अस्य हिरण्याक्षरूपं हेमकूटे, स्कन्दरूपं शरवणे, रुद्ररूपं महालये, पद्मनाभरूपमुत्तरेषु कुरुषु वर्तते-६३।२१,२२ अस्य हाटकेश्वरमहाहंसरूपे सप्तगोदावरे, वटेश्वररूपं च प्रयागे वर्तते-६३।२३ अस्य रुक्मकवचरूपं शोणे, घ्राणतर्पणरूपं कुण्डिने, महायोगरूपं भिल्लीवने, पुरुषोत्तमरूपं च माद्रेषु वर्तते-६३।२४ अस्य श्रीनिवासरूपं प्लक्षावतरणे, चतुर्बाहुरूपं शूर्पारके, सुधापतिरूपं मगधायां वर्तते-६३।२५ अस्य पशुपतिरूपं गिरिव्रजे, श्रीकण्ठरूपं यमुनातटे, वनस्पतिरूपं च दण्डकारण्ये वर्तते-६३।२६ अस्य नीलकण्ठरूपं कालिञ्जरे, शंभुरूपं सरय्वाम्, हंसयुक्तरूपं च महाकोश्यां वर्तते-६३।२७ अस्य शर्वरूपं दक्षिणगोकर्णे, वासुदेवरूपं प्रजामुखे, महाशौरिरूपं विन्ध्यशृङ्गे, मधुसूदनरूपं च कन्थायां वर्तते-६३।२८ अस्य चक्रपाणिरूपं त्रिकूटशिखरे, हृषीकेशरूपं लौहदण्डे, मनोहररूपं च कोसलायां वर्तते-६३।२९ अस्य महाबाहुरूपं सुराष्ट्रे, यशोधररूपं नवराष्ट्रे, भूधररूपं देविकानद्याम्, कुशप्रियरूपं च महोदये वर्तते-६३।३० अस्य छादितगदरूपं गोमत्याम्, शंखिरूपं शङ्खोद्धारतीर्थे सुनेत्ररूपं सैन्धवारण्ये, शूररूपं च शूरपुरे स्थितम्-६३।३१ अस्य रुद्ररूपं हिरण्वत्याम्, वीरभद्ररूपं त्रिविष्टपे, शङ्कुकर्णरूपं भीमायाम्, भीमरूपं च शालवने वर्तते-६३।३२ अस्य वृषभध्वजरूपं कैलासे, महेशरूपं महिलाशैले, शशिप्रभरूपं च कामरूपे वर्तते-६३।३३ अस्य गोमित्ररूपं बलभ्याम् पङ्कजप्रियरूपं कटाहे, उपेन्द्ररूपं सिंहलद्वीपे, कुन्दमालिरूपं च शक्राह्वे वर्तते-६३।३४ अस्य सहस्रशिरोरूपं कालाग्निरुद्ररूपं कृत्तिवासोरूपं च रसातले वर्तते-६३।३५ अस्य कूर्मरूपं सुतले, पङ्कजासनरूपं वितले, छागलेश्वररूपं च महातले ख्यातम्-६३।३६ अस्य सहस्रचरण-सहस्रभुज-सहस्राक्षरूपं च तले वर्तते-६३।३७ अस्य हरिशंकररूपं पाताले, कोकनदरूपं धरातले, चक्रपाणिरूपं च मेदिन्यां वर्तते-६३।३८ अस्य गरुडरूपं भुवर्लोके, विष्णुरूपं स्वर्लोके, अगस्त्यरूपं महर्लोके, कपिलरूपं च जने

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

[भुवने] वर्तते-६३।३९ अस्य वाङ्मयरूपं तपोलोके, ब्रह्मरूपं च ब्रह्मलोके वर्तते-६३।४० अस्य सनातनरूपं शैवलोके, परब्रह्मरूपं वैष्णवलोके, अप्रतर्क्यरूपं निरालम्बे, तपोमयरूपं च निराकाशे वर्तते-६३।४१ अस्य चतुर्बाहुरूपं जम्बूद्वीपे, कुशेशयरूपं कुशद्वीपे, गरुडवाहनरूपं च प्लक्षद्वीपे वर्तते-६३।४२ अस्य पद्मनाभरूपं क्रौञ्चे, वृषभध्वजरूपं शाल्मले, सहस्रांशुरूपं शाके, धर्मराड्रूपं च पुष्करे वर्तते-६३।४३ अस्य पृथिव्यां शालग्रामे तिष्ठति-६३।४४ अस्य सनातना पुण्या आलयाः-६३।६५ अयं वामनरूपेण ब्रह्मणः सदने तिष्ठति-६६।१४ ।

विशेषकार्याणि

अनेन (मुरारिणा) युद्धभूमौ वीरभद्रो विनिष्पिष्टः ।। ४।५० अयमनन्तशिवलिङ्गान्तप्राप्तिकामनया खगेश्वरमारुह्य पातालं प्रविवेश ६।७३-७४,७६ अयमुत्तरायणे आषाढपूर्णिमायां भोगिभोगेषु स्वपिति १७।३ अयं महिषासुरेण भीतानां देवानां वचो निशम्य चुकोप-१९।५ अयं कात्यायन्यै चक्रं ददौ ।। १९।१४ अयं हरिरूपेण स्थितिकामार्थं पृथूदकसरः सेवितवान् ।। २३ (१)।११ अयं (विश्वकृत्) समुद्रस्योत्तरे कुले तपश्चरति स्म ।। २३ (४)।७ अयं कश्यपेन स्तुतः सन् परमप्रीतो वरप्रदानार्थं देवानां समक्षमाविरभूत् ।। २३ (६)।१,२ अनेन देवेभ्यः कश्यपाय च वरः प्रदत्तः ।। २३ (६)।७ अयं प्रदत्तवरस्य पूर्ति प्रतिज्ञातवानदितिं प्रति ।। २३ (७)।३ अयमदितेर्गर्भतां गतः ।। २३ (७)।१४,१६; २३ (८)।१८ अयमेक एव त्रैलोक्यं सनाथं कर्तुं वामनरूपेणावतीर्णः ।। २३ (८)।१९ अयं स्वभक्तान् परित्रायते ।। २३ (९)।१० अयं वामनरूपमास्थाय दशमे मासेऽदितेर्जन्म लेभे ।। २३(९)।१२,१३ अयं वामनरूपमवधार्य बलियज्ञमुपस्थितः सन् यज्ञं वह्निं च तुष्टाव ।। २३ (१०)।३८ अयमिन्द्राय त्रैलोक्यं सुतलं नाम पातालं बलेर्दत्तवान् ।। २३ (१०)।६५,६६ अनेन लोकोद्धारतीर्थे सर्वे लोका उद्धृताः ।। २३ (१४)।२० अयं (वामनः) वामनकतीर्थे इन्द्रायापहृतं राज्यमर्पयामास ।। २३ (१५)।६५ अनेन ज्येष्ठाश्रमाख्यतीर्थे विप्राः प्रतिष्ठापिताः ।। २३ (१५)।६९ अनेन पुरा कुरुक्षेत्रे कुलोत्तारणाख्यं तीर्थं कल्पितमासीत् ।। २३ (१५) ७४ अयं चक्रेण मुरासुरं चिच्छेद ।। ३५।७३-७७ अयं स्वहृत्पङ्कजशायि शिवलिङ्गं देवेभ्यो दर्शयामास ।। ३६।२३

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

अयं देवानां सन्निधौ विश्वमूर्तिरभूत् ॥ ३६।२८-३१ अयं सुदर्शनचक्रेण कुजम्भं निजघान ॥ ४३।१५७ अयं नरवैर्हिरण्यकशिपुं व्यदारयत्-४७।६ अयं बाणैर्गिरींश्छादयामास ॥ ४७।४० अयं चक्रेण कालनेमि—शिरश्चिच्छेदः ॥ ४७।४८ अयं रूपवतीश्चतस्रो युवतीर्लक्ष्मीपदवाच्यां निर्ममे ॥ ४९।१८ अयमिन्द्रस्याराधनया तुष्टो तस्मै राज्यप्राप्तिवरदानं व्यतरत् ॥ ५०।२२-२३ अयमदितेस्तपसा प्रीतः संस्तस्यै वरमददात् ॥ ५०।४१ अयं धुन्धोर्बन्धनाय वामनरूपं दधार ॥ ५२।५२ अयं त्रिविक्रमरूपेण दानवपतिं धुन्धुं ननाश ॥ ५२।८२-८९ अयं धुन्धुं विजेतुं पूर्वं वामनस्ततश्च त्रिविक्रमोऽभूत् ॥ ५२।९० अयं जलोद्भवदैत्यस्य निधनाय शिवस्य त्रिशूलं दधार ॥ ५५।२४,३० अयं शिवस्य त्रिशूलेन जलोद्भवदैत्यं बिभेद ५५।२९ अयममोघत्वजिज्ञासया चक्र महेशोपरि मुमोच ॥ ५६।३२ अस्य कराद् विभ्रष्टं चक्रं शिवं त्रेधा चकार ॥ ५५।३३ अयं शिवप्रदत्तेन चक्रेण श्रीदामाख्यदैत्यस्य शिरश्चिच्छेद ॥ ५६।४२ अयं गजेन्द्रस्य भक्त्या प्रीतः सन् ग्राहं स्थले चक्रेण विदारयामास नागेन्द्रं च पाशेभ्यो मोक्षयामास ॥ ५८।६३ अयं मघोने (इन्द्राय) त्रिविष्टपं ददौ ॥ ६५।६२ अनेन सुरकार्यसिद्धये वामनरूपं धृतम् ॥ ६५।६६ अयमिन्द्राय त्रिविष्टपं दत्त्वा अवामनश्च भूत्वा ब्रह्मसदनं जगाम ॥ ६६।४ अयं ब्रह्मणे सर्वदेवमयं रूपं दर्शयामास ॥ ६६।९-१० अयं मुसलमादाय बलिरक्षणार्थं तस्य द्वारि तिष्ठति ॥६८।६१

सामान्यकार्याणि

अयं शिवस्तोत्रं चकार-६।७७ अयं चक्रेण राजर्षिकुरोर्दक्षिणं सव्यं च भुजमूरूचाच्छिनत् २३।३१,३२। अयं शिरोदानेन राजर्षिकुरौ प्रीतो बभूव—३३।३२ अयं समन्तपञ्चकक्षेत्रस्य रथार्थं चन्द्रं वासुकिं च नियोजितवान् —२३।३९ अयं वामनरूपेण कश्यपस्य गृहेऽवतीर्णोऽभूत—२३(१०)।४ अयम् (वामनः) अङ्गुष्ठेन चिक्षुरस्य ग्रीवामहनत्—३२ (१०) ।६१ अयं नरसिंहावतारे सिंहेषु रतिमवाप—२३ (१५)।२९ अस्य वचनाद् देवाः कुरुक्षेत्रे पृथूदकमाजग्मुः—२४।८ अयं शिवस्य गेहमाजगाम—२६।६९ अयं लक्ष्म्या सह वैनतेयमारूढः शिवविवाहयात्रायां शिवपार्श्वस्थः सन् प्रययौ ॥ २७।९ अस्य नमुचिवधायोद्योगः ॥ २९।३ अस्य वचनात् कुटिला अग्निश्च शिवान्तिकं जग्मतुः ॥ ३१।३४ अयं गुहमभ्य-

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

षिञ्चन् ॥ ३१।५५ अयं प्रमथगणत्रयं कार्तिकेयाय प्रददौ ॥ ३१।६३ अयं कार्त्तिकेयाय मालां ददौ ॥ ३१।१०३ अयं देवान् कुरुक्षेत्रेऽनयत् ॥ ३६।३२ अयं गरुडमारुह्य देवसेनायामुपस्थितोऽभवत् ॥ ४७।२१ अस्य भयाद्दैत्या कालनेमिं शरणं जग्मुः ॥ ४७।३५ अयं जलोद्भवमहासुरवधप्रसङ्गे शिव-समीपं जगाम ॥ ५५।२३ अयं श्रीदानाख्यमसुरं हन्तुमिच्छन् महेश्वर-मुपागमत् ॥ ५६।१८ अयं गुरुणा भरद्वाजेन सह संवादं विधाय गिरीन्द्रात् कुरुजाङ्गलं प्रत्यगच्छत् ॥ ६३।४८

स्तुतिस्तोत्राणि

शंकरेणोदीरितं स्तोत्रम् ॥ ३।१३-२३ अशून्यशयनाख्यद्वितीयाव्रत-प्रसङ्गे त्रिविक्रमादिनामभिरस्य स्तुतिः ॥ १७।२२ वैष्णवपञ्जराख्यं स्तोत्रं रक्षार्थं शिवः कात्यायन्यै प्रोक्तवान् ॥ १८।२५-३७ विष्णुपञ्जराख्यं स्तोत्रं देव्या रक्षार्थं शिवो देवीमुक्तवान् ॥ २०।४१,४३ अस्य स्तोत्रस्य प्रभावेण देव्या महिषासुरो निषूदितः ॥ २०।४४ अस्य प्रसादार्थं वेदोक्तं परमं स्तवमुदीरितवान् ॥ २३ (४)।२३ कश्यपो विश्वभूतादि नामभि-र्विष्णुमस्तौत् ॥ २३ (५)।१-३१ अयमदित्या स्तुतः ॥ २३ (६)।१५, १७-३५,३६ अयं ब्रह्मणा स्तुतः ॥ २३ (९)।१८ इमं नारदस्तुष्टाव ॥ २३ (१५)।३५,३६ अयमम्बुशायिनाम्ना स्तुतः ॥ २३ (२६)।१५३ अयं सर्वतः पात्विति प्रार्थितम् ॥ ३२।२५ अयमदित्या स्तुतः ॥ ५०।५३ अस्य स्तुतिमापद्विमोक्षमन्विच्छन् गजेन्द्रश्चकार ॥ ५८।३१-५९ कश्चिद् द्विज आत्मरक्षार्थं विष्णुपञ्जरस्तोत्रमुदीरितवान् ॥ ५९।९-२२ अस्य स्तोत्रं सरस्वती प्रोक्तं कश्चिद् ब्राह्मणोपि राक्षसं प्रति जगाद ॥ ५९।६६-११२ सरस्वत्या समीरितस्य विष्णुस्तोत्रस्य पाठेन सर्वपापेभ्यो मोक्षः संजायते ५९।१२१ अस्य स्तोत्रं रुद्रो वाराणस्यां केशवस्याग्रतः समुदीर्य पापादुप-शान्तो बभूव ॥ ६०।१-५० अस्य स्तोत्रं महर्षिणागस्त्येन प्रोक्तम् ॥ ६१।१-२९ अस्य वामनाकृतेः स्तोत्रं ब्रह्मा जगाद ॥ ६२।३५ विष्णोः सुद-र्शनचक्रं बली रसातलेऽस्तौषीत् ॥ ६७।११-१९

ध्यान-फलम्

अस्य स्मरणाद् नागपरिगृहीतश्च्यवनो विषहीनो बभूव ॥ ७।२८ अस्य पदद्वयमभ्यर्च्य चन्द्रमा आत्मानमरक्षत् ॥ १६।२७ अयं चक्र-

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

पाणिरूपेण यस्य चेतसि तिष्ठति तस्य युद्धे दर्पहानिर्न भवति ॥ २०।४४ विष्णोर्दर्शनं विफलं न भवति ॥ २३ (७)।३ स्वयं भक्तान् परित्रायते २३ (९)।१० विष्णुपदे सरोवरे दत्तानि श्राद्धानि कृता नियमाश्चाक्षया भवन्ति ॥ २३ (१०)।८२ ज्येष्ठमासे शुक्लपक्षस्य द्वादश्यां विष्णुपदह्रदे स्नानेन परमं पदमवाप्यते ॥ २३ (१०)८४। अस्य चरितस्य स्मरणेन फलविशेषः प्रवर्तते ॥ २३(१०)।८८ कुरुक्षेत्रस्थं शिवेन संयुक्तमिमं प्रपूज्याभिमता लोका लभ्यन्ते ॥ २३(१३)।२२ कुरुक्षेत्रस्थवाराहतीर्थे स्नानेन परमं पदमवाप्यते ॥ २३(१३)।३२ कुरुक्षेत्रस्थविष्णुपदे स्नानेन विष्णुलोकः प्राप्यते ॥ २३(१५)।६६ अयं नक्षत्र-पुरुषाख्यव्रतेन प्रीतः सन् सर्वं पापं हन्ति ॥ ५४।३२ अयं नक्षत्रपुमानिति नाम्ना पूजितोऽभिवाञ्छितं ददाति ५४।३४ इमं नक्षत्राङ्गं संपूज्यारुन्धतीप्रभृतयोऽभीष्टं लेभिरे ॥ ५४।३५-३८ अस्य विविधदेशस्थितरूपाणामालयानां च स्मरणादिभिर्मनुजादयो धर्मादिकं लभन्ते ॥ ६३।४६ अस्य पूजने रताः पुरुषा मृता अपि शोच्या न भवन्ति ॥ ६७।३६ इमं ये समाश्रयन्ते ते संसारगर्ते न पतन्ति ॥६७।४० अयं येषां मनसि निवसति ते परिभवं न यान्ति ॥ ६७।४ ये भुविस्था नरा विष्णुमहरहः स्मरन्ति ते वैष्णवपदं यान्ति ॥ ६७।७० अस्य (केशवस्य) मन्दिरं यः कारयति स पुण्यांल्लोकान् जयति ॥ ६८।३७ अस्य मन्दिरकारकोऽष्टौ कुलानि तारयति ॥ ६८।३८ विष्णुलोकजिगीषवो ज्यामघनृपतिकारितं विष्णुमन्दिरनिर्माणरूपं मार्गं व्रजन्ति ॥ ६८।५२ यो भक्तियुतः सन् वामनपुराणं शृणोति स विष्णुपदमभ्युपैति ६९।१

सपर्या

प्रभातकाले मङ्गलार्थमयमुदीरणीयः ॥ १४।२९ अस्य शयनार्थं शेषफणेषु पर्यङ्कः कर्तव्यः ॥ १७।७ इमं (केशवम्) संपूज्य शयितव्यम् ॥ १७।७ पीताम्बरधरो भूत्वा विष्णुं शाययेत ॥ १७।८ श्रीवत्सस्याङ्केन युतं विष्णुमशून्यशयनाख्यायां द्वितीयायां गन्धपुष्पादिभिर्यजेत ॥ १७।२० लक्ष्म्या समं पर्यङ्कस्थं विष्णुमशून्यं शयनाख्यायां द्वितीयायामर्चयेत्-१८।२० अस्य प्रसादात् स्वशयनमशून्यं स्यादित्येतदर्थं विष्णुः स्तवनीयः ॥ १७।२२ विष्णोस्तल्पस्याशून्यत्वान्मम गार्हस्थ्यनाशो मा भूदिति अस्य स्तुतिः ॥ १७।२३ अशून्यशयनाख्याया द्वितीयाया द्वितीयेऽह्नि विष्णोः प्रीत्यर्थं फलानि देयानि ॥ १७।२५ अस्य पूज-

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

नादिविधानेन चातुर्मास्यव्रतं कार्यम् ॥ १७।२६ शय्यासहितविष्णुमूर्तिः प्रदेया ॥ १७।२८ अयमाश्विनमासस्य शुक्लपक्षे एकादश्यां पूजनीयः– १८।११ गन्धमयैः पुष्पैरयमाश्विनशुक्लैकादश्यां पूजनीयः ॥ १८।१२ अस्मै मणिमुक्ताप्रवालानि समर्पणीयानि ॥ १८।१५ स स्नातव्यः हविषा ॥ १८।१७ अमुं पादादारभ्य कुसुमैरर्चयेत् ॥ १८।१८ अयं (केशवः) हिरण्यरत्नवासोभिरर्चनीयः–१८।१९ अस्मै रागो निवेदनीयः–१८।१९ अस्मै खाण्डवं चोष्यं हविष्यं च देयम्–१८।१९ अयं (पद्मनाभः) मन्त्रेण प्रार्थनीयः–१८।२० धर्मार्थकाममोक्षपुरुषार्थानामखण्डतायै पद्मनाभः प्रार्थनीयः, जितेन्द्रियः सन्नस्य संवत्सरं यावद् व्रतं कुर्यात् –१८।२१,२२ सुदर्शनचक्रादिभिः प्राच्यादिदिक्षु रक्षार्थं विष्णुः प्रार्थनीयो नमस्कार्यश्च–१८।२६-२९-३६ अस्य ध्यानादिकं श्रद्दधानैर्मनुष्यैः कार्यम्–६७।७५ स जात्यादिपुष्पैर्बिल्वादिपत्रैश्च पूजनीयः–६८।१०-१५ अस्य प्रीणनाय माघमासादौ वस्तूनि देयानि–६८।२३।३६ ।

आराधना

भाद्रमासेऽपूजयन् महाभागवता जनाः–१६।१९,२२, अयमखण्डेन व्रतेन चन्द्रमसा समाराधितः–१६।२६ अच्युतादेर्गार्हस्थ्यनाशाभावाय प्रार्थितः–१७।२३ अस्य प्रसादार्थं देवा उग्रं तप्रवन्तः–२३(४)।२१ अस्य पूजां कश्यपोऽदितिरिन्द्र देवाश्चक्रुः–२३(६)।१०–११ अयमदित्या समाराधितः–२३(६)।१४ इमं चतुर्भुजं वीक्ष्य नारदो भक्तिभावतस्तुष्टाव–२३(१५)।३३ इमं नक्षत्रपुरुषव्रतेन पुरूरवा आराधयामास–५४।१ इमं प्रह्लादइरावत्यां स्नात्वा चैत्राष्टम्यां संपूजयामास–५५।१ इमं ग्राहगृहीतो गजेन्द्रः परमापदमापन्नो मनसाऽचिन्तयत्–५८।२८ अयं गजेन्द्रग्राहाभ्यां प्रपूजितः सन् देवादिभिः स्तुतः–५८।७६ इमम् (अखण्डम्) आत्रेयाद्या ऋषयोऽर्चयन्ति स्म–६२।२१–२२ यज्ञवाटमुपस्थितस्यास्यार्चनं बलिश्चकार–६५।१–४ अस्य पूजां स्वर्गे ब्रह्मा इन्द्रश्च पुष्पैश्चकार–६६।१६–१७ अस्यायतनं (मन्दिरम्) ज्यामघनृपश्चकार–६८।४४ अस्य मन्दिरे मार्जनादिकार्यं बलिः, दीपप्रदानं च तस्य पत्नी विन्ध्यावली चकार–६८।५७–५९ ।

अस्मै नमस्कारः

अयं ब्रह्मणा नमस्कृतः–१६।६१ इमं लक्ष्मिसमन्वितं मूर्ध्ना प्रणामं

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

चकार लोमहर्षणः २३(१)।४ इममदितिःप्राणमत्–२३(६)।१६,२४,३१ अयं प्रह्लादेन नमस्कृतः–२३(८)।२१ 'अस्मै नमः' इति वचसा नारदो विष्णुं तुष्टाव–२३(१५)।३५ इमं पार्वत्या आदिष्टः कार्त्तिकेयः प्रणिपपात-३२।११ अस्य सर्वदेवमयं रूपं दृष्ट्वा ब्रह्मा प्राणमत्–६६।११-(१-७१)।

वरादयः

इमं राजर्षिः कुरुर्वरमयाचत–२३।३६ इमं कश्यपो वरमयाचत–२३(६)।४ इममभिलषितं वरमदितिर्ययाचे–२३ (७)।८ अयं वामनरूपेण पदत्रयपरिमितां भूमिं धुन्धुं दानवपतिं ययाचे–५२।८० अस्मै वामनरूपधारिणे पदत्रयपरिमितां भूमिं दानवपतिर्धुन्धुर्ददौ–५२।८१ अस्याराधनया प्रीतः शिवः सुदर्शनाख्यं चक्रमस्मै ददौ–५६।२१–२२ अस्मै वामनरूपाय महर्षयो वरान् ददुः–६२।४४ अस्मै वामनरूपाय पुलहादिमहर्षयो यज्ञोपवीतादिकं ददुः–६२।४५–४७ अस्य वामवाकृतेर्जातकर्मादिकाः क्रिया भरद्वाजश्चकार–६२।४३ अस्य वामनाकृतेर्व्रतबन्धविधानं भरद्वाजश्चकार-६२।४४ अयं भारद्वाजाङ्गिरसात् साङ्गं वेदसर्वशस्त्राणि च मासेनैकेनाधीतवान्–६२।४८–५० अयं (वामनः) पदत्रयमितां भूमिं बलिं ययाचे–६५।८ अस्मै बलिः पदत्रयमितां भूमिं ददौ–६५।१७।

संवादाः

अस्य (क्षीरसागरे) ब्रह्मणा सह संवादः–६।७०; ६२।४२; ६६।५,१२ अस्य प्रह्लादेन सह–८।२२–४२ अस्येन्द्रादिदेवैः सह–२२।१३,२३,२६; २३।१७,१८; २३(१)।१, २३(६)।६; २४।१; ३६।१, १६–१७; ५२।४३–५१ अस्य राजर्षिकुरुणा सह ॥ २३।३३,३४,३५ अस्य कश्यपेन सह ॥ २३(६)।३ अस्यादित्या सह ॥ २३(६)।५; २३(७)।१-२,९,१०,१२,१३; [?] ५०।४२-४९ अस्य सर्वदेवमयेन वामनेन सह संवादः ॥ २३(१०)।६७ अस्य कुटिलाग्निभ्यां संवादः ॥ ३१।३३ अस्य स्कन्देन सह ॥ ३२।१०६,१११-११५ अस्य यमेन सह ॥ ३४।५१-५२ अस्य मुरासुरेण सह ॥ ३५।७३-७७ अस्य गजेन्द्रेण सह ॥ ५८।६८-७२ अस्य बलिना सह ॥ ६५।५-३५,५४-६१ अनेन सह बाणस्य संवादः ॥ ६५।३७-५३ अस्य भरद्वाजेन सह ॥ ६२।५२, ५६।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

प्रश्नाः

अस्य वामनावतारविषये नारदस्य पुलस्त्यं प्रति प्रश्नः ॥ १।३ अम्बरात् पतन् सूर्यः ऋषीन् प्रति विष्णुक्षेत्रस्य नाम पप्रच्छ ॥ १६।४९ इमं प्रति देवाः कुरुक्षेत्र-पृथूदकतीर्थोद्भवविषये पप्रच्छुः ॥ २२।२३ विष्णुः कथं वामनतां गत इति ऋषीणां प्रश्नो लोमहर्षणं प्रति ॥ २३(३)।१ अस्य परिचयविषयकः प्रश्नः प्रह्लादं प्रति बलिना कृतः ॥ २३ (८)।२९ अस्य गुह्यानि स्थानानि मुनिर्मार्कण्डेयः सनत्कुमारं प्रति पप्रच्छ २३(२२)।१२ अस्य [मुरारिः]क इति प्रश्नो प्रश्नो नारदस्य पुलस्त्यं प्रति ॥ ३४।२६ अस्य चतुर्मूर्तिस्वरूपविषये नारदस्य पुलस्त्यं प्रति प्रश्नः ॥ ३४ ६३ विष्णुं कस्मिन् स्थानेऽदितिर्जनितवतीति प्रश्नो नारदस्य पुलस्त्यं प्रति ॥ ५०।३० अयं पूर्वं कस्य बन्धनं कृतवानिति नारदः पुलस्त्यं प्रति पप्रच्छ ॥ ५२।१० ११ अयं शूलं किमर्थं दधारेति नारदः पुलस्त्यं प्रति पप्रच्छ ॥ ५५।१८ अस्मै शिवश्चक्रं किमर्थं ददाविति नारदः पुलस्त्यं पप्रच्छ ॥ ५६।१ केषु केषु स्थानेषु भवतः सान्निध्यमिति भरद्वाजो वामनं प्रति पप्रच्छ ॥ ६२।५५ ।

वृत्तान्तराणि

अस्य नैमिषारण्ये दर्शनं प्रह्लादः संकल्पितवान् ॥ ७।३९ अस्य क्षेत्रे-वाराणस्यां निपतनार्यर्षिभिः सूर्यः संप्रेरितः ॥ १६।४८ अस्याराधनाय कामिभिः प्रोक्तानि व्रतानि पुलस्त्यो नारदं प्रति कथयामास ॥ १७।२ अस्मिन् प्रसुप्ते सति देवाः गन्धर्वाश्च स्वपन्ति ॥ १७।४ इमं द्रष्टुं देवाः (पितामहं पुरस्कृत्य) श्वेतद्वीपे गतवन्तः ॥ १९।१; २२।१२ अय कात्यायनीं तुष्टाव ॥ १९।१८ अस्य चक्रं देवी महिषासुरोपरि चिक्षेप ॥ २१। ४४ अस्य सकाशाद् वरप्राप्तये ब्रह्मणादितिः प्रेरिता ॥ २३(३)।१५ इममदितेरुदरे ध्यानमार्गेण प्रह्लादो ददर्श ॥ २३(८)।९,१०;५१।११-१३ इममाक्षिपन् बलिः प्रह्लादेन भर्त्सितः ॥ २३(८)।३५,४०,४२,४३,४५,४७,४८; ५१।२४ इममाक्षिप्तवते बलये प्रह्लादः शापं विससर्ज ॥ ५१।२५-३७ वामनावताररूपेणास्मिन्नवतीर्णे सति देवा दुःखं मुमुचुः ॥ २३(९)।१४ अस्य नारसिंहदेहस्य लम्भनार्थं देवाः शिवमाराधयामासुः ॥ २३(१५)।३० इममहं तपसाराधयिष्यामीति कुटिला ब्रह्माणं प्राह ॥ २५।१० अस्य

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

This PDF you are browsing now is in a series of several scanned rare books and manuscripts from Sanskrit Academy, Hyderabad.

Address:

Manikeshwar Nagar Kaman,

Osmania University, Tarnaka,

Hyderabad, Telangana, 500007

https://sanskritacademy.net/

https://archive.org/details/@sanskrit_academy_hyd

The Academy is currently led by Director Shri Madhushan Penna.

His CV:

Prof. Penna madhusudan,

Director Sanskrit Academy, Hyderabad

Areas of interest

Yoga shastra, nyaya, yoga and vedanta philosophy.

Works

3 mahakavyas, 10 laghukavyas, 30 translations and 140 edited books

Sahitya Academy Awardee for Mahakavya on Gulabrao Maharaj.

Translated the Marathi Jnaneshwari in 9000 Sanskrit shlokas.

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

Honours

Honorary D.Litt by National Sanskrit University, Tirupati AP. for his unique contribution in Indian Philosophy.

-Vachaspati

-Yoga Ratna

-Shastra nidhi

-Utkrisht Sanskrit Pandit

-Yajna Surabhi

-Shastri (Karavir Peeth)

-Shastra Ratnakara

Awards

- Sahitya Academy award

- Maharashtra govt sadhana award

- Pt. Satvalekar award

- Pt. Latkar shastri award

- Pt. Ghatate award

- Somnath Trust Award with Gold Medal and title of Best Scholar

- Sribhashyam national award

and many other.

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

Foreign Travel

The Netherlands, Canada for World Sanskrit Conference 2018.

Indian embassy, Nepal 2023

DVDs on yoga, Indian philosophy and Sanskrit Literature.

mspenna67@gmail.com

Digitization by eGangotri Trust/Sarayu Trust, New Delhi

Funding for Digitization: Shri Ravi Parimi, Hyderabad

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna